सागरिका

नाट्यवेद-विशेषाङ्कः

सप्तदशवर्षे अङ्कः १-२

सम्पादकः

डॉ० रामजी उपाध्यायः

सागरविश्वविद्यालये

संस्कृतविभागस्य प्राध्यापकाध्यक्षः

प्रकाशकः

सागरिका-समितिः, सागर-विश्वविद्यालयः

सागरम् (म० प्र०

प्रकाशिका

सागरिका-समितिः

सागर-विश्वविद्यालयः

सागरम् (म० प्र०)

देयम्

प्रत्यङ्कम्	४-०० रूप्यकाणि
वार्षिकम्	१२-०० रूप्यकाणि
आजीवनग्राहकस्य	२००-०० रूप्यकाणि
अङ्कप्रकाशः	प्रतिवर्षम् आषाढाश्विन-पौष चैत्र- [जून-सितम्बर-दिसम्बर-मार्च-] मासेषु

सूच्यम्— आजीवनग्राहकेभ्यः सागरिकायाः प्राचीना अपि सर्वेऽङ्काः सवस्त्र पृष्टबन्धा निश्शुल्कमुपह्रियेरन् ।

मुद्रकः

एकेडेमी प्रेस

६०२, दारागंज इलाहाबाद

विषय-सूची

१. दशरूपक-मीमांसा — १
रामजी उपाध्यायः
२. यायावरीयं नाट्यवृत्तम् — १८५
राधावल्लभ त्रिपाठी

नाट्य-भूमिका

१

नाट्योत्कर्षः

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्।
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा॥
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते।
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्॥

भर्तृहरिणा सम्यङ् निर्दिष्टम्—

साहित्य-संगीत-कला-विहीनः साक्षात्पशुः पुच्छविषाणहीनः।

अत्र मानवोत्कर्ष-विधायिषु तत्त्वेषु साहित्यं प्राथम्यं भजते इति प्रकटितम्। साहित्येऽपि नाटकं रम्यतममिति सुविदितम्। सूक्तम्

'काव्येषु नाटकं रम्यम्' इति।

काव्येषु ज्ञानम्, उपदेशः, आनन्दश्चेति त्रयं निसर्गम्। एतत् त्रयं सर्वविधेषु काव्येषु वर्तते नाम। तथापि नाट्येषु ज्ञानादीनां भूयानतिशयो भवति इति भरतेन प्रमाणितम्। तथा हि—

या विद्या यानि शिल्पानि या गतिर्यच्च चेष्टितम्।
लोकालोकस्य जगतस्तदस्मिन्नाटकाश्रयम्॥ ना० शा० ५.५७

अपरञ्च

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति॥ ना० शा० १.१२५

सर्वविधेषु काव्येषु नायकादीनां चरितानि वर्ण्यन्ते शब्दद्वारेण, किन्तु केवलं नाट्येष्वेव तेषां प्रत्यक्ष-दर्शनमिव कार्यते चतुर्विधाभिनयेनापि। प्रत्यक्ष-दर्शनेन च तेषां विशेषतरः प्रभावो जन्यते।[1]

१. अनभिनेय-रूपकेषु संवादस्य विशेषो वर्तते। रूपकं तावत् द्विविधं भवति-अभिनेयमनभिनेयं चेति नाट्यदर्पणे ३.२ कारिकामधिकृत्य विवृतम्। संस्कृतसाहित्ये अनभिनेयरूपकाणि बहूनि सन्ति।

नाट्यस्य परमोत्कर्षो नायकादीनां संवादेन वृद्धिं याति। अपरेषु काव्य-भेदेषु संवादो भवतु नाम। किन्तु तेषु संवादस्य लघ्वी मात्रा वर्तते। नाट्येषु पुनः संवाद आद्यन्तं वर्तते। भासेऽपि संवादस्य रमणीयता भूयसी दृश्यते। संवादस्येदमत्र वैशिष्ट्यं कालिदासस्य मत्यनुसारमपि नीतिकाव्यस्य श्रेष्ठपदं विदधाति।

नाट्ये संवादद्वारेण घटना वर्तमाना इव रोचिष्णु साक्षात् क्रियन्ते। अन्येषु काव्येषु संवादाभावे भूतकालिकी संघटना न तावन्मात्रं रुचिरा भवति। नाट्येषु वर्तमानकालिकी भाषा सम्यग् विलसति। सोऽयं संवादो द्वादशरूपो-ऽभिनयात्मको वाग्वेदरूपे जयते।

एतेषु संवाद-सन्दर्भेषु आ कश्मीरात् कुमारी-पर्यन्तं प्रवहमाणा नाना-रूपधरा वाक्सरस्वती सर्वान् लोकान् रंजयति पावयति चेति प्रशंसितं भोजेन—

गिरः श्रव्या दिव्याः प्रकृति-मधुराः प्राकृतधराः।
सुभव्योऽपभ्रंशः सरसरचनं भूतवचनम्॥
विदग्धानामिष्टे मगधमथुरावासिभि—
निबद्धा यस्तेषां स खलु कविराजो विजयते॥

नाट्येषु यादृशी सुसमृद्धा रस-निर्झरिणी निष्पद्यते, न तादृशी तावदन्येषु काव्यभेदेषु भावानां विभावानुभावसंचारिणां च प्रत्यक्षव्युत्पत्तिरभिनयेन नाट्येष्वेव सम्भवति। अपरेषु च काव्येषु रसतत्त्वानि केवलं शब्द-संस्पृष्टानि वानुदिष्टानि वा प्रायश ऊह्यानि सन्ति। नतावता रसनिष्पत्तौ वैपुल्यं स्यात्। नाट्यं तु रसस्य परमं स्थानम्। रस एव नाट्यम्।

कवीनां प्रतिभायाः सर्वोच्चविलासो नाट्य-कृतिष्वेव समजायत, यतो हि नाम भारते देवानां प्रीत्यर्थं यत् कृतम् तदेव कर्तॄणामपि बहुमतं बभूव। भरतेन समर्थितं यत् नाट्यस्य परं प्रयोजनं देवानां परमा प्रीतिः स्यात्। तथा हि—

न तथा गन्धमाल्येन देवास्तुष्यन्ति पूजिताः।
यथा नाट्यप्रयोगस्थैर्नित्यं तुष्यन्ति मंगलैः॥ ३७.२६

धर्मसिद्धयेऽपि नाट्यस्य महत्त्वं भरतेन विशदीकृतम्। तथा हि—

दानधर्मेषु सर्वेषु कीर्त्यते तु महत्फलम्।
प्रेक्षणीयप्रदानं हि सर्वदानेषु शस्यते॥ ३७.२८

तत्र नाट्यस्य महावैभवं भरतेन प्रमाणितम्—

महारसं महाभोगमुदात्तवचनान्वितम् ।

महापुरुष-संचारं साध्वाचारजनप्रियम् ।। ना० शा० १८.१४०

लोकानां विनयाधानं तु नाट्यस्यैकं प्रयोजनमिति रामचन्द्र-गुणचन्द्राभ्यां विशदीकृतम् –

दुर्मेधसां हि न्याय्ये वर्त्मनि वृत्त्यर्थं कवयोऽभिनेय प्रबन्धान् ग्रथ्नन्तीति ।

सुरुचिं सुसंस्कृतिं च पुरस्कर्तुकामा लोकाभ्युदयार्थमेव कवयः प्रमोद-निर्भरैर्वाक्यैर्नाटकानि विरचयन्तु इति भारतीयं विधानम्—

एवंविधं भवेद्यत्तत्तदङ्के न कारयेत् ।

पितापुत्रस्नुषाश्वश्रूदृश्यं यस्मात् नाटकम् ।

वाक्यैः सातिशयैः श्रव्यैर्मधुरैर्नातिनिष्ठुरैः ।

हितोपदेशसंयुक्तैस्तज्ज्ञः कुर्यात्तु नाटकम् ।।

अन्यच्च

लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम् ।

वेदाध्यात्मपदार्थेषु प्रायो नाट्यं प्रतिष्ठितम् ।।

वेदाध्यात्मोपपन्नं तु शब्दछन्दस्समन्वितम् ।

लोकसिद्धं भवेत्सिद्धं नाट्यं लोकात्मकं तथा ।।

ना० शा० २५.१२०-१२१

नाट्ये तु न केवलं नृत्त-नृत्य-लास्यादीनां वैशिष्ट्यमपितु नैकविधानां मनोरञ्जककलानां समवायोऽङ्गीक्रियते इति भरतेन समीहितम् । तथा हि

वाद्ये हि यत्नः प्रथमं तु कार्यः ।

शय्यां हि नाट्यस्य वदन्ति वाद्यम् ।।

वाद्ये च गीते च हि सुप्रयुक्ते ।

नाट्यप्रयोगे न विप्रतिपत्तिमेति ।। ना० शा० २४.३०४

अपरञ्चाहार्य-प्रयोगे चित्र-मूर्ति-वास्तु-गर्भाणां कलाकृतीनां सौन्दर्य-मद्वितीयमेव मनोरञ्जन-साधनं भवति ।

प्रयोक्तृणामपि गौरवेण नाट्यं भृशमतिशेते । तत्राभिनेतारोऽभिजाताः, आत्मगुणशालिनोऽभिरामाश्च भवन्तीति भरतेन निर्दिष्टम् । तथा हि,

सुशीला ज्ञानवन्तश्च तथा च प्रियदर्शनाः ।

कुमारराजभूमौ तु संयोज्याश्च नरोत्तमाः ।। ना० शा० ३५.११

गतिवागङ्गचेष्टाभिः सत्त्वशीलस्वभावतः ।
परीक्ष्य पात्रं तज्ज्ञस्तु युञ्ज्याद् भूमिनिवेशने ।। ३५.२

लोकवृद्धाश्रयकृतां सर्वप्रकृतिप्रचार-संयुक्ताम् ।
नानाश्रयां प्रकुरुते तथा च नारी तु सर्वत्र ।। ३५.२४

नाट्यस्य वैविध्यं वैचित्र्यं चास्योत्कर्षं शिखरयति । तत्र दशविधं रूपकमष्टादशविधमुपरूपकञ्च निर्दिष्टं शारदातनयेन—

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोग समवकारौ वीथ्यङ्केहामृगा इति ।।

तोटकं नाटिका गोष्ठी सल्लापः शिल्पकं तथा ।
डोम्बी श्रीगदितं भाणी प्रस्थानं काव्यमेव च ।।

प्रेक्षकं सट्टकं नाट्यं रासकं लासकं तथा ।
उल्लाप्यकञ्च हल्लीसमथ दुर्मल्लिकापि च ।
मल्लिका कल्पवल्ली च पारिजातकमित्यपि ।।

एवं रूपकोपरूपकैर्बहुविभ्रमञ्जरी सनाथा इयं नाट्य-लतिकानन्योत्कर्ष-शालिनी विलसति ।

२

नाट्यं नृत्यं नृत्तं च

नाट्यमिति प्रायशोऽभिनेयः काव्यबन्धः ।[१] नाट्यस्यापरपर्यायो रूपकं रूपं वा सुविदितः । रूप्यते प्रत्यक्षीक्रियते योऽर्थस्तद्वाचकत्वात् काव्यानि रूपाणि ।[२] रूपकाभिनये पात्रविशेषो रामादे रूपं गृहीत्वा रङ्गं प्रविशति ।[३] अयं नटो रामादीनां कृतीनामनुकरणमिव विदधाति ।[४] नटस्य व्यापारस्तु वस्तुतोऽनुकरणं नास्त्येव । पुरा वास्तविको रामः सीता-वियोगेऽरोदीत्, किन्तु रंगे नटो न रोदिति । स केवलं रोदनमिव कश्चिद् व्यापार-विशेषं नाटयति । दशरूपके धनञ्जयेन 'अवस्थानुकृतिर्नाट्यम्' इति प्रोक्तम् । तत्तु चिन्त्यमेव । यतो हि नाम

परचेष्टानुकरणाद् हासः समुपजायते ॥ ना० शा० ७.१०

तदेतद् विशदयन्नभिनवगुप्तेन प्रमाणीकृतम्—'तदिदमनुकीर्तनमनु व्यवसायविशेषो नाट्यापरपर्यायः नानुकार इति भ्रमितव्यम् । अनेन भाण्डेन राजपुत्रस्यान्यस्य वानुकृतेऽन्यादिबुद्धेरभावात् । तद्धि विकारणमिति प्रसिद्धं हासमात्रफलं मध्यस्थानाम् ।'[५]

---

१. अनभिनेयमपि रूपकं भवतीति नाट्यदर्पण-विवरणे ३.२ द्रष्टव्यम् ।

२. ना० शा० १८.१ अधिकृत्य भारती । दशरूपके तु 'रूपं दृश्यतयोच्यते' इति वचनमर्धसत्यमेवानन्त्यदोषात् । यतो हि नाम नात्र किञ्चिदपि नाट्य-वैशिष्ट्य-मधिकृतम् ।

३. यथा मुखादौ पद्मादेरारोपे रूपक-प्रथा ।
तथैव नायकारोपो नटे रूपकमुच्यते ॥ रसार्णवसुधाकरे ३.१
इत्यनेन 'रूपकं तत्समारोपात्' दशरूपकवचनं समर्थितम् ।

४. नटस्यानुकरणं न तु वास्तविकमपितु कृत्रिममेव ।

५. ना० शा० १.१०७ अधिकृत्य भारती ।

नाट्ये तु लोकस्वभावो वर्ण्यते, यथान्येषु काव्यबन्धेषु भवति।[१] अत्र लोकस्वभावे तु नायकादीनां वैयक्तिकं पौराणिकं वा चरित्रं नाममात्रमेवाङ्गीक्रियते। रामादीन् नायकान् समाश्रित्य यत्किञ्चिल्लोके सम्भावनीयं तत् सर्वं कल्पनया प्रतिभा-दृष्टमिव निबध्नाति कविः। इयमभिनवा कविसृष्टिः लोकस्वभावात्मिका रामादीनां समारोपेण नव्यमिव प्रतिभाति। काव्येषु रामादय उपलक्षणं लोकस्य।

अवस्थानुकृतिर्नाट्यमिति दशरूपकवचनेऽवस्था तु नायकादीनां कार्यविशेषाः सन्ति। दशरूपकेऽवस्थामधिकृत्य प्रोक्तम्—रुदितगीतहासासनादय अवस्थेति।[२]

नाट्यम्

दशरूपकानुसारम्

'अवस्थानुकृतिर्नाट्यम्'

अवस्थानुकृतिस्तु नृत्येऽपि भवति। नृत्याद् नाट्यं भिन्नमिति विशदयितुं धनञ्जयः प्राह—

(नाट्यं) रसाश्रयम्।

अन्यद् भावाश्रयं नृत्यम्।

प्रकरणेऽस्मिन् रसो भावश्च परिचेयौ। रसस्तु वाक्यार्थः, भावश्च पदार्थः। अत्र 'भावा स्थायिनो व्यभिचारिणश्चैव। तैरुपपन्नानि पदानि कथाखण्डानि भवन्ति'।[३] यत्राभिनये रसो निष्पद्यते, तत्र रूपकं भवति।

१. योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः।
सोऽङ्गाद्यभिनयैर्युक्तो नाट्यमित्यभिधीयते॥ ना० शा० १९.१४१
अवस्था या तु लोकस्य सुख-दुःख-समुद्भवा।
नानापुरुषसंचारा नाटकेऽसौ विधीयते॥ ना० शा० १९.१४२

२. दश० ४,३०

३. ना० शा० १८.१०४ अधिकृत्येदं प्रोक्तमभिनवगुप्तेन। वाक्याभिनयो भरतेन विशदीकृतोऽधोलिखितकारिकायाम्—
नानारसार्थं युक्तैर्वृत्तनिबन्धैः कृतः सचूर्णपदैः।
प्राकृत-संस्कृत-पाठो वाक्याभिनयो बुधैर्ज्ञेयः॥ ना० शा० १८.४४

यत्र कथाया अपूर्णत्वात् केवलं भावो निष्पद्यते, तत्र नृत्यं भवति ।[१]

नृत्तेऽभिनयो नास्ति । 'नृत्तं ताललयाश्रितम्' इति धनञ्जयेन दशरूपके प्रोक्तम् । तत्र ताललयानुसारं शरीरस्य विविधाङ्गानां संचालनं रमणीयं विधीयते ।

दीक्षितस्य यज्ञनारायणस्य रघुनाथ-विलास-नाटकस्य प्रस्तावनायां नाट्यनृत्यनृत्तानां भेदोऽधोनिर्दिष्टदिशा स्पष्टीकृतः—

आहार्याङ्गिक सात्त्विकवाचिकभेदाश्चतुर्विधाभिनयैः
वाक्य-पदार्थ-व्यञ्जकमिह नाट्यं नाटकीयमनुकरणम् ।
आहार्यव्यतिरिक्तैरपराभिनयैः पदार्थमात्रस्य
व्यञ्जकाभिमतं भूपाद्यनुकरणं नाटिकासु नृत्यम् ॥

आहार्यसात्त्विक - पराभिनयाप्तमङ्ग-
विक्षेपणेन च युतं विविधा यदाहु ।
तन्नृत्तमेतदपि ताण्डवलास्य-भेदाद्
द्वेधात्र लास्यनटने खलु ते प्रयोज्या ॥

दशरूपकानुसारं नृत्यस्यापरं नाम मार्गः, नृत्तस्य च नाम देशीति प्रसिद्धम् । मधुरं (सुकुमारं) नृत्यं नृत्तं च लास्यमिति प्रोच्यते । ते उद्धते ताण्डवमिति कथिते ।

'नृत्यं नृत्तं च स्वतन्त्रः काव्यबन्धो न स्तः' । इति दशरूपके धनञ्जयेन स्पष्टीकृतम् । ते केवलं रूपके परत उपयुज्येते नाट्यानुषंगिणी च स्तः ।[२]

१. भावसंश्रया इति रतिभावमात्रमभिनयन्ति' इति ना० शा० २२.६ अधिकृत्य भारती ।

२. नाट्यताण्डव-रूपेण नाटकाद्यप्रकारकमिति दशरूपके १.१० कारिका व्यनक्ति ।

कथावस्तु

३

इतिवृत्त-योजना

रूपकाणि दशविधानि सन्ति। तेषां भेदक-वैशिष्ट्यं वस्तु नेतारं रसं चाश्रित्य सम्भवति। प्रथमं तावत् वस्तु विविच्यते।

भरतानुसारं वस्तु, कार्यम्, इतिवृत्तं वा नाट्यशरीरमेव। तद् द्विविधं भवति— आधिकारिकम्, प्रासङ्गिकञ्च। यद् वृत्तमाश्रित्य फलं प्राप्यते तदाधिकारिकम्।[1] एतदेव धनञ्जयेन दशरूपकेऽपि प्रपञ्चितम्। तद्यथा

> अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।
> तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम्॥ १.१२

प्रासङ्गिकं वृत्तं तु भरतानुसारं नाट्यकथायामाधिकारिकमुपकुर्वाणमानुषङ्गिकं च भवति।[2] प्रासङ्गिकं वृत्तं द्विविधं भवति पताका प्रकरी च। शारदातनयस्तु भावप्रकाशने त्रिविधं प्रासङ्गिकं वृत्तं

१. (क) प्रकृतेऽङ्गिनस्तु फलं तु प्रधानफलमेव। रूपके नायकानामनेकफलानि सन्त्यपि। तेषु यद्विशिष्टफलमुत्कर्षेण विवक्षितं तत्प्रधानफलम्। ना० शा० १९.५ अधिकृत्य भारती।

(ख) इतिवृत्तं तु नाट्यस्य शरीरं परिकीर्तितम्। ना० शा० १९.१
इतिवृत्तं द्विधा चैव बुधस्तु परिकल्पयेत्।
आधिकारिकमेकं स्यात् प्रासंगिकमथापरम्॥ ना० शा० १९.२

यत्कार्यं हि फलप्राप्त्या सामर्थ्यात् परिकल्प्यते।
तदाधिकारिकं ज्ञेयमन्यत् प्रासंगिकं विदुः॥ ना० शा० १९.३

इतिमिदं कार्यमिति विवृण्वन्नभिनवगुप्तः प्राह प्रधानत्वेन सम्पाद्यं फलं यो ज्ञानेच्छाप्रयत्नक्रियात्मक आरम्भः तत्कार्यम्। ना० शा० १९.३ अधिकृत्य भारती। अन्येन पद्येन विशदीकृतम्—

कारणात् फलयोगस्य वृत्तं स्यादाधिकारिकम्॥ १९.४

२. तस्योपकरणार्थं तु कीर्त्यते ह्यानुषंगिकम्।

मन्यते ।[1] उभयविधं प्रासङ्गिकं वृत्तं (पताका प्रकरी च) परार्थेन सह स्वार्थस्य साधकमिति धनञ्जयः प्रतिपादयति ।[2] धनञ्जयस्येदं मतमभिनवभारतीं भारतीयं नाटयशास्त्रं च नानुवर्तत इत्यस्माकं प्रतिपाद्यम् ।

भरतानुसारं तु प्रासङ्गिकवृत्तेषु केवलं पताका-कोटिकं परार्थसाधकं स्वार्थसाधकं च भवति, न पुनः प्रकर्यास्तथात्वं विद्यते। प्रकरी तु केवलं परार्थायैव भवति । तद्यथा—

> यद्वृत्तं तु परार्थं स्यात् प्रधानस्योपकारकम् ।
> प्रधानवच्च कल्प्येत सा पताकेति कीर्तिता ।। ना० शा० १९.२४
>
> फलं प्रकल्प्यते यस्याः परार्थायैव केवलम् ।
> अनुबन्धविहीनत्वात् प्रकरीति विनिर्दिशेत् ।। (ना० शा० १९.२५)

एतां कारिकां विवृण्वन्नभिनवगुप्त आह यद्वृत्तं तु परार्थं स्यादिति । यस्य सम्बन्धिवृत्तं संविदनुसन्धानं परस्य प्रयोजनसम्पत्तये भवदपि स्वप्रयोजनं सम्पादयति । अत एवाह प्रधानवच्च कल्प्येतेति । सचेतनानुसन्धाना पताका सिद्धिप्रधानस्योपकारिणी । एवं सुग्रीव-विभीषण-प्रभृतिरपि रामादिनोपक्रियमाणं रामादेरात्मनश्चोपकाराय प्रभवमाणे प्रसिद्धि-प्राशस्त्ये सम्पादयतीति । फलं प्रकल्प्यते यस्या इति यतश्च तत परार्थमेव केवलं सर्वमनुतिष्ठति सा प्रकरी । ······ प्रकर्षेण स्वार्थानपेक्षया करोतीति ।

अपरं च प्रकरी तु भरतानुसारमनुबन्धविहीना भवति। अस्मिन् प्रकरणेऽनुबन्धस्य कोऽभिप्राय इत्यभिनवगुप्तेन परोक्षरीत्या पताका-सम्बन्धिकारिकां विवृण्वन् प्राह –'यस्य सम्बन्धिवृत्तं संविदनुसन्धानं परस्य प्रयोजनसम्पत्तये भवदपि स्वप्रयोजनं सम्पादयतीति' अत्र संविदेवानुबन्धो नाम— मदर्थं त्वमेतत्कुरु, त्वदर्थमहमेतत्करिष्यामीति ।[3] प्रकरीचरितेऽनुबन्धो न भवति । पताकाचरितेऽनुबन्धोऽवश्यम्भावी । यथा रामायणे राममुग्रीवयोः, विभीषणरामयोर्वा ।

---

१. शारदातनयस्तु प्रासंगिकं वृत्तं त्रिधा मन्यते—
   प्रासंगिकाभिधं वस्तु नाटके भवति त्रिधा ।
   पताका-प्रकरीयुक्त-पताकास्थानकक्रमात् ।। सप्तमाधिकारात्
२. प्रासंगिकं परार्थस्य स्वार्थो यस्य प्रसंगतः । दश० १.१३
३. संवित् स्त्रियां प्रतिज्ञायामाचारे ज्ञानसागरे ।
   सम्भाषणे क्रियाकारे संकेते नाम्नि तोषिणि ।। इति मेदिनी ७७.४२
   अत्र क्रियाकारः Agreement अर्थे M. Williams : Sanskrit-English Dictionary. इति

प्रकरी नाम यदनुबन्धविहीना वर्तते, तर्हि पताका वस्तुतः सानुबन्धे-त्यनुगम्यते। अत एव धनञ्जयो दशरूपके निरूपयति—

'सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्' इति।

अनया कारिकया स्पष्टः भवति यद् धनञ्जयमतेनानुबन्धस्तु विस्तार एव। इममर्थमूरीकृत्य धनिको कारिकां स्पष्टयति—

दूरं यदनुवर्तते प्रासङ्गिकं सा पताका। सुग्रीवादिवृत्तान्तवत्। यदल्पं सा प्रकरी।[1]

धनिक-धनञ्जययोरिदं मतं भारतीयं नाट्यशास्त्रं वाभिनवभारतीं वा न स्पृशतीति प्रतिभाति। धनञ्जयस्य प्रकरी-विवेचनं चिन्त्यमेव।

अपरे नाट्यशास्त्राचार्याः सागरनन्दी, महाराजो भोजः, शारदातनयः, रामचन्द्र-गुणचन्द्रौ, विश्वनाथः, सिंहभूपालश्चैतद्विषयके संशयाब्धौ उन्मज्जन-निमज्जन-प्रवणाः।

पताका प्रकरी चार्थप्रकृतौ परिगणितौ। अर्थप्रकृतयः पंच भवन्तीति भरतेन धनञ्जयेन च निर्दिष्टम्।

---

१. प्रकरी त्वनल्पापि भवति। तद्यथा कुन्दमालायामुत्तररामचरिते च वाल्मीकि-वृत्तम्।

४

अर्थप्रकृतयः

भरतानुसारं पंचार्थप्रकृतय इतिवृत्तसम्बद्धाः सन्ति—बीजं, बिन्दुः, पताका, प्रकरी कार्यञ्च[1]। एतेषु बीजं प्राथम्यं भजते। यथा कस्यचिद् वृक्षस्य फलं प्राप्तुं प्रथमं बीजमेवोप्यते, तथैव नाट्यवृक्षस्य फलार्थं बीजमुपक्षिप्यते। तत्र रूपकाणि बहुफलानीति प्रागेव प्रतिपादितम्। तेषु प्रधानफलस्य महाबीजं भवति। अन्येषां फलानां कृतेऽवान्तरबीजानि सन्ति। अवान्तरबीजं तु बिन्दुर्भवति।

बीजम्

भरतेन बीजं परिभाषितम्—

> स्वल्पमात्रं समुत्सृष्टं बहुधा यद्विसर्पति
>
> फलावसानं यच्चैव बीजं तत्परिकीर्तितम् ॥ ना० शा० १९.२२

'तत् (बीजं) क्वचिदुपाय-मात्रं क्वचित् फलमात्रं क्वचिद् द्वयमिति, भारत्यामभिनवगुप्तेन प्रपञ्चितम्। तदनुसारं बीजफलयोरविनाभाव—

---

१. पताका, प्रकरी चेतिवृत्तयोजना'-नामक अध्याये प्रागेव वर्णिते।

किमिदमर्थप्रकृतिर्नाम ? अस्मिन् विषये बहुविकल्पाः सन्ति। भरतेन धनञ्जयेन चार्थप्रकृतिर्न परिभाषिता। अभिनवगुप्तेन भारत्यामर्थप्रकृतिः परिभाषिता—'यत्रार्थः फलं तस्य प्रकृतय उपाया फलहेतवः' इति ना० शा० १९.२० अधिकृत्य। अभिनवगुप्तोऽर्थप्रकृतेरन्यसम्मतां परिभाषां निर्दिशति—अर्थस्य समस्तरूपकवाच्यस्य प्रकृतयः प्रकरणानि अवयवार्थखण्डा इत्यर्थप्रकृतयः। अन्येषामेतन्मतं बहुभिराचार्यैः स्वीकृतम्। तद्यथा

(क) अर्थ प्रकृतयः पंच कथादेहस्य हेतवः।

शृङ्गारप्रकाशे द्वितीयभागे पृ० ४८२

भावप्रकाशने च पृष्ठ २०४

(ख) नाटकीयवस्तुनः पञ्च प्रकृतयः स्वभावा भवन्ति। नैतान् परित्यज्य नाटकार्याः सम्भवन्ति। नाटकलक्षणरत्नकोशे ६.१

(ग) पाञ्चविध्यात् कथावस्तु प्रकृतिः। पञ्चधा स्मृता नाटकचन्द्रिका।

सम्बन्धो भवति ।[१] तत्र चक्रवर्तिपुत्रलाभो मुनिजनाशीर्वचनद्वारेण फलस्वभावस्यैवाभिज्ञानशाकुन्तले । अन्यत्र बीजमुपायमात्रं भवेत् ।[२]

दशरूपके बीजस्य संक्षिप्तलक्षणं भारतीयं नाट्यशास्त्रमनुसरति । तथा हि –

स्वल्पोद्दिष्टस्तु तद् हेतुर्बीजं विस्तार्यनेकधा । १·१७

विन्दुस्तु अवान्तरबीजम् । यदा नाट्यकथायां कार्यमेकं समाप्यते, तदा परवर्तिकार्यस्य सङ्केतो विन्दुना भवति । एतदेव भरतेन स्पष्टीकृतम्—

प्रयोजनानां विच्छेदे यदविच्छेद-कारणम् ।
यावत्समाप्तिर्बन्धस्य स बिन्दुः परिकीर्तितः ॥ १९·२३

बीजस्य विन्दोश्च विस्तार-परिधिरभिनवगुप्तेन प्रदर्शितः । तदनुसारं बीजं च मुखसन्धेरेव प्रवर्त्यात्मानमुन्मेषयति, विन्दुस्तदनन्तरमिति विशेषोऽनयोः । द्वे अपि तु समस्तेतिवृत्त-व्यापके ।[३]

बीजाधानात्पूर्वमपि नाट्यकथाया भूमिका-भागो प्रायशो वर्तते । तद् हि यथा कृषिकर्मणि बीजवपनात् पूर्वं बीजस्याङ्कुरणाय वर्धनाय च भूमिः निर्मीयते, तथैव बीजन्यासाय कथाभूमिका स्यात् ।

विन्दुः

प्रत्येकाङ्कस्यान्तिमेंऽशे विन्दुना भवितव्यम्, यतो हि नामाङ्कान्तेऽवान्तर कार्यसमापने कथा विच्छिद्यते । तर्हि परवर्तिकार्यस्य कथानुसन्धानं विन्दुद्वारेण भवति । अन्यत्रापि विन्दुः कथां प्रवर्तयति ।

विन्दुर्यत्सूत्ररूपेण निगद्यते, तदेव प्रवेशके विष्कम्भके वा सविस्तरं प्रपञ्च्यते'[४] इति विशदयन् भरतः प्राह –

---

१. फलमपि च भविष्यदुपायाविनाभावाद् बीजमित्युच्यते । ना० शा० १९·२२ अधिकृत्य भारती ।

२. तच्च (बीजं) क्वचिदुपायमात्रं क्वचित्फलमात्रं क्वचिद् द्वयम् । ना० शा० १९·२२ अधिकृत्य भारती ।

३. ना० शा० १९·२३ अधिकृत्य भारती ।

४. प्रत्यङ्कान्तं यो बिन्दुः अनुसन्धानाभिधायिवाक्यं, यत् संक्षिप्तं प्रयोजनं तदधिकृताकरणं विस्तारमुद्दिश्य प्रकरणे नाटके चावश्यं प्रवेशकः । ना० शा० १९·३२ अधिकृत्य भारती ।

अङ्कान्तरानुसारी संक्षेपार्थमधिकृत्य बिन्दूनाम् ।
प्रकरण-नाटकविषये प्रवेशकः संविधातव्यः ॥ १८.३३

अपरं च — इतिवृत्तस्य बिन्दुसूत्रस्यूतस्य यदा प्रारम्भावस्था पूर्णत्वमेति तदाङ्कच्छेदो बिन्दुद्वारानुसन्धीयमानद्वितीयाङ्काभिधेयरूपो विधेयः ।[1]

एतत्सर्वं संक्षेपेण धनञ्जयो दशरूपके प्राह—

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् । १.१७

धनञ्जयस्तु नाट्यकथायामाद्यन्तव्यापिनं बिन्दुं यत्नावस्थायामेव निवेशयतीति अभारतीयं मतं चिन्त्यमेव । कथाशरीरे सर्वासामवस्थानामन्ते बिन्दुना तु भवितव्यमेव ।

कार्यम्

भरतानुसारं कार्यस्याधोलिखिता परिभाषा युज्येत ।

यदाधिकारिकं वस्तु सम्यक् प्राज्ञैः प्रयुज्यते ।
तदर्थो यः समारम्भस्तत्कार्यं परिकीर्तितम् ॥ १९.२६

एतां कारिकां विवृण्वन्नभिनवगुप्तः प्राह—

'प्राज्ञैः प्रधाननायक-पताकानायक-प्रकरीनायकैश्चेतनरूपैः यद्वस्तु फलरूपं प्रयुज्यते सम्पाद्यते, सम्पाद्यत्वेनानुसन्धीयते, तत्फलप्रयोजनो यः सम्पूर्णतादायी पूर्वपरिगृहीतस्य प्रधानस्य बीजाख्योपायस्य फलम् आरभते इत्यारम्भशब्दवाच्यो द्रव्य-क्रिया-गुण-प्रभृतिः सर्वोऽर्थः (यस्य) सहकारी (तत्) कार्यमित्युच्यते । चेतनैः कार्यते फलमिति व्युत्पत्त्या । सम्यगिति प्रभुमन्त्रोत्साह-शक्तित्रय-सम्पन्नैरित्यर्थः । तेन जनपद-कोश-दुर्गादिक-व्यापार-वैचित्र्यं-सामाद्युपाय-वर्ग इत्येतत् सर्वं कार्येऽन्तर्भवति । तत्र परं प्रथमंपरिगृहीतः प्रधानभूतोऽभ्युपायो बीजत्वेनोक्तः । '[2]

अन्यत्रापि कार्यस्येदृशी विवृतिर्भरतेनाभिनवगुप्तेन च कृता । तथा हि—कार्यं तु यदाधिकारिकमित्यादि तस्याः पञ्चाङ्गस्यानुष्ठानम् । तद्यथा, कर्मणामारम्भोपायः, पुरुष-द्रव्य-सम्पद्देश-काल-विभागः, विनिपात-प्रकारः, कार्यसिद्धिरिति ।[3]

१. ना० शा० १८.१३ अधिकृत्य भारती ।
२. अभिनवभारती तृतीयभागे १६ पृष्ठे ।
३. अभिनवभारती द्वितीयभागे ४२५ पृष्ठे ।

अन्यच्च—

यत्कार्यं हि फलप्राप्त्या सामर्थ्यात् परिकल्प्यते ।
तदाधिकारिकं ज्ञेयमन्यत् प्रासङ्गिकं विदुः ॥

(ना० शा० १६.३)

इति विवृण्वन्नभिनवगुप्तः समर्थयति—

'प्रधानत्वेन सम्पाद्ये फले यो ज्ञानेच्छाप्रयत्नक्रिया-लक्षण आरम्भः तत्कार्यमिति ।

भरतेनान्यत्रापि बहुशः कार्यशब्दः समारम्भार्थमभिलक्ष्य प्रयुक्तः । तथा हि—

कालोत्थानगतिरसो व्याख्यासंरम्भकार्यविषयाणाम् ।
अर्थाभिधानयुक्तः प्रवेशकः स्यादनेकार्थः ॥

(ना० शा० १८.३५)

बह्वाश्रयमपि कार्यं प्रवेशकैः संक्षिपेच्च सन्धिषु वा ।
बहुचूर्णपदैर्युक्तं जनयति खेदं प्रयोगस्य ॥

(ना० शा० १८.३६)

अस्यावस्थोपेतं कार्यं प्रसमीक्ष्य बिन्दुविस्तारात् ।
कर्तव्योऽङ्कः सोऽपि तु गुणान्वितं नाट्यतत्त्वज्ञैः ॥

(ना० शा० १८.१३)

एकदिवसप्रवृत्तं कार्यस्त्वङ्कोऽर्थबीजमधिकृत्य ।
आवश्यककार्याणामविरोधेन प्रयोगेषु ॥

(ना० शा० १८.२१)

एकाङ्केन कदाचिद् बहूनि कार्याणि योजयेद् धीमान् ।
आवश्यकाविरोधेन तत्र कार्याणि कार्याणि ॥

(ना० शा० १८.२२)

रङ्गं तु ये प्रविष्टाः सर्वेषां भवति तत्र निष्क्रामः ।
बीजार्थयुक्तियुक्तं कृत्वा कार्यं यथारसम् ॥

(ना० शा० १८.२३)

सर्वस्यैव हि कार्यस्य प्रारब्धस्य फलार्थिभिः ।
एतास्त्वनुक्रमेणैव पञ्चावस्था भवन्ति हि ॥

(ना० शा० १६.१४)

अर्थप्रकृतीनां फलहेतुता तु किमतःपरं स्पष्टतरं भवेत् यतो हि नाम भरतः कथयति—

आसां स्वभावभिन्नानां परस्परसमागमात् ।
विन्यास एकभावेन फलहेतुः प्रकीर्तितः ॥

(ना० शा० १९.१५)

यद्यासामर्थप्रकृतीनां विन्यासः फलहेतुरस्ति, तर्हि तासु अन्यतमं कार्यमिति कथं नाम फलं स्यात् ।

अतः परं विरुद्धमेव धनञ्जयस्य दशरूपक उद्धृतं मतं समीक्ष्यते। अर्थप्रकृति-प्रकरणे धनञ्जय-धनिकयोर्वचनं विद्यते—

'तस्येतिवृत्तस्य किं फलमित्याह—

कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च ॥ (द० रू० १.१६)

धर्मार्थकामाः फलम् तच्च शुद्धमेकैकानुबन्धं द्व्यनुबन्धं वा ।

एतदनुसृत्यार्थप्रकृतिं विवृण्वन् धनिको ब्रूते—

'अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः'

अस्यां स्थितौ दशरूपकावलोके विसंवादो लक्ष्यते, यत् कथं नाम प्रयोजनसिद्धिहेतुषु अर्थप्रकृतिषु फलरूपं कार्यमन्तर्भवति ? यद्येवं स्यात् तर्हि फलस्य फलहेतोश्चैकात्म्यं जायेतेति चिन्त्यम् ।

अन्येऽपि बहवो नाट्याचार्या धनञ्जयमतमेव समर्थयन्ति। तथा हि—

कथाशरीरव्यापिन्यां नायकसहायादि-क्रियायामुपलभ्यमान प्रधान-सम्बन्धी प्रारम्भफलविशेषः कार्यमित्युच्यते । धर्मार्थकामानामन्यतमं हि पुरुषार्थं कार्यमित्यामनन्ति । तदाह भोजः—

यदाधिकारिकं वस्तु सम्यक्प्राज्ञैः प्रयुज्यते ।
यदर्थश्च समारम्भस्तत् कार्यमिति कीर्तितम् ॥

कार्यस्योदाहरणम्—

मीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्त्येकहेतुः प्रिया ।
देवी प्रीतिमुपागता च भगिनी लाभाज्जिताः कोसलाः
किं नास्ति त्वयि सत्यमात्यवृषभे यस्मिन् करोमि स्पृहाम् ॥

कार्यार्थं च दैवपौरुषप्राधान्यमभ्यासते ।[1]

१. शृङ्गारप्रकाशे ४८३-४८४ पृष्ठे ।

अन्यत्रापि

यदर्थं काव्यस्यारम्भः सिद्धे यस्मिन् समापनम् ।
आनुषङ्गिकसम्पन्नं तत्कार्यमिति कथ्यते ॥[1]
फलं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च ।
फलं यदिति वृत्तस्य स त्रिवर्ग इतीरितः ॥
साध्यत्वादेव कार्यस्य सर्वान्ते तत्प्रयोजयेत् ॥[2]
अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ।
समापनं तु यत्सिद्ध्यै तत्कार्यमिति सम्मतम् ॥[3]
कार्यस्य कारणं प्राज्ञैस्तद्बीजमिति कथ्यते ।
वस्तुनस्तु मतं तस्य धर्मकामार्थलक्षणम् ॥
फलं कार्यमिदं शुद्धं मिश्रं वा कल्पयेत् सुधीः ।[4]

परवर्तिनाट्याचार्येषु केवलं रामचन्द्रो नाट्यदर्पणे नाट्यशास्त्रमभिनवभारतीं चानुसृत्यार्थप्रकृतिं कार्यं च विवृतवान् । सोऽर्थप्रकृतिस्थाने उपाय इति पदं प्रयुक्तवान् । अनन्तरं स उपायान् व्याख्यानि स्म—

बीजं पताका प्रकरी बिन्दुः कार्यं यथारुचि ।
फलस्य हेतवः पञ्च चेतनाचेतनात्मकाः ॥१.२८

स कार्यं विवृणोति—

साध्ये बीजसहकारी कार्यम् ।

प्रधाननायक-पताकानायक-प्रकरीनायकैः प्रधानफलत्वेनाभिप्रेते बीजस्य प्रारम्भावस्थोत्क्षिप्तस्य प्रधानोपायस्य सहकारी सम्पूर्णतादायी सैन्यकोश-दुर्ग-सामाद्युपायलक्षणो द्रव्य-गुण-क्रिया-प्रभृतिः सर्वोऽर्थः कार्यम् ।

कार्यं तु फलमिति भ्रान्तेः कुतस्त्यं नातिगूढम् । प्रथमं तावत् तत्सम्बन्धि-नाट्यशास्त्रीयकारिकायाः पाठभेद एव भ्रान्तेः कारणम् । अभिनवगुप्तेनाद्यो-ल्लिखिता कारिका कार्यलक्षणं प्रतिपादयितुं मुख्यतः प्रथिता—

यदाधिकारिकं वस्तु सम्यक् प्राज्ञैः प्रयुज्यते ।
तदर्थो यः समारम्भस्तत्कार्यं परिकीर्तितम् ॥ १९.२६

अस्याः कारिकायाः पाठभेदेनाद्योल्लिखितं रूपं मूलाद्विवर्तते—

---

१. सागरनन्दी नाटक-लक्षण-रत्नकोशे १.२७ ।
२. शारदातनयः भावप्रकाशने २०५ पृष्ठे ।
३. विश्वनाथः साहित्यदर्पणे ६.६८ ।
४. सिंहभूपालः रसार्णव-सुधाकरे ३.१८ ।

यदाधिकारिकं वस्तु सम्यक् प्राज्ञैः प्रयुज्यते ।
तदर्थस्य समारम्भः तत्कार्यमिति कीर्तितम् ॥[१]

कार्यस्याभिप्रायः फलमित्यभिनवगुप्तेनापि क्वचित् प्रसङ्गानुसारं व्याख्यातम् ।[२]

इदं विपरिवर्तितं रूपं प्रमाणीकृत्य धनञ्जयादिभिः कार्यमेव फलमिति प्रतिपादितं स्यात् ।

अभिनवगुप्तात् प्रागपि नाट्यशास्त्रस्य बहवः टीकाकारा बभूवुः । तेषां मतानि सम्परीक्ष्य सोऽभिनवभारतीमिति नाट्यशास्त्रीयमाकर-ग्रन्थं विरचयामास । तस्य ग्रन्थस्य प्रचारः कश्मीरं विहाय शेषे भारते तावन्मात्रं नाभवत्, यावन्मात्रं दशरूपकस्य प्रचारोऽभवत् । अतएव गड्डरिकाप्रवाहेण तत्रत्या नाट्यशास्त्राचार्या दशरूपकावलोकमनुसरन्ति स्म ।[३]

अर्थप्रकृति-विषयकाः कतिपयप्रश्नाः समाधानमर्हन्ति । प्रथमं तावत् यदि नाम प्रासंगिकं वृत्तं (पताका प्रकरी च) अर्थप्रवृत्तेरङ्गभूतं तर्हि आधिकारिकं वृत्तं कथं नार्थप्रकृतौ परिगणितम् । अपरं च बीजं, बिन्दुः, पताकास्थानकं चेति त्रयं सूक्ष्मं समाश्रित्य परवर्तिकथा वितन्यते । एतेषां प्रथमं द्वयमेवार्थप्रकृतौ परिगणितौ, न तु पताकास्थानकम् । कार्यस्यार्थप्रकृतावस्थानं नाभीष्टं यतो हि नाम कार्यं पताका-प्रकरीषु सर्वत्र प्रसरत्येव । नेदं किञ्चित् पृथक् तत्त्वम् ।

कदाचिदर्थप्रकृतेर्विसंवादं समीक्ष्य कीथ-महाभागेन सम्यगनुशासितम्—

The classification of elements of the plot is perhaps superfluous.[४]

---

१. मूलाद्भिन्नोऽयं पाठो नाट्यशास्त्रस्य कार्यविषयकमन्यत्र प्रतिपादितं मतं नानुबध्नाति । अस्मिन् प्रसंगे द्रष्टव्याधोलिखिता कारिका—

आसां स्वभावभिन्नानां परस्परसमागमात् ।
विन्यास एकभावेन फलहेतुः प्रकीर्तितः ॥ ना० शा० १९.१५

२. ना० शा० १९.९४ अधिकृत्याभिनवगुप्तो व्याख्याति – बीजकार्योपगमनमादानमिति बीजफलस्य समीपताभवनमित्यर्थ इति ।

३. एतदेव समर्थितं कीथ-महाभागेन । तद्यथा—

It was inevitable that the complicated and confused work of Bharata should be superseded for many purposes by something more accessible and cosy to follow and this need was supplied by the Daśarūpaka of Dhananjaya. The Sanskrit Drama p. 272.

४. Sanskrit Drama p. 299.

५

पताका-स्थानकम्

पताकावृत्तं प्रधाननायकस्य फलप्राप्तौ आनुकूल्यं साधयति। तत्र च पताकानायकस्य बहुतरेतिवृत्ते व्यापकता भवति। पताकास्थानकेऽपि तादृशं किञ्चिद् वृत्तं भवति येन प्रधाननायकस्य फलप्राप्तौ आनुकूल्यं जायते, किन्तु अस्य तु परिमितेतिवृत्तव्यापकत्वम्। पताकानायकः कश्चित् पुरुषविशेषः प्रधाननायकस्य साह्यमाचरति।[1] पताकास्थानकस्य नास्ति कश्चिदपरो-नायकः। पताका प्रासंगिककथा भवति, पताका-स्थानकं तु वृत्तमात्रमेव।

चतुर्विधं पताकास्थानकं भवतीति भारतीयं मतम्। तेषां सर्वेषां सामान्यं लक्षणमभिनवगुप्तो भरतमनुसृत्य व्याख्याति—अर्थः प्रयोजनमुपायश्च कर्मकरण-व्युत्पत्त्या, अन्यस्मिन्नुपाये प्रयोजने वा चिन्तिते अन्य उपायान्तर-प्रयोजनान्तरलक्षणः प्रकर्षेण युज्यते सम्बध्यते यत्रेति तत्पताकास्थानकम्। पताकास्थानकं तु मुख्यमर्थं विचित्रयति।[2]

प्रथमे पताकास्थानके घटितं वृत्तं सहसा समायाति मूलप्रयोजनस्य चोत्कृष्टं सत् भृशं साधकं स्यात्[3]। अस्योदाहरणमभिनवगुप्तो निर्दिशति—यथा रत्नावल्यां सागरिकायां पाशावलम्बन-प्रवृत्तायां वासवदत्तेयमिति मन्य-मानो यदा राजा पाशं मुञ्चति तदा तदुक्त्या 'सागरिकां प्रत्यभिज्ञाय—हा कथं मे प्रिया सागरिका! अलमलमतिमात्रमित्यादि।' इदं प्रयोजनस्योदाहर-णम्। अन्यस्मिन्नुपाये चिन्तिते सहसोपायान्तरप्राप्तिर्नागानन्दे वर्तते। तत्र जीमूतवाहनस्य शंखचूडाप्राप्तवध्यपटस्य कञ्चुकिना वासोयुगलार्पणम्।

---

१. तेन सहकारित्वसामान्यात् तत्समार्थाचरणलक्षणात् [पताकास्थानकस्य] पताका-सादृश्यमिति यावत्। ना० शा० १८.३० अधिकृत्य।

२. यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकं तु तत्॥ ना० शा० १९.३०

३. सहसैवार्थसम्पत्तिर्गुणवत्युपकारतः।
पताकास्थानकमिदं प्रथमं परिकीर्तितम्॥ ना० शा० १९.३१

द्वितीये पताकास्थानकेऽतिशयोक्त्यलंकारमवलम्ब्य संश्लिष्टं यत्कथ्यते, तद्वचनमात्रमपि मूलप्रयोजनं सहकारित्वेन प्रवर्तयति ।[१] तस्योदाहरणं रामाभ्युदयस्य तृतीयाङ्के विद्यते सीतां प्रति सुग्रीवस्य संदेशोक्तिः—

बहुमान विमुक्तेन पारेऽपि जलधेः स्थिताम् ।
अचिरादेव देवि त्वामाहरिष्यति राघवः ।।

तृतीये पताकास्थानके किञ्चिद् भाविवृत्तं सूच्यं भवति न तु स्पष्टरूपेण, किन्तु अस्फुटरूपेण । अत्र कस्यचित् पात्रस्य वचनं पूर्वपात्रस्य वक्तव्येन श्लिष्टीकरणमावश्यकं स्यात् ।[२] यथा मुद्राराक्षसे ।

चाणक्यः—'अपि नाम राक्षसो दुरात्मा गृह्येत ।'
(प्रविश्य) सिद्धार्थकः—'अअं गण्हिदो ।'

इत्येतत् प्रत्युत्तरं सन्देशाशयेन प्रयुक्तमौचित्याद्विशेष निश्चयं करोति ।

चतुर्थे पताकास्थानके द्व्यर्थको वचनविन्यासो वर्तते । तत्र प्रासंगिकः प्रथमोऽर्थो भवति । श्लेषेण द्वितीयोऽर्थो भाविकर्तव्यविधानं प्रकटयति ।[३] यथा,

'प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते ।।

इत्यत्र हि काव्यरूपताशयेन श्लेषः प्रयुक्तः प्रधानवस्त्वन्तरं सागरिकागतमुत्क्षिपति— अअं सो राआ उदयणो जस्स अहं तादेण दिण्णा ।[४]

---

१ अथः सातिशयं श्लिष्टं काव्यबन्धसमाश्रयम् ।
पताकास्थानकमिदं द्वितीयं परिकीर्तितम् ।। ना० शा० १९.३२

२. अर्थोपक्षेपणं यत्र लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमिष्यते ।। ना० शा० १९.३३

३. द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
उपन्यासस्सुयुक्तश्च तच्चतुर्थमुदाहृतम् ।।

४. ना० शा० १९.३४ अधिकृत्य भारती । चतुर्थपताकास्थानकमधिकृत्य दशरूपकावलोके धनिकेन 'उद्दामोत्कलिका' मित्यादि तुल्यविशेषणात्मक-पताकास्थानकस्योदाहरणं प्रकटितम् । तत्तु चिन्त्यम् । अभिनवगुप्तानुसारं तत्तु नोदाहरणम् । द्व्यर्थता प्रतिपत्तावपि हि नानार्थेन सहकारिता कुत्रचिदाचरिता । तस्मादेतद् दीप्यन्नस्य व्याहारस्यैवोदाहरणम् ।

ना० शा० १९.३४ अधिकृत्य अभिनवभारती

दशरूपके तु द्विविधमेव पताकास्थानकं सम्मतम्। तत्र भारतीयं प्रथमपताकास्थानकद्वयं न गृहीतम्। दशरूपके धनञ्जयोऽन्योक्तिद्वारेण सूच्य-विधानमावश्यकं मनुते। नैतदावश्यकं भारतीयेषु पताकास्थानकेषु। दशरूपकस्य द्विविधं पताकास्थानकं भरतस्य चतुर्थ एव पताका स्थानकेऽन्त-र्भवति। पताकास्थानक प्रपञ्चे दशरूपकस्य भारतीय-नाट्यशास्त्रातिक्रम-स्त्रुटिरेव।

१. प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकम्। पताकास्थानकं तुल्यसंविधान-विशेषणम्।
द० रू० १.१४

६

कथावस्तु-प्रकारः

भारतीये नाट्यशास्त्रे चतुर्विधं कथावस्तु वर्णितम्। तद्यथा—प्रख्यातम्, औत्पत्तिकम्, अनार्षम्, आहार्यञ्चेति। एतेषु प्रख्यातमनार्षमाहार्यञ्च पूर्वपरिचितं कथानकं स्वीकुर्वन्ति। औत्पत्तिकं वस्तु नाट्यकविना सर्वथा कल्पितं भवति।

भरतादिभिर्नाट्याचार्यैः प्रख्यातवस्तु इतिहासादेर्गृहीतमिति स्पष्टीकृतम्। तत्र नाटके वस्तु प्रख्यातं भवति, प्रकरणे चानार्षमाहार्यमौत्पत्तिकं च वस्तु वर्तते।[1] एतदधिकृत्याभिनवगुप्तेन व्याख्यातम्—प्रख्याते भारतादौ यद्वस्तु तद्विषयोऽस्य।[2] इतिहासादौ पुराणानि अपि अभिनवगुप्तेन स्वीकृतानि।[3]

औत्पत्तिकं तु सर्वथा समुत्पाद्यं वस्तु भवत्येव। अनार्षमिति पुराणादिव्यतिरिक्तबृहत्कथाद्युपनिबद्धं मूलचरितादि। आहार्यमितिपूर्वकविकाव्यादाहरणीयं समुद्रदत्तचेष्टितादि।[4]

वैदिकसाहित्य उपनिबद्धं कथानकं प्रख्यातमस्ति न वेति विचारणायामभिनवगुप्तेनाधोलिखितं निर्देशनं प्रमाणम्—

'अनार्षमिति पुराणादिव्यतिरिक्तबृहत्कथाद्युपनिबद्धम्' इत्यनेन सर्वमार्षं साहित्यं प्रख्यातमिति सम्भाव्यते।

दशरूपके धनञ्जयस्तु आहार्यमनार्षं च कथावस्तु न स्वीकुरुते। तदनुसारं तु वस्तु त्रेधा भवति—प्रख्यातम्, उत्पाद्यम्, मिश्रञ्चेति। प्रख्यातमुत्पाद्यं च भारतीयं सुसम्मतञ्च, किन्तु मिश्रं नाम वस्तु भरतो न निर्दिशति। वस्तुतो मिश्रवस्तुनः कल्पना अभारतीया।

1. ना० शा० १८.१०, ४५, ४६
2. प्रख्याते भारतादौ। तेनेतिहासाद्भिःमात्रवस्तु-विषयकं नाटकम्।
ना० शा० १८.१० अधिकृत्य भारती
3. ना० शा० १८.१२ अधिकृत्य भारती
4. ना० शा० १८.४५, ४६ अधिकृत्य भारती

धनञ्जयानुसारं प्रख्यातस्य उत्पाद्यस्य च सङ्करात् मिश्रं वस्तु भवति।[१] दशरूपके ईहामृगे मिश्रं वस्तु निर्दिष्टम्। तद्यथा,

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिमत्। दश० ३.७२

भारतीये नाट्यशास्त्र ईहामृगे मिश्रं वस्तु न निर्दिष्टम्। तदनुसारं तु कस्मिंश्चिदपि रूपके मिश्रं वस्तु न भवति।

मिश्रवस्तु प्रकल्पनेऽपरोऽयं विसंवादो विचारणीयो यत् नाटके प्रख्यातं वस्तु भवतीति भरतस्य धनञ्जयस्य च सम्मतम्। किन्तु प्रायशः सर्वेषां नाटकानां कथावस्तुनि क्वचित्क्वचिदुत्पाद्यकथांशः सम्यग्विलसति। तद्यथा, अभिज्ञान-शाकुन्तले षष्ठसप्तमाङ्कयोः कथा कविकल्पितास्तीति निर्विवादम्। अस्मिन्नुत्पाद्ये कथांशे सत्यपि अस्य नाटकस्य कथावस्तु प्रख्यातमेव मन्यते। न प्रख्यातोत्पाद्यमिश्रणेन कथाया मिश्रता कल्पनीया। यदि नाम मिश्रं वस्तु स्वीक्रियेत, तर्हि सर्वेषां नाटकानां कथावस्तु मिश्रं भवेदिति महती विप्रतिपत्तिः।

अत एव धनञ्जयस्य मिश्रवस्तुकल्पना चिन्त्यैव। यथा प्रख्याते तथैवाहार्ये अनार्षे च वस्तुनि कविरात्मशक्त्योत्पाद्यांशं योजयित्वाधिकावापं प्रकरोति।[२]

भोजस्तु पञ्चविधं वस्तु मनुते। तद्यथा—इतिहासाश्रयम्, कथाश्रयम्, उत्पाद्यम्, अनुत्पाद्यम्, प्रतिसंस्कार्यं च। एतेषु इतिहासाश्रयं कथाश्रयं, उत्पाद्यञ्च भरतस्य क्रमशः प्रख्यातम्, अनार्षम्, औत्पत्तिकञ्च सन्ति। अनुत्पाद्यं तु भूतकालिक-वर्तमानराजानां चरितमेव। प्रतिसंस्कार्यं तु परिष्कृतमैतिहासिकं कथानकमस्ति।[३] प्रतिसंस्कार्यं तु भरतस्य प्रख्यातवृत्ताद् भिन्नं नास्ति, यतो हि नाम प्रख्यातं वृत्तं नाट्ययोजनायामवश्यमेव प्रतिसंस्क्रियत एव। भोजस्य कथायाः पाञ्चविध्ययोजनायां मिश्रं नाम कथावस्तु न स्वीकृतम्।

---

१. प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधापि तत् त्रिधा।
प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्।
मिश्रं च संकरात् ताभ्यां दिव्यमर्त्यादिभेदतः॥

२. ना० शा० १८.४६ अधिकृत्य भारती।

३. इतिहासाश्रयं, कथाश्रयमुत्पाद्येतिवृत्तमनुत्पाद्येतिवृत्तं प्रतिसंस्कार्येतिवृत्तमिति पंच प्रबन्धशरीराणि।…… अनुत्पाद्येतिवृत्तमित्यनेन यथावगतवर्तमानातीत-महाराजादिवृत्तवर्णनम्। यथा हर्षवर्धनराज्यवर्धनादीनां च वर्णनं हर्षचरिते। इत्यादि शृंगारप्रकाशे द्वादशप्रकाशे पृष्ठम् ४८१

७

कार्यावस्थाः

रूपकेषु आधिकारिकस्य कार्यस्येतिवृत्तस्य वा पंचावस्था भरतेन प्रमाणिताः—

> इतिवृत्तं समाख्यातं प्रथमेवाधिकारिकम् ।
> तदारम्भादि कर्तव्यं फलान्तं च यथा भवेत् ॥ १९.१६
>
> संसाध्ये फलयोगे तु व्यापारः कारकस्य यः ।
> तस्यानुपूर्व्या विज्ञेयाः पञ्चावस्थाः प्रयोक्तृभिः ॥ १९.७
>
> सर्वस्यैव हि कार्यस्य प्रारब्धस्य फलार्थिभिः ।
> एतास्त्वनुक्रमेणैव पञ्चावस्था भवन्ति हि ॥ १९.१८

आरम्भः

पञ्चावस्था आरम्भः, यत्नः, प्राप्तिसम्भवः, नियताप्तिः, फलागमश्च सन्ति । एतासां कृते क्वचित् मानसिको व्यापारः, क्वचिच्छारीरिको व्यापारः, क्वचिदुभयविधो व्यापारोऽपेक्ष्यते । तथा हि आरम्भावस्थायामौत्सुक्यमात्रं मानसिकव्यापारोऽस्ति—

> औत्सुक्यमात्रबन्धस्तु यद्बीजस्य निबध्यते ।
> महतः फलयोगस्य स खल्वारम्भ इष्यते ॥ (ना० शा० १९.९)

यथाभिज्ञान-शाकुन्तले नायको दुष्यन्तः शकुन्तलां समीहते । इदमौत्सुक्यं न केवलं प्रधाननायकस्य, अमात्यस्य, नायिकायाः, प्रतिनायकस्य, दैवस्य वा स्यादिति अभिनवगुप्तेन विशदीकृतम् ।[1] एतेषां कस्यचिदेकस्यौत्सुक्यं हृदयनिरूढं भवति, इतरेषां च शारीरिकव्यापाराः फलेतरदिशि सन्त्येव । यथा अभिज्ञानशाकुन्तले सखीनां वृक्षसेचनादि कार्याणि सन्ति ।

दशरूपके धनञ्जयेनारम्भस्य लक्षणं विहितम्—

> औत्सुक्यमात्रमारम्भः फललाभाय भूयसे । १.२०

एतत्तु भारतीयं लक्षणमनुवर्तते ।

---

१. सा च नायकस्यामात्यस्य नायिकायाः प्रतिनायकस्य दैवस्य वा ।······दैवसाहाय्यस्य पुरुषकारस्य फलवर्तितता' इत्यादि १९.९ अधिकृत्य भारती ।

प्रयत्नः

द्वितीयावस्था प्रयत्नो वा यत्नो वा भरतानुसारं प्रवृत्तिद्वयं व्यनक्ति—

(१) फलं प्रति व्यापारः ।

तथा च (२) परमौत्सुक्यगमनम् । [१]

औत्सुक्यस्य परमाधिक्यं प्रयत्नावस्थायां भवतीति धनञ्जयेन दशरूपके न प्रकटितम् । तदनुसारं तु व्यापारमात्रमेव प्रयत्नः —

प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः ॥

धनञ्जयस्यैषा त्रुटिरेव यत् प्रयत्नावस्थाया औत्सुक्यं स नैव निर्दिशति । वस्तुतः प्रयत्नावस्थायामौत्सुक्यं वर्तत एव । तद्यथाभिज्ञान-शाकुन्तले तृतीयाङ्के, प्रयत्नावस्थायाम्—

(ततः प्रविशति कामयमानावस्थो राजा)

राजा— जाने तपसो वीर्यं सा बाला परवतीति मे विदितम् ।

अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम् ॥ ३.२

(मदनबाधां निरूपयन्) भगवन् कुसुमायुध, त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः । कुतः—

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो—
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै—
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि ॥ ३.३

(सखेदं परिक्रम्य) क्व नु खलु संस्थिते कर्मणि सदस्यैरनुज्ञातः खिन्नमात्मानं विनोदयामि । अभिनवगुप्तानुसारमौत्सुक्यं नाम—उपायविषयस्मरणेच्छा-सन्तान-स्वभावः । [२]

प्राप्तिसम्भवः

तृतीयावस्था प्राप्तिसम्भवोऽस्ति । भरतानुसारं तु ।

ईषत्प्राप्तिर्यदा काचित् फलस्य परिकल्प्यते ।
भावमात्रेण तं प्राहुर्विधिज्ञाः प्राप्तिसम्भवम् ॥ ना० शा० १९.११

---

१. अपश्यतः फलप्राप्तिं व्यापारो यः फलं प्रति ।
परं चौत्सुक्यगमनं स प्रयत्नः प्रकीर्तितः ॥ ना० शा० १९.१०

२. ना० शा० १९.१० अधिकृत्य भारती ।

अत्र प्राप्तिरीषदुताहो परिकल्पनेषदिति विवेचनीयम् ।

अभिनवगुप्त एतां कारिकां विवृण्वन्नाह—"उपायमात्रेण लब्धेन यदा कदाचित् विशिष्टफलप्राप्तिरीषत् कल्प्यते, सम्भावनामात्रेण स्थाप्यते न तु निश्चीयते, तदा प्राप्तेः सम्भवः ।"

अत्र ईषत्परिकल्पनेति आचार्योऽभिप्रैति । नेदं सम्यक् प्रकल्पनमभिनवगुप्तस्येति मतमस्माकम् ।

नाटकेषु कवयो नायिकानायकयोरैकान्तिकसमागमात् प्रागेव तयोरस्थायिनं समागमं योजयन्ति । तथाहि स्वप्नवासवदत्ते—

> शय्यायामवसुप्तं मां बोधयित्वा सखे गता । ५.८
>
> स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम् ।
>
> चारित्र्यमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥ ५.१०

अविमारके तृतीयेऽङ्के नायकोऽविमारको नायिकायाः कुरंग्या सह अज्ञातरूपेण वर्षमेकं न्युष्य पश्चात् पृथग्बभूव ।

प्रतिज्ञायौगन्धरायणे तृतीयेऽङ्के शिष्यारूपेण प्राप्ता वासवदत्ता गान्धर्वविवाहेन परिणीता ।

कुन्दमालायां चतुर्थेऽङ्के सीता मोहं गतं रामं परिष्वजते । पश्चात् रामो रोमाञ्चितो भवति ।

मृच्छकटिके

> वज्रशतमस्तु दुर्दिनमविरतधारं शतहृदा स्फुरतु ।
>
> अस्मादृशदुर्लभया यदहं प्रियया परिष्वक्तः ॥ ५. ४८

अभिज्ञानशाकुन्तले नायको गान्धर्वेण विधिना शाकुन्तलामुपयेमे[1] । विक्रमोर्वशीये नायकयोर्मिलनसुखमीषत्कालं तृतीयेऽङ्के परिणमति ।

मालविकाग्निमित्रे नायको नायिकां मालविकां मिलित्वा संश्लेषमुपजनयति । मालविका तं नाट्येन परिहरति । तदा राजा कथयति—'रमणीयः खलु नवाङ्गनानां मदनविषयावतारः । तथाहीयम्—

> हस्तं कम्पयती रुणद्धि रसनाव्यापारलोलाङ्गुलिं
>
> स्वौ हस्तौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।

---

१. अनसूया—प्रियंवदे, यद्यपि गान्धर्वेण विधिना निवृत्तकल्याणा शकुन्तला । तृतीयचतुर्थाङ्कयोर्मध्ये मिश्रविष्कम्भके ।

पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं
व्यावेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥ ४. १५

रत्नावल्यां नायकयोर्मिलनं द्वितीयाङ्के भवति । पश्चात्—

राजा—(सानन्दं) यथाह भवती । (सागरिकां हस्ते गृहीत्वा स्पर्शसुखं नाटयति ।)

वसन्तकः—भो, एसा खु तुए अपुव्वा सिरी समासादिदा ।

राजा—वयस्य, सत्यम्—

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः ।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवम् ॥ २. १७

पश्चात् पुनरपि तयोर्मिलनं भवति । राजा नायिकां कथयति—

चलितमपि निरोद्धुं जीवितं जीवितेशे
क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥ ३. १७

प्रियदर्शिकायां नायक आरण्यकां कमलवने मिलति । पश्चात् रङ्गपीठे पात्रीभूय तौ परिणयमभिनयतः ।

उत्तररामचरिते तृतीयेऽङ्के वनप्रोषिता सीता मूर्छितं राममुपसृत्य हृदि ललाटे च स्पृशति । प्रत्यापन्नचेतनो रामो वदति—

आलिम्पन्नमृतमयैरिव प्रलेपैरन्तर्वा बहिरपि वा शरीरधातून् ।
संस्पर्शः पुनरपि जीवयन्नकस्मादानन्दादपरविधं तनोति मोहम् ॥ ३. ३८

मालतीमाधवस्य षष्ठेऽङ्के मालतीमाधवयोरीषत्प्रणयभोगो निर्दिशितः । तथाहि—

माधवः— **किं वा भणामि विच्छेददारुणायासकारिणि ।**
कामं कुरु वरारोहे देहि मे परिरम्भणम् ॥ ६. ११

मालती—(सहर्षम्) कथमनुगृहीतास्मि । (उत्थाय) इयमालिङ्गामि । दर्शनं पुनर्बाष्पोत्पीडनेन प्रियसख्याः प्रत्यक्षं न लभ्यते—इत्यादि ।

प्राचीनरूपकेषूपर्युक्तास्थायिसमागमप्रसङ्गा ईषत्प्राप्तेरुदाहरणानि सन्ति । ईषत्प्राप्तेरनन्तरं या वियोगावस्थान्तरीभवति सा रसमयसन्दर्भस्य सर्वोत्कृष्टं वैचित्र्यमावहतीति परं प्रयोजनमीषत्प्राप्तेः । अभिनवगुप्तानुसारं विप्रलम्भाद्यभावे तु का तत्र विचित्रता रञ्जनायाः ।[1]

---

१. ना० शा० १८. १० अधिकृत्य भारती ।

सान्तरायो लाभः पुनर्विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनश्चैतस्येवान्वेषणं वारं सोऽनिर्धारितैकान्तफलप्राप्त्याशात्मको गर्भसन्धिरिति ।[1]

फलयोगे तु समग्रं क्रियाफलं भवति,[2] किन्तु प्राप्तिसम्भवेऽसमग्रं क्रियाफलमुत्पद्यते । ईषत्प्राप्तिः नाम फलप्राप्तेरसमग्रता, तदेव हि प्राप्तिसम्भवस्य प्रधानं लक्षणमिति प्रतिपाद्यं प्रतिभाति भरतस्य । तदनुसारं प्रणयात्मकानि रूपकाणि प्राप्तिसम्भवं यथा तथा सन्धौ घटयन्ति ।

उपर्युक्तं विश्लेषणं तु भरतानुसारमेव । प्राप्तिसम्भवात्मके सन्धौ प्राप्तिरप्राप्तिरेव वेति नाट्यशास्त्रीयं कारिकांशं विशदयन्नभिनवगुप्तः सम्यगाह—

अप्राप्तिरन्वेषणमित्येवंभूताभिरवस्थाभिः पुनः पुनर्भवन्तीभिर्युक्तो गर्भसन्धिः, प्राप्तिसंभवाख्ययावस्थया युक्तत्वेन फलस्य गर्भीभावात् । तथाहि रत्नावल्यां द्वितीयाङ्के—

सुसंगता— अदक्षिणा इदानीं त्वं या एवं भर्त्रा हस्तेन गृहीतापि कोपं न मुञ्चसि ।

—इत्यादौ प्राप्तिः ।[3]

दशरूपके प्राप्तेरसमग्रता धनञ्जयेन न निर्दिष्टा प्राप्तिसम्भवपरिभाषाप्रसंगे इति त्रुटिः ।[4] रसार्णवसुधाकरेऽपि प्राप्त्याशाप्रसंगे 'ईषत्प्राप्तिः' ननिर्दिष्टा ।

ईषत्प्राप्तिः प्रायः प्रणयात्मकेषु नाटकेषु नायकयोरस्थायिसमागमरूपेण विलसति । तत्पश्चात् कविसमीहितं विप्रलम्भशृंगारस्यौचित्यं वर्तत एव । एतदनुसारं भारतीया प्राप्तिसंभवविषयिकी कारिका व्याख्येया ।

तदयमत्र निष्कर्षो यत् प्राप्तिसंभवपदे संभवशब्द उत्पत्तिपरः कुमारसंभवपद इव । स चासौ संभवः प्रकृते क्षणमात्रात्मा न तु दीर्घकालिकः स्थायी वा यथा समग्रफलप्राप्तिरूपे फलागमे ।

नियताप्तिः

प्राप्तिसम्भवे नायकयोर्मिलनं गोपनीयं विधानं प्रवर्तते । तदेव नियताप्तौ गोपनीयतां विजहाति फलागमे च सुप्रकाशितं भवति ।

१. दशरूपके १. ३६ अधिकृत्यावलोकः ।

२. अभिप्रेतं समग्रं च प्रतिरूपं क्रियाफलम् ।
इतिवृत्ते भवेद्यस्मिन् फलयोगो प्रकीर्तितः ।। ना० शा० १९. १३ ।
धनञ्जयोऽप्येतदेव समर्थयति—
समग्रफलसम्पत्तिः फलयोगो यथोदितः ।। द० रू० १. २२ ।

३. ना० शा० २१. ४१ अधिकृत्य भारती ।

४. उपायापायशंकाभ्यां प्राप्त्याशा प्राप्तिसंभवः ।। द० रू० १. २१ ।

नियताप्तिनामिकायामवस्थायां फलप्राप्तिर्न भवति, किन्तु सा दृश्यत इति भरतः परिभाषते—

नियतां तु फलप्राप्तिं यदा भावेन पश्यति ।
नियतां तां फलप्राप्तिं सगुणां परिचक्षते ॥ १९.१२

फलप्राप्तौ याः काश्चिदपायकृता बाधास्ताः सर्वा अस्यामवस्थायां पूर्वोपात्तेनोपायेन (भावेन) दूरीक्रियन्ते । अत एव फलप्राप्तिर्निर्बाधं हस्तगता इव लक्ष्यीक्रियते । प्राप्तौ सन्देहलेशोऽपि न स्यात् ।

पूर्वोक्तां भारतीयां परिभाषामनुसरन् धनञ्जयो दशरूपके प्राह—

अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता ॥ १.२१

फलागमः

पञ्चमावस्था फलोत्पत्तिः, फलयोगः, फलागमो वा नाम । एतस्यां यथानामाभीष्टा फलप्राप्तिर्भवति ।[१] अभिनवगुप्तानुसारं तु यस्मिन्नितिवृत्ते यत्रावस्थात्मनि नायकस्याभिप्रेतं तादृशम्, अपि च नानुचितम्, अपि तु प्रतिरूपमुचितं सम्भवात् पूर्णक्रियाफलमिति समनन्तरफलम्, न च विधिफलमिव स्वर्गादिकालान्तरापेक्षि वर्ण्यते, सावस्था नायकस्य फलयोगः फलोत्पत्तिर्नाम ।

तत्र सचिवामात्यादेरपि यावस्था, सा वस्तुतो नायकगामिन्येव भवतीति नाटकेषु नावश्यं सर्वा नायकस्य साक्षादेवोपनिबन्धनीया, अपितु सचिवादिगतत्वेनापि फलयोगस्तु साक्षादेव तद् (नायक) गतः ।[२]

इमाः पञ्चावस्था एव फलहेतुं विन्यस्यन्ति इति भरतेन स्पष्टीकृतम्—

आसां स्वभावभिन्नानां परस्परसमागमात् ।
विन्यास एकभावेन फलहेतुः प्रकीर्तितः ॥ १९.१५

एतासां फलहेतुत्वे सति धनिकेन निर्दिष्टं अर्थप्रकृतीनां फलहेतुत्वमपास्तम् ।[३] अभिनवगुप्तेनापि अर्थप्रकृतिः फलहेतव इति व्याकृतम् । न तत् साधु ।[४]

---

१. अभिप्रेतं समग्रं च प्रतिरूपं क्रियाफलम् ।
इतिवृत्ते भवेद्यस्मिन् फलयोगः प्रकीर्तितः ॥ ना० शा० १९.१३

२. ना० शा० १९.१३ अधिकृत्य भारती ।

३. अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः ।

४. ना० शा० १९.२० अधिकृत्य भारती ।

८

सन्धिः

अवस्थानां क्रममनुसृत्य पंच सन्धयो विन्यस्यन्ते[1]। यथा महाभारतं पर्वसु, रामायणं काण्डेषु, महाकाव्यानि च सर्गेषु विभज्यन्ते, तथैव रूपकाणि सन्धिषु विभज्यन्ते। सन्धिशब्दस्य व्याकरणिकव्याख्याभिनवगुप्तेनोपस्थापिता तद्यथा, तेनार्थावयवाः सन्धीयमानाः परस्परमङ्गैश्च सन्धय इति समाख्या निरुक्ता।[2] द्वयोर्वस्तुनोः सम्बन्धे सति तयोर्मिलनस्थलं सन्धिर्वस्तुतः स्यात्, किन्तूपचारतः सम्बद्धाः खण्डा अपि सन्धिरिति व्यपदिश्यन्ते। पर्वशब्दस्यापि तादृशः प्रयोगः मिलनस्थलं सम्बद्ध-कथावयवञ्च व्यनक्ति। सन्धिस्तु कथावयव इत्यभिनवगुप्तस्य स्पष्टं मतम्।[3]

तर्हि एतद् व्युत्पन्नं यत् कस्या अपि अवस्थायाः नाट्योचित कथारूपं सन्धिः स्यात्। सन्धिनाम्ना स एव कलात्मको विन्यासोऽभिप्रेतो येन रूपकेषु घटनानां नाम संविधानानां च प्रक्रमो वर्ण्यते।

१. सन्धयो ह्यवस्था परतन्त्राः। प्रारम्भाभिधान-दशाविशेषोपयोगि कथाखण्डात्मकं मुख-सन्धिरित्युक्तम्। ना० शा० १९.१०५ अधिकृत्य भारती।

महावाक्यार्थरूपस्य रूपकार्थस्य पंचांशा अवस्थाभेदेन कल्प्यन्ते। प्रारम्भावस्थोपयोगी यावानर्थराशिः स मुखसन्धिः। तस्यार्थराशेरवान्तरभागा उपक्षेपाद्यानि सन्ध्यङ्गानि। ना० शा० १९.३९ अधिकृत्य भारती।

२. ना० शा० १९.३७ अधिकृत्य भारती। अर्थभागराशिः सन्धिरिति मतमभिनवगुप्तस्य ना० शा० १९.५० अधिकृत्य भारत्यां प्रकटितम्।

३. ना० शा० १९.१०५ अधिकृत्य भारत्यां प्रारम्भाभिधानदशाविशेषोपयोगि-कथाखण्डात्मकं मुखसन्धेः। ना० शा० १९.४२ अधिकृत्य विमर्श-सन्धिं स्पष्टयताभिनवगुप्तेनान्येषां मतं विशदीकृतम्। तथा हि—विमर्शादिकारणत्वाद् विमर्शरूपे कथावयवे स विमर्शो नामेति।

The word Sandhi in Sanskrit dramaturgy denotes both linking up of the parts and also the parts themselves.–Siddheshwar Chattopadhyaya, Nāṭakalakṣaṇa–Ratnakośa P. 50

दशरूपके तु धनञ्जयः सन्धिं परिलक्षयते—

अवान्तरार्थसम्बन्धः सन्धिरेकान्वये सति । १.२३

अनया परिभाषया सन्धेः सामग्र्यं न प्रतीयते, न च सन्ध्यङ्गेषु फलानुवर्तिनीनां घटनानां कलात्मकविन्यासो व्यज्यते। अन्यच्च धनञ्जयः सन्धिं मिलन-स्थलमेवेति व्याकरोति। सन्धिस्तु कथावयव इति तस्य परिभाषा न बोधयति।[१]

अन्यच्च विसंवादो धनञ्जयस्याधोलिखितकारिकायां प्रत्यक्षमेव—

अर्थप्रकृतयः पञ्च पञ्चावस्था-समन्विताः ।
यथासंख्येन जायन्ते मुखाद्याः पञ्च सन्धयः । १.२२-२३

पञ्चावस्थानां पञ्चसन्धिभिः सह यथासंख्यं युज्यते एव, किन्तु सन्धीनामर्थप्रकृतिभिः सह यथासंख्यमसंभाव्यं. यतो हि नाम न सर्वेषु नाटकेषु पताकाप्रकर्योः स्थितिरावश्यकी । अन्यच्च बिन्दुर्नाम सर्वेषामङ्कानामन्तभागे स्यादेवेति भारतीयो नियमः । अतएव प्रतिमुखसन्धावेव बिन्दोः, गर्भसन्धौ पताकायाः, विमर्शसन्धौ प्रकर्या अवश्यम्भाविता असदाग्रह एव ।

धनञ्जयेनापि दशरूपक एवाधोलिखितकारिकायां यथासंख्यस्य वैकल्पिकत्वं पताकाया वैकल्पिकत्वेन प्रमाणितम्—

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ।
द्वादशाङ्गः पताका स्यान्न वा स्यात् प्राप्तिसम्भवः ॥ दश० १.३६

अनेन पूर्वोक्तं यथासंख्यं न चर्चितम्। धनञ्जयस्य तदनुसन्धानमसदभारतीयञ्चास्ति।

इतिवृत्तात्मकावस्थासु प्रतिष्ठितानां सन्धीनां विनियोगस्य कावश्यकतेति प्रश्नः समाधानमर्हति। वस्तुतोऽवस्थाः कार्यस्य विकासं प्रतिपादयन्ति,तदनुसारेण च नायकस्य चारित्रिकोत्कर्षो व्यज्यते । सन्धिभिः कवेः कथाविन्यासस्य कलात्मक-सौष्ठवं व्यज्यते। इदमेव प्रयोजनवैशिष्ट्यमवस्थायाः सन्धेश्च पार्थक्यं समादधाति। अभिनवगुप्तानुसारतस्तु 'महावाक्यार्थरूपस्य रूपकार्थस्य पञ्चांशा अवस्थाभेदेन सन्धिषु कल्प्यन्ते।'

तत्रावस्था-क्रमेण पञ्चसन्धयः मुखं, प्रतिमुखं, गर्भः, विमर्शः, निर्वहणञ्च सन्ति।

———

१. अन्यत्र ३.२६ कारिकायां धनञ्जयः 'सन्धिः वृत्तखण्ड एव' इति स्पष्टयति ।
शृङ्गारप्रकाशे भोजस्यैवं मतम्—अथैतदुपाधेः कथाशरीरभागानां मुखादयः पंच व्यपदेशा भवन्ति ।

१

सन्ध्यङ्गानि

पंचसन्धीनामङ्गेषु विभाजनं नाट्यशास्त्राचार्यैः समुपकल्पितम्। भरतानुसारं—

> सन्धीनां यानि वृत्तानि प्रदेशेष्वनुपूर्वशः।
> स्वसम्पद्गुणयुक्तानि तान्यङ्गान्युपधारयेत्॥

अभिनवगुप्तानुसारतो मुखे द्वादश, प्रतिमुखे गर्भे च त्रयोदश, अवमर्शे द्वादश, निर्वहणे चतुर्दशेति मिलित्वा सन्ध्यङ्गानि चतुष्षष्टिः सन्ति। 'सन्ध्यंगानि तु फलानुवर्तीनि स्युः' इति तेषामेकं प्रधानं लक्षणम्।

मुखसन्ध्यंगानि

भरतानुसारेण तु

> यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा।
> काव्ये शरीरानुगता तन्मुखं परिकीर्तितम्॥ १९.३९

मुखे कथाबीजस्योत्पत्तिर्भवति। बीजसमुत्पत्तौ बहूनां रसानामर्थानां च सम्भावना स्यादेव। अत्र काव्यशरीरं समुत्पद्यते। एतदेव बीजसमुत्पत्तिः। एतदनुसृत्याभिनवगुप्तो व्याख्याति—

प्रारम्भोपयोगी यावानर्थराशिः प्रसक्तानुप्रसक्तया विचित्रास्वाद आपतितस्तावान् मुखसन्धिः।[1]

तत्रावस्थानुयोगित्वात् फलप्राप्तये औत्सुक्यमेव प्रधानोऽर्थराशिः। धनञ्जयो दशरूपके मुखस्य भारतीयं लक्षणमुदाहरति।

रसनिष्पत्तिर्भूयसी स्यादिति उद्दिश्येनिवृत्तस्योपकरण-रूपाणि सन्ध्यङ्गानि भवन्ति। तानि च रसस्य विभावादीन् प्रस्तावयन्ति।[2] मुख-

1. ना० शा० १९.३९ अधिकृत्य भारती।
2. तेन रसस्यैवायं विभावादिपरिकरो यदङ्गचक्रम्। ना० शा० १९.१०५ अधिकृत्य भारती। ना० शा० १९.११५ अधिकृत्य भारती सन्धीनामुपकरणरूपत्वं संकेतयति।

सन्धौ आरम्भ एव काव्यमौत्सुक्यं स्यात् । तदनुसृत्यैकादश सन्ध्यङ्गानि—उपक्षेपः, परिकरः, परिन्यासः, विलोभनम्, युक्तिः, प्राप्तिः, समाधानं, विधानं, परिभावना, उद्भेदः, करणञ्च भवन्ति ।

उपक्षेपः

भरतानुसारेण

काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः । १९.६९

काव्यार्थस्तु इतिवृत्त-शरीरमेव । तस्य प्रथमपदमुपक्षेपः स्यात् । अभिनवगुप्तानुसारेण तत्र प्रधानरसस्य संकेतोऽपि स्यात् ।[१]

धनञ्जय उपक्षेपे बीजन्यासं निर्दिशति । अत्र बीजपदेनोपक्षेपे फलहेतु-सङ्केत आवश्यकोऽभिमतः ।

परिकरः

भरतो धनञ्जयश्चोभौ बीजार्थस्य बाहुल्यं परिकर इति परिभाषेते ।[२] अभिनवगुप्तस्तु व्याख्याति—तत ईषद् विस्तार्यते । अर्थात् काव्यार्थः फलं प्रति किञ्चिदग्रे प्रसरति परिकरे । परिकरस्य प्रयोजनमिष्टार्थस्य रचनास्ति ।[३]

परिन्यासः

भरतो धनञ्जयश्च परिन्यासं समं परिभाषेते—

"तन्निष्पत्तिः परिन्यासः" इति ।

अभिनवगुप्तानुसारेण तु 'ततोऽपि निश्चयापत्तिरूपतया परितो हृदये सः (काव्य-) अर्थः उपन्यस्यते ।

विलोभनम्

भरतस्य धनञ्जयस्य च विलोभन-परिभाषा समाना विद्यते—गुणाख्यानं गुणनिर्वर्णनं वा विलोभनमिति । अत्र प्रश्नः समुदेति—कस्य गुणानामाख्यानमिति । अभिनवगुप्तेन स्पष्टीकृतं—ततस्तदेव गुणवदिति श्लाघ्यते । अर्थात् काव्यार्थस्य गुणाख्यानमित्यभिप्रायः । किन्तु 'अस्याः सर्गविधौ' इत्यादि

१. काव्यार्थ इतिवृत्तशरीर-लक्षणोऽभिधेयः, प्रधानरसलक्षणं च प्रयोजनमंक्षेपेणोपक्षिप्यते । ना० शा० १९.६९ अधिकृत्य भारती ।

२. यदुत्पन्नार्थ बाहुल्यं ज्ञेयः परिकरस्तु सः ॥ ना० शा० १९.७०
तद्बाहुल्यं परिक्रिया । दश० १.२६

३. ना० शा० १९.७१ अधिकृत्य भारती ।

उदाहरणं नायिकाया गुणाख्यानं प्रस्तौतीति विसंवादः । धनिकस्याप्युदाहरणं तादृशमेवासमीचीनम् ।

युक्तिः

भरतस्य धनञ्जयस्य च युक्तेः परिभाषा समानैव—

सम्प्रधारणमर्थानां युक्तिरिति ।

अत्रार्था भूतकालिकघटनाः सन्ति । ता अधिकृत्य विचारणा युक्ति भवति । युक्त्या प्रकाश्य-प्रकाशनं स्वभावतो भवति । नास्त्यत्र प्रयोजनस्य निबन्धो, यथा धनिको विवृणोति । युक्तिरन्येषु सन्धिष्वपि सम्भवति ।

प्राप्तिः

भरतो धनञ्जयश्च उभौ कस्यचिन्नायकस्य सुखार्थस्य प्राप्तिमेव प्राप्तिरिति मन्येते ।

समाधानम्

बीजार्थस्योपगमनं समाधानमिति भरतधनञ्जययोर्मतम् । अभिनवगुप्तानुसारतोऽस्मिन् सन्ध्यङ्गे प्रधाननायको बीजार्थेन प्रत्यक्षतः समायुज्यते ।[१]

विधानम्

विधाने नायकस्य कस्यचित् सुखं दुःखक्षोभे भवत इति भरतधनञ्जययोः समानं मतम् । अस्मिन् सन्ध्यङ्गे इष्टार्थस्य रचना निगूहनेन भवति ।[२] विधानमन्येषु सन्धिष्वपि युज्यते ।[३]

परिभावना

भरतानुसारेण प्रथमं कुतूहलं तदनु आवेगो यस्मिन् कथांशे भवति, स परिभावना । धनञ्जयानुसारेण तु अद्भुतावेशो जायते, स एव परिभावना ।

उद्भेदः

'बीजार्थस्य प्ररोहो यः स उद्भेद इति स्मृतः'

इति भरतस्य परिभाषा । तदनुसारेण बीज-सम्बन्धि-घटनाया ईषद् विकास एवोद्भेदः ।

---

१. यस्मिन् बीजं प्रधाननायकानुगतत्वेन सम्यगाहितं भवति । ना० शा० १९.७२ अधिकृत्य भारती ।

२–३. ना० शा० १९.७४ अधिकृत्य भारती ।

धनञ्जयस्योद्भेद-परिभाषा तु अन्यथैव । तद्यथा—

'उद्भेदो गूढभेदनम्'

अर्थात् निगूढतत्त्वस्य प्रकटीकरणमेवोद्भेदः ।

करणम्

भरतधनञ्जयानुसारेण करणं तु फलानुवर्तिसमारम्भस्योपक्रम एव ।[1] अत्र प्रश्नः समुदेति—यदि मुखसन्धौ आरम्भ एव कार्यावस्थौत्सुक्यमात्रं समावेशयति, तर्हि सन्ध्यङ्गेऽस्मिन् कार्यारम्भः कथं स्यात् । नैष कार्यारम्भः । धनिकस्याभिनवगुप्तस्य चोदाहरणेषु करणं फलानुवर्तिनोऽग्रिमकार्यपदस्य यत्नस्य निश्चितेः प्रकटीकरणमेव ।

भेदः

भरतस्तु 'संघातभेदनार्थो भेदः' इति परिभाषते । अर्थात् भेदनामकेन सन्ध्यङ्गेन पात्राणि भिद्यन्ते । न खल्वस्मिन् संध्यङ्गे औत्सुक्यस्य लेशोऽपि दर्शनीयः ।

दशरूपके तु 'भेदः प्रोत्साहना मतेत्यत्रापि मुख-सन्धेः प्रमुखं लक्षणमौत्सुक्य-परत्वं न दृश्यते । एतेषामुपक्षेप-परिकर-परिन्यास-युक्त्युद्भेद-समाधानानामवश्यं-भावितेति धनिकः ।

प्रतिमुख-सन्ध्यङ्गानि

प्रतिमुखसन्धिस्तु यत्नावस्थात्मकानि कार्याणि विवृणोति । भरतानु-सारेण तु—

बीजस्योद्घाटनं यत्र दृष्टनष्टमिव क्वचित् ।
मुखन्यस्तस्य सर्वत्र तद्वै प्रतिमुखं स्मृतम् ॥१६ ४०

तत्र यत्नावस्थानुसरणं भवति ।[2] तदनुसारेण मुखसन्धौ फलं प्रति व्यापारेणौत्सु-

---

१. प्रकृतार्थसमारम्भः करणं नाम तद् भवेत् । ना० शा० १६.७४
करणं प्रकृतारम्भः । दश० १.२६

२. धनञ्जयानुसारं तु प्रतिमुखसन्धौ बिन्दोरनुसरणं स्यात् । तदसत् । यतो हि नाम सोऽपि भरतमनुसृत्य सर्वेषामङ्गानां पूर्वं बिन्दुमावश्यकं मन्यते । तथा हि—
प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः ।
अङ्को नानाप्रकारार्थ-संविधानरसाश्रयः ॥ ३.३०-३१
तर्हि बहवो बिन्दवो नाटकादिषु सन्त्येव । अतएव तेषां प्रतिमुखसन्धौ नियमनं चिन्त्यमेव ।

बपगमनेन च भवितव्यम् । एते अनुसृत्य त्रयोदशाङ्गानि स्युः–विलासः, परिसर्पः, विधूतम्, शमं, नर्म, नर्मद्युतिः, प्रगमनम्, निरोधः, पर्युपासनम्, वज्रम्, पुष्पम्, उपन्यासः, वर्णसंहारश्चेति ।

विलासः

भरतो धनञ्जयश्च रतिभोगयोः समीहा विलास इति प्राहतुः । अभिनवगुप्तो विलासस्यान्यमप्यभिप्रायं विशदीकुर्वन् आह—

इह च रतिग्रहणं पुमर्थोपयोगि, रसगतस्थायिभावोपलक्षणं तेन वीरप्रधानेषु रूपकेषु प्रतिमुख एव ह्यास्था रतिरूपेणोत्साहः ।

परिसर्पः

भरतधनंजयानुसारेण परिसर्पनामके सन्ध्यङ्गे प्रकृतस्यार्थस्य दृष्टनष्टानुसरणं भवति । तत्र प्रकृतार्थस्य सिद्धौ तिस्रोऽवस्थाः कल्पिताः—'कार्यपद्धतिः दृश्यते इति प्रथमा, पश्चात् कार्यपद्धतिः नश्यति न दृश्यते इति द्वितीया, अन्ततो गत्वा पुनरपि कार्यपद्धतिर्निध्रियते इति तृतीया ।' एतत् सर्वं नायकस्य कार्यान्तरव्यासंगात् सम्भवति । अन्यच्चासामवस्थानां झटिति प्रवर्तनं श्लोकेनैकेन दर्शयित्वा कविश्चमत्कारं विदधाति ।

विधूतम्

विलासवद् विधूतमपि सन्ध्यङ्गं शृङ्गारात्मके रूपके परिस्फुरति । तत्र भरतानुसारेण नायकस्यानुनयं नायिका प्रथमतो न परिगृह्णाति, पश्चात् स्वीकरोति च । धनञ्जयस्तु 'विधूतमरतिर्नायिकायाः' इति व्याख्याति । भरतस्य धनञ्जयस्य च परिभाषे विभिन्ने इति स्पष्टमेव ।

शमः

विधूतस्य पश्चात् दशरूपके शम इति सन्ध्यङ्गं वर्तते । भारतीये नाट्यशास्त्रे शमो नास्त्येव । अस्य स्थाने तत्र तापनमिति सन्ध्यङ्गं वर्णितम् । तापनं तु सागरनन्दिना विश्वनाथेन च वर्णितं शमस्थाने । शारदातनयस्तावत् दशरूपकमनुसरति शमं वर्णयति च ।

शमस्तु विधूतस्य शमनमेव ।

तापनं भरतानुसारेणापाय दर्शनमिति । अपायस्तावद् बाधास्ति ।

नर्म

भरतो धनञ्जयश्च नर्म परिहासो, हास्यं वेति व्याख्यातवन्तौ । इदं नर्म कैशिकीवृत्तेः प्रधानमङ्गमेव[1] । तद्यथा दशरूपके व्याख्यातम्—

---

१. दशरूपकेऽष्टादशधा नर्म कौशिको-प्रकरणे विवृतम् ।

वैदग्ध्य क्रीडितं नर्म प्रियोपच्छन्दनात्मकम् । २.४८

कौशिकीवृत्तिः शृङ्गारपरा भवति । अतएव वीररसात्मकरूपकेषु नर्मेति सन्ध्यङ्गस्य स्थानं न स्यात् ।

नर्मद्युतिः

नर्मद्युतेः परिभाषा भरतेन धनञ्जयेन च पृथक् पृथगेव परिकल्पिता । भरतानुसारेण तु नर्मद्युतिर्हास्यमेव यया कस्यचिन्नायकस्य दोषः प्रच्छाद्यते ।[1] तदनुसृत्याभिनवगुप्तो रत्नावल्या विदूषकोक्तिमुदाहरति —'चतुर्वेदी ब्राह्मण इव ऋचः पठितुं प्रवृत्ता' अत्र हि मौर्ख्यदोषं छादयितुं यद्विदूषकेणोच्यते तद्राज्ञो हास्यजननमिति नर्मैव द्योतितं भवति । तथा हि राजा—महाब्राह्मण कोऽन्य एवमृचामभिज्ञः ।

धनञ्जयस्तु नर्मणा या द्युतिः, धृतिः, प्रसन्नता वा जायते तामेव नर्मद्युतिरिति व्याकरोति ।[2]

प्रगमनम्

भरतो धनञ्जयश्चोत्तरोत्तरवाक्यं प्रगमनमिति परिभाषेते । नाट्यशास्त्रे प्रगमनस्यापरः पाठः प्रगयणमित्यपि विद्यते । अभिनवगुप्तानुसारेण प्रगयणं रूढिशब्दो वा प्रागयणमेव वा प्राक् + अयनमिति विग्रहेण सिद्धम् । प्रागिति पूर्ववचनं ततोऽयनं प्राप्तिः यस्योत्तरवचनस्येति ।

अत्र विकल्पो जायेत यन्नाट्ये सर्वत्रोत्तरोत्तरवाक्यं विलसति । तर्हि को विशेषः प्रगमनमिति सन्ध्यङ्गस्येति विसंवादः न केनापि नाट्याचार्येण विशदीकृतः ।

प्रगमस्तु प्रेमपथस्य प्रवर्तनमिति प्रेम्णोऽभिनवः कश्चिद्विकास एव प्रगमनं स्यादिति कल्प्यते । तत्सम्बन्धि-संवाद एव प्रगमनम् ।

निरोधः

निरोधस्तु केषाञ्चित् परवर्ति-नाट्याचार्याणां विरोध एव । यथानाम निरोधेन प्रेमपथे बाधा समुपस्थाप्यते । भरतानुसारेण 'या तु व्यसन-सम्प्राप्तिः स

---

१. दोषप्रच्छादनार्थं तु हास्यम् । ना० शा० १९.७८

२. मानियर-विलियम्स महोदय, वी० एस० आप्टे महोदयश्च द्युतिः तर्जनमिति व्याख्यातः । तत्र धनिकस्य द्युतेरुदाहरणं तौ प्रवर्तयति ।

निरोध:—धनञ्जयस्तमेवानुहर्रात— हितरोधो निरोधनमिति परिभाषते च। अभिनवगुप्तस्तु 'निरोधो खेदमात्रम्' इति व्याकरोति।[१]

पर्युपासनम्

भरतो धनञ्जयश्च कस्यचिन्नायकस्यानुनय एव पर्युपासनाभात परिभाषेते। नाट्यदर्पणे पर्युपासनस्यापरं नाम सान्त्वनमिति विद्यते।

पुष्पम्

भरतधनञ्जययोः परिभाषानुसारेण पुष्पं सविशेषवचनमिति प्रतिभाति। नेयं परिभाषा स्वात्मना पूर्णा वा स्पष्टा वा। अभिनवगुप्तेन शृङ्गारात्मकप्रवृत्तीर्मनसि कृत्वा स्पष्टीकृतम्—यथा हि प्रेमविकासिपुष्पं भवत्येवमत्रापि राज्ञ उत्तरोत्तरानुरागविशेषसूचकं वचो विकासमस्यानुरागस्य दर्शयति। एतदेवधनिकेन दर्शितं दशरूपकस्य परिभाषामनुसृत्य।

नाट्यदर्पणे रामचन्द्रो व्याख्याति—पूर्वं स्वयमन्येन वा केनचित् प्रयुक्तं वचनमपेक्ष्य यद् विशेषयुक्तं वचनं प्रयुज्यते, तेनान्येन वा तत् पूर्वस्माद् विशेषवत्। तच्च वाक्यं पुष्पमिव पुष्पम्। केशरचनायाः पुष्पमिव पूर्ववाक्यस्यालंकारकारित्वात्। तदनुसारेण समर्थकत्वेन विशेषवदिति।[२]

उपन्यासः

भरतानुसारेणोपन्यासस्तु उपपत्तिकृतोऽर्थः स्यात्। तदनुसारमभिनवगुप्तो व्याख्याति यत्कारणं कस्यचित् कार्यस्यानेनोपन्यस्यते।[३]

धनञ्जयस्तु—'उपन्यासस्तु सोपायम् (वाक्यम्) इति परिभाषते। तदनुसारमुपन्यासेनोपायः कश्चित् प्रकटीक्रियते।[४]

वज्रम्

भरत-धनञ्जयानुसारेण वज्रं नाम सन्ध्यंगं प्रत्यक्षतः निष्ठुरं रूक्षं च वाक्यं फलानुवर्ति-कार्य-प्रसङ्गे न प्रस्तौति।[५]

---

१. व्यसनमत्र खेदमात्रमभीष्टोपरोधान्निरोधः। ना० शा० १९.७९ अधिकृत्य भारती।

२. नाट्यदर्पणे १.४९ अधिकृत्य विवृतिः।

३. अत्र मौखर्यमिमोपपत्तिरूपन्यस्ता। ना० शा० १९.८१ अधिकृत्य भारती।

४. धनिकेनावलोके दशरूपकस्य 'उपन्यासस्तुसोपायम्' इत्येतस्य विवृतिं न कृतवान्। तस्य विवृतिस्तु 'प्रसादनमुपन्यासः' इति भिन्नपाठमनुसृत्य प्रपञ्चिता।

५. प्रत्यक्षरूक्षं यद्वाक्यम्। ना० शा० १९.८०

वर्णसंहार:

भरतस्य नाट्यशास्त्रे धनञ्जयस्य दशरूपके च 'चातुर्वर्ण्योपगमनमेव वर्णसंहारः' इति सम्मतम्। अभिनवगुप्तस्तु चातुर्वर्ण्येन 'सर्वेषां पात्राणां समाहारः' इत्यौपचारिकमर्थं गृह्णाति।[1] धनिकस्तु ब्राह्मणादीनां चतुर्वर्णानां संगतिमेव व्याख्याति। धनिकस्य व्याख्या रूपकेषु विरलमेव समञ्जसति। 'न तत्साधु' इति अभिनवगुप्तेन प्रतिपादितम्—यत्तु ब्राह्मणादिवर्णचतुष्टय-मेलनमिति तदफलत्वादनादृत्यमेव। अस्य सन्ध्यंगस्य त्रीणि प्रयोजनानि—प्रयोगस्य रागप्राप्तिः, इष्टस्य रचना, प्रकाश्ये प्रकाशनमिति सन्तीत्यभिनवगुप्तो विवृणोति।

एतेषामङ्गानां परिसर्पः, प्रशमः, वज्रन्यासः, पुष्पं चावश्यकानि।

प्रतिमुखस्याधिकतराणि सन्ध्यङ्गानि शृङ्गारोचितानि प्रतिभान्ति कतिपय-सन्ध्यङ्गानि वीररसोपयोगीनि सन्ति। अन्येषां रसानां लघ्वी चर्चा एतैः प्रवर्त्यते।

गर्भ-सन्ध्यंगानि

भरतेन गर्भसन्धिरधोलिखितदिशा परिभाषिता—

उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव वा।
पुनश्चान्वेषणं यत्र स गर्भ इति संज्ञितः॥ ना० शा० १९.४१

अस्मिन् सन्धौ यत्नावस्थायाः कार्याणि वर्ण्यन्ते। यथा,

ईषत्प्राप्तिर्यदा काचित् फलस्य परिकल्प्यते।
भावमात्रं तु तं प्राहुर्विधिज्ञाः प्राप्तिसम्भवम्॥ १९.११

सन्धेरवस्थायाश्च परिभाषयोर्विचारेणैवं प्रतिफलति यत् अस्मिन् विकासक्रमे (१) फलस्य स्थितिः ईषत्प्राप्ति-रूपा स्यात्। अर्थात् नायिकायाः प्राप्तिर्भवति नायकस्य, किन्तु न सा ऐकान्तिकी। (२) कार्यस्य स्थितिस्तु त्रिधा स्यात्—(क) (नायिका)-प्राप्तिकारिणी (ख) (नायिका)-अप्राप्ति-कारिणी तथा च (ग) (नायिकायाः)-अन्वेषणम्।

गर्भसन्धेः परिभाषाया इयं विवृतिः तु शृङ्गारात्मकरूपकेष्वेव सम्यग् युज्यते। वीररौद्रात्मकेषु रूपकेषु तस्या अन्यथाभावः परिलक्ष्यते। तत्र (१) प्राप्तिस्तु नायक-विषया (२) अप्राप्तिः प्रतिनायक-चरिते तथा च (३) अन्वेषणमुभयोरेव। अभिनवगुप्तानुसारेण

१. ना० शा० १९.८२ अधिकृत्य भारती।

गर्भसन्धौ बीजस्योद्भेद फलजननाभिमुखत्वमेव। फलस्यात्र गर्भीभावात् गर्भसन्धिरिति नाम सार्थकं भवति।[1]

गर्भसन्धेः अभूताहरणम्, मार्गः, रूपम्, उदाहरणम्, क्रमः, संग्रहः, अनुमानम्, तोटकम्, अधिबलम्, उद्वेगः, सम्भ्रमः, आक्षेपः, इति द्वादशाङ्गानि सन्ति। प्रार्थना-नामकं भारतीयं सन्ध्यङ्गं धनञ्जयो नानुमनुते। धनञ्जयस्य सम्भ्रमो भरतस्य विद्रवस्य स्थाने कल्पनीयः।

अभूताहरणम्

भरतानुसारेण कपटाश्रयं वाक्यं तु अभूताहरणं भवति। अत्र कपटभावेन सत्यं छादयितुं मिथ्या-भाषणं प्रवर्त्यते। अतएव नाट्यदर्पणे इदमसत्याहरणमिति संज्ञितम्।

धनञ्जयेनाभूताहरणं स्पष्टं परिभाषितं येन कपटभावो व्यज्यते—

'अभूताहरणं छद्म' इति।

मार्गः

'मार्गं तत्त्वार्थ प्रोच्यते' इति भरत-धनञ्जययोर्मतम्। तत्त्वार्थस्तु फलप्राप्तये कश्चिदभिनवः किन्तु निश्चितो मार्ग एव। सैव मार्ग-संज्ञायाः सार्थकतेति अभिनवगुप्तः।

रूपम्

'रूपं तु तर्कवितर्कसमन्वितानि वचांसि। अत्र कस्यचिन्नायकस्य संशय-निर्भरचित्ते बहवो वितर्काः सूच्यन्ते' इति भरत-धनञ्जययोर्मतम्।[2] अभिनवगुप्तानुसारेण विचित्रार्थानां समवाये सर्वविषये एव विरुद्धस्तर्कः, इदं नोचितमिदं नोचितमिति प्रतियुक्तिर्यत्र।

युक्तिरूपयोः सन्ध्यङ्गयोः साम्यवैषम्यं विवेचयन्नभिनवगुप्तः प्राह— युक्तिस्तु नियतप्रतिपत्ति-पर्यन्ता। रूपमिति चानियता आकृतिरुच्यत इति।

उदाहरणम्

उदाहरणस्य परिभाषा भरतधनञ्जययोः समानार्थैव। तत्र सातिशयं

1. ना० शा० १९.४१ अधिकृत्य भारती। प्राप्तिसम्भवाख्ययावस्थया युक्तत्वेन फलस्य गर्भीभावात्।

2. चित्रार्थ-समवाये तु वितर्को रूपमिष्यते। ना० शा० १९.८३
रूपं वितर्कवद्वाक्यम्। दश० १.३६

सोत्कर्षं वा वाक्यं भवति । अभिनवगुप्तानुसारेण 'लोकप्रसिद्धवस्त्वपेक्षया यत् सातिशयमुच्यते' तदुदाहरणम् । उत्कर्षमाहरतीति उदाहरणम् ।

क्रमः

भरतानुसारेण '**भावतत्त्वोपलब्धिरेव क्रमः** ।' क्रमेऽपरेषां भावाः कल्प्यन्ते । अभिनवगुप्तानुसारं भाव्यमानस्य वस्तुनः परमार्थोपलब्धिः क्रमः । क्रम इति नाम कथं समीचीनमिति विवृण्वन्नभिनवगुप्तः प्राह—बुद्धिर्हि तत्र क्रमते न प्रतिहन्यते ।

धनञ्जयस्तु क्रममन्यविधं परिभाषते । क्रमः संचिन्त्यमानाप्तिरिति । तदनुसारं यस्यापेक्षा वर्तते स एव प्राप्यत इति क्रमः । स तु भारतीयं क्रमलक्षणमपि स्वीकरोति—

भावज्ञानमथापरे । दश० १.३८

संग्रहः

सामदानादि वचनं संग्रहो भवतीति भरतधनंजययोर्मतं समानमेव ।

अनुमानम्

भरतधनञ्जयानुसारेण तु अनुमानं तर्कशास्त्रीयमनुमानमेव काव्यप्रबन्धे रागाय युज्यते ।

अधिबलम्

भरतधनञ्जयानुसारेण 'कपटेनातिसन्धानम्' अधिबलं स्यात् । धनञ्जयस्तु अपरविधमपि अधिबलमनुमन्यते । तदनुसारं 'तोटकस्यान्यथाभावोऽधिबलं' भवति । तोटकं तावत् संरब्धवचनं स्यादिति अधोनिर्दिष्टम् ।

तोटकम्

भरतधनञ्जयौ उभौ तोटकं संरब्धवचनमिति परिभाषेते । तोटकं सावेगगर्भं वचनम् । स चावेगो हर्षात्, क्रोधात्, अन्यतोऽपि वेति अभिनवगुप्तो विशदयति । कथं तोटकमिति नाम व्युत्पन्नमिति प्रकाशयन् स प्रवक्ति —भिनत्ति यतो हृदयं ततस्तोटकमिति ।[1] नैतत् सर्वथैवंविधमिति उदाहरणेः स्पष्टम् ।

उद्वेगः

'यथानामोद्वेगो नृपारिदस्यूत्थोद्वेगः' इति भरतधनञ्जययोः समाना

---

१. ना० शा० १९.८७ अधिकृत्य भारती ।

मतिः । अभिनवगुप्तस्तु नायिकामपि अरिकोटौ प्रमाणयति । धनिकोऽपि तत्समर्थयति । यो हि यस्यापकारी स तस्यारिः । अनया दिशा उद्वेगस्य शृंगारात्मके रूपके प्रवृत्तिर्घटते ।

सम्भ्रम

त्रासभयादीनि यत्र शङ्कां जनयन्ति, तत्र विद्रवो भवति । सोऽयं भरतस्य विद्रवो धनञ्जयस्य सम्भ्रमः प्रतिभाति । 'शंकात्रासौ च सम्भ्रमः' इति परिभाषा किञ्चिदन्यथापि प्रतिपादयन्ती तत्त्वतो विद्रवमेव लक्षयति ।

आक्षेपः

धनञ्जयस्याक्षेपो भारतीये नाट्यशास्त्रे आक्षिप्तिरिति कीर्तितः— गर्भस्योद्भेदनमिति । अभिनवगुप्तानुसारेण तु गर्भो हृदयान्तःस्थितं वृत्तं तस्योद्भेदनं स्फुटतापत्ति प्रकटीकरणमेव । अभिप्रायस्य हि तत्राक्षेपो बहिः कर्षणम् ।

धनञ्जयस्तावदाक्षेपमेवाभिप्रायं प्रकटयति—'गर्भबीजसमुद्भेदादाक्षेपः' इति परिभाषया । तदनुसारं गर्भसन्धौ यद्बीजस्य विकसितं रूपं तदेवोद्भिन्नमेव प्रदर्श्यते ।[1]

प्रार्थना

प्रार्थनेति भरतप्रतिपादितं सन्ध्यङ्गं धनञ्जयो न संकलयति । भरतानुसारेण प्रार्थनास्ति—

'रतिहर्षोत्सवानां तु प्रार्थना'

अतएव भरतनाट्यशास्त्रे गर्भसन्धौ त्रयोदशाङ्गानि सन्ति, किन्तु धनञ्जयस्य-दशरूपके द्वादशाङ्गान्येव गर्भसन्धेः परिगणितानि ।

धनिकानुसारेणतेषामभूताहरणम्, मार्गः, तोटकम्, अधिबलम्, आक्षेपः इति प्रधानानि ।

अवमर्शसन्ध्यङ्गानि

गर्भे तु प्राप्तेर्विमर्शे पुनरप्राप्तेः प्रधानता प्राप्त्यंशस्य च न्यूनतेति अभिनवगुप्तः ।[2] भरतानुसारेण विमर्शः स्यात्—

गर्भनिर्भिन्नबीजार्थो विलोभनकृतोऽथवा ।
क्रोधव्यसनजो वापि स विमर्श इति स्मृतः ॥ ना० शा० १९.४२

1. गर्भबीजसमुद्भेदादाक्षेपः परिकीर्तितः । दश० १.४२
2. ना० शा० १९.४२ अधिकृत्य भारती

अस्मिन् सन्धौ कार्यस्य नियताप्तिर्नामावस्था भवति । तदनुसारेण विमर्शसन्धौ कार्याणि सन्ति—

नियतां तु फल-प्राप्तिं यदा भावेन पश्यति । इति

अत्र भाव उपाय एव । अस्मिन् सन्धौ उपाया अनुष्ठीयन्ते, परिणामतः फलप्राप्तिर्नियता प्रतीयते ।

अभिनवगुप्तानुसारेण सन्देहात्मकोऽयं विमर्शः । श्रेयांसि बहुविघ्नानीति-पश्यता तदत्र मया विघ्नापसारणं कर्तव्यमिति साभिमानः स्वमुद्योगसूत्रं सहस्रगुणीकुरुते । तथा हि सागरिका-बन्धनेऽपि महामात्यप्रयुक्तमैन्द्रजालिकवृत्तं सुनिपुणमुपनिबद्धम् तावत् ।

गर्भसन्धौ प्राप्तेरनन्तरं या अप्राप्तिः स्यात्, तस्य कारणं तस्मिन् सन्धौ नायकेन न ज्ञातं स्यात् । कारणं तु विमर्शसन्धौ ज्ञायते, यत् कस्यापि क्रोधेन, विलोभनेन, व्यसनेन वा प्राप्तस्यापि रक्षणं न भवति । एतद् ज्ञानं विघ्नस्य दूरीकरणं च विमर्शसन्धौ प्रधानं कथावस्तु ।

अभिनवगुप्तो यद्यपि शंकुकस्य विमर्श-विषयकमधोलिखितं विवेचनं न समर्थयति, तथापि तदेव विमर्शं स्पष्टयतीति मयोदाह्रियते—

'अहमनेन विफलायां क्रियायां विलोभ्य प्रवर्तित इति यत्र कर्ता विमृशति स विलोभनकृत इति ।—विमर्शनस्वभाव एव विमर्शः कार्यविनिपातस्तूत्तरनिर्वहणसन्धि-निबध्यमानाद्भुतरसपरिपोषकत्वेन निबध्यते ।[1]

विमर्श-सन्धेस्त्रयोदशाङ्गानि सन्ति अपवादः, सम्फेटः, विद्रवः, द्रवः, शक्तिः, द्युतिः, प्रसङ्गः, छलनम्, व्यवसायः, विरोधनम्, प्ररोचना, विचलनम्, आदानं च ।[2]

अपवादः

भरतधनञ्जयौ दोषप्रख्यापनमपवाद इति परिभाषेते । अत्र कस्यापि नायकस्य दोषा विशदीक्रियन्ते ।

---

१. ना० शा० १९.४२ अधिकृत्योद्धृतं शंकुकमतम् ।

२. भारतीये नाट्यशास्त्रे विमर्शस्य पंचदशाङ्गानि निर्दिष्टानि । नाट्यशास्त्रस्य खेद-निषेधन-व्यवहारयुक्ति-नामकानि विमर्शसन्ध्यङ्गानि दशरूपके न सन्ति । दशरूपके निर्दिष्टानि द्रव-विचलने सन्ध्यङ्गे नाट्यशास्त्रे न स्तः । धनञ्जयस्तु न केवलं भारतीयं नाट्यशास्त्रमपितु अन्यानपि नाट्यशास्त्रविषयकान् ग्रन्थानुपजीवति इति प्रतिभाति ।

सम्फेटः

रोषभाषणं सम्फेट इति धनञ्जयस्य परिभाषा। भरतस्य 'रोषग्रथितवाक्यं तु सम्फेटः परिकीर्तितः' इति लक्षणं सोऽनुहरति। अत्र नायकानां क्रोधाविष्टं भाषणं संवर्तते।

विद्रवः

भरतानुसारेण विद्रवो गर्भसन्धेरङ्गम्। तत्र

शङ्काभयत्रासकृतो विद्रवः ॥ १९ ८८

धनञ्जयस्य विद्रव-लक्षणमन्यथैव वर्तते–

विद्रवो वधबन्धादिः।

द्रवः

द्रवस्य भारतीयं लक्षणं—'गुरुव्यतिक्रमः' इति धनञ्जयेन सरलीकृतमेवाधोनिर्दिष्टम्—

'द्रवो गुरुतिरस्कृतिः' इति

अत्र गुरुपदेन, वयस्कत्वेन वा कश्चित् पूज्यो जनः।

शक्तिः

भरतानुसारेण (शक्तौ) विरोधिनः प्रशमः (प्रसादनम्) भवति। धनञ्जयस्तु विरोधस्य शमनं शक्तिरिति परिभाषते। तत्त्वतः एतयोः परिभाषयोः साम्यमेव वर्तते। अत्र शक्तिस्तु बुद्धिविभवादेर्जायते इति अभिनवगुप्तस्य सम्मतम्।

द्युतिः

भरतस्य धनञ्जयस्य च द्युतेः परिभाषा समानं तत्त्वं बोधयति। तत्र भरतानुसारेणाधृता भवति। धनञ्जयस्तु तर्जनोद्वेजने द्युतौ लक्षयति।

प्रसङ्गः

गुरोश्चर्चा प्रसङ्गः इत्युदितिर्भरतधनञ्जययोरुभयोः सम्मतम्।[१]

छलनम्

दशरूपके यच्छलनं तदेव भारतीये नाट्यशास्त्रे छादनमिति प्रोक्तम्। नाट्यशास्त्रानुसारेण तु

१. गुरूणां परिकीर्तनम्। ना० शा० १९ ८१
गुरुकीर्तनं प्रसङ्गः। दश० १.४६

'अपमानकृतं कार्यार्थं छादनं भवेत्'

अस्या कारिकाया कृतमिति पदं बहुमानद्योतकमित्यभिनवगुप्तस्य सम्मतम्।[1] तदपमानकलङ्कापवारणाच्छादनमिति।[2]

धनञ्जयस्य छलनं तु अवमाननमिति न कथमपि व्युत्पत्ति-सम्पन्नम्। छल् धातोरवमाननस्य भावो न निष्पद्यते।

छलनस्य स्थाने नाट्यशास्त्रे छन्दनमिति पाठोऽपि वर्तते। नाट्यलक्षण-रत्नकोशे सादनमिति पाठोऽस्ति। नाट्यदर्पणानुसारेण छादनं तु मन्युमार्जनमेव।

नाट्याचार्याणां छादन-विषये बहुमतेन काचिदविज्ञाता त्रुटिः प्रतिभासते ग्रन्थानां पाठेषु।

व्यवसाय

भरतस्य धनञ्जयस्य च व्यवसायस्य परिभाषे सर्वथा भिन्ने स्तः। भरतानुसारेण

व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः।

किन्तु धनञ्जयानुसारेण

व्यवसायः स्वशक्त्युक्तिः। दश० १।४७

अभिनवगुप्तो भारतीयलक्षणं स्पष्टयति--

प्रतिज्ञातस्याङ्गीकृतस्यार्थस्य हेतवो ये तेषां सम्भवः प्राप्तिः व्यवसायः।

विरोधनम्

विरोधनं तु भरतानुसारेण कार्यात्ययोपगमनमस्ति। किन्तु धनञ्जयः 'संरब्धानां व्यक्तशक्तिकम्' विरोधनं मन्यते।[3] तत्र भोजः शृङ्गारप्रकाशे विश्वनाथश्च साहित्यदर्पणे भरतमनुसरतः, किन्तु शारदातनयो भावप्रकाशने दशरूपकमनुसरति।

प्ररोचना

भरतधनञ्जययोः प्ररोचनायाः परिभाषे तत्त्वतः समाने एव। भरतानुसारेण—

१. करोतिः बहुमाने वर्तते। तेन दुष्टोऽप्यर्थोऽवमानेन बहुमनीकृतः।
२. ना० शा० १९.९४ अधिकृत्य भारती।
३. ना० शा० १९.९३, दश० १.४७

प्ररोचना च विज्ञेया संहारार्थप्रदर्शिनी ।

अर्थात् निर्वाह्यमाणस्यार्थस्य दर्शिका प्रकर्षेण रोचत इति प्ररोचना । धनञ्जयानुसारेण

सिद्धामन्त्रणतो भाविदर्शिका स्यात् प्ररोचना ।

अर्थादाप्तपुरुषाणां संवादेन भाविकार्यार्थः सूच्यते प्ररोचनया ।

विचलनम्

भारतीयनाट्यशास्त्रस्य कतिपयपाठेषु विचलनं नास्ति ।[1] धनञ्जयानुसारेण '**विकत्थना विचलनम्**' अस्ति ।

आदानम्

भरतानुसारेणादानमस्ति—

'**बीजकार्योपगमनम्**' । ना० शा० १९ ९४

अभिनवगुप्तानुसारेणादानेन 'बीजफलस्य समीपताभवनं' प्रतीयते ।
धनञ्जयस्तु आदानमन्यथा परिभाषते । तदनुसारं—

"आदानं कार्य-संग्रहः"

कार्यं तु फलमेव । संग्रहस्तस्य चर्चास्ति ।

भरतोऽवमर्शे पंचदश सन्ध्यङ्गानि वर्णयति । भरतेन निर्दिष्टानि खेद-निरोधन-व्यवहार-युक्तिनामकानि सन्ध्यङ्गानि दशरूपके न सन्ति । भरतस्य नाट्यशास्त्रेऽपि दशरूपके प्रोक्ते द्रवविचलने न स्तः ।[2]

भरतप्रोक्तानि अतिरिक्त-सन्ध्यङ्गानि अधोविधं वर्णितानि ।

खेदः

भरतानुसारेण '**मनश्चेष्टाविनिष्पन्नः श्रमः खेदोऽस्ति** ।' अभिनवगुप्तानुसारेण न

१ प्रक्षिप्तपाठानुसारं नाट्यशास्त्रे
आत्मा विचलना तज्ज्ञैरवमानार्थ-संयुता ॥ १९ ९६ इयं परिभाषा धनञ्जयेन नोरीकृता ।

२. भरतस्तु सन्ध्यङ्गानां नाम-गणना-प्रसङ्गे यद् विद्रवं कथयति, तदेव परिभाषा-प्रकरणे द्रवं संजानाति । ना० शा० १९.६३, ९० । विचलनं तु नाट्यशास्त्रे प्रक्षिप्तपाठे वर्तते । १९ ९६

केवलं मानसिकोऽपि तु शारीरिकोऽपि खेदो बोधनीयः।[१] सागरनन्दी, रामचन्द्रो विश्वनाथश्च खेद इति सन्ध्यङ्गं स्वीकुर्वन्ति।

निषेधनम् (प्रतिषेधः)

भरतानुसारेणेप्सितार्थस्य निषेध एव निषेधनमस्ति। सागरनन्दी, विश्वनाथश्च प्रतिषेधनामकं सन्ध्यङ्गं स्वीकुरुतः।

व्याहारः (व्यवहारः)

भरतानुसारेण प्रत्यक्षवचनं व्याहारो भवति।

युक्तिः

भरतानुसारेण सविच्छेदं वचो युक्तिर्भवति। धनिकानुसारेणावमर्शसन्धौ अपवाद-शक्ति-व्यवसाय-प्ररोचनादानानि प्रधानानि।

उपर्युक्त-विवेचनेन स्पष्टं प्रतिभाति यत् धनञ्जयस्योपजीव्यं केवलं भारतीयं नाट्यशास्त्रमेव नासीत्। धनञ्जयो मुख-प्रतिमुख-गर्भसन्धी-नामङ्गानि प्रायशो भारतीयं क्रममनुसृत्य परिभाषते, किन्तु विमर्शसन्धेरंग-गणनाक्रमे भारतीयं क्रमं प्रायो नानुमनुते। केवलं त्रयोदशाङ्गानि वर्णयति, भारतीये नाट्यशास्त्रे पंचदशाङ्गानि सन्ति। तत्र धनञ्जयो भारतीयानि चत्वारि सन्ध्यङ्गानि विसृजति, द्वे सन्ध्यङ्गे च नवीने स्वीकरोति।

अपरोपजीव्यनाट्यग्रन्थान् समीक्ष्यैवाभिनवगुप्तो भाषतेऽस्मिन् प्रसङ्गे—

अत्रोद्देशक्रमत्यागे यत्कयाञ्चिदङ्गानां लक्षणं तत् क्रमानियमसूचनार्थः। अनेन पाठविपर्यासिन यत्कैश्चिदुद्देशस्यान्यथापठनं तद्ग्रन्थकाराशया-परिज्ञानकृतम्। केचिदत्रान्यतममङ्गं नाधीयते। द्वादशाङ्गमेवैतत्सन्धिमाहुः। अन्ये तु त्रयोदशाङ्गत्वेऽप्यस्य निर्वहणसन्धावपि प्रसक्तेरिति वृत्तान्तभूतत्वेन गणनमन्यायमिति त्रयोदशाङ्गत्वात् चतुष्षष्टि-संख्यां समर्थयन्ते।

निर्वहण-सन्ध्यङ्गानि

अन्तिमोऽयं सन्धिर्निर्वहणं नाम। भरतो निर्वहणं परिभाषते—

> समानयनमर्थानां मुखाद्यानां सबीजिनाम्।
> नानाभावोत्तराणां यद् भवेन्निर्वहणं तु तत्। १६. ४३

ननु अभिनवगुप्तेन व्याख्यानम्—

१. ना० शा० १६. ८२ अधिकृत्य भारती।

मुखाद्यानां चतुर्णां सन्धीनां येऽर्थाः प्रारम्भाद्याः तेषां सहबीजिभिर्बीज-विकारैः क्रमेणावस्थाचतुष्टयेन भवद्भिरुत्पत्त्युद्घाटनोद्भेद-गर्भनिर्भेद लक्षणैः वर्त्तमानानां नानाविधैः सुख-दुःखात्मकैः हासशोक क्रोधादिभिर्भावैरुत्त-राणां चमत्कारास्पदत्वे जातोत्कर्षाणां यत्समानयनं यस्मिन्नर्थराशौ समानी-यन्ते फलनिष्पत्तौ योज्यन्ते, तन्निर्वहणं फलयोगावस्थया व्याप्तम् ।

निर्वहण-सन्धौ यत्फलागमो भवति स भरतेन परिभाषितः

> अभिप्रेतं समग्रं च प्रतिरूपं क्रियाफलम् ।
> इतिवृत्ते भवेद्यस्मिन् फलयोगः प्रकीर्तितः ।। १९. १ः

धनञ्जयस्तु निर्वहण-सन्धिलक्षणे भरतं सम्यगनुसरति । दशरूपके तेन निर्वहणस्य द्वादशाङ्गानि निगदितानि— सन्धिः, विबोधः, ग्रथनम्, निर्णयः, परिभाषणम्, प्रसादः, आनन्दः, समयः, कृतिः, भाषणम्, पूर्वभावः, उपगूहनम्, काव्य-संहारः, प्रशस्तिश्च ।

सन्धिः

भरत-धनञ्जययोः सन्धेः परिभाषा समानैव—**मुखबीजोपगमनमिति** । मुखे यदुक्तं तदिह निकटीभूतं सन्धानं सन्धिरिति ।

निरोधः

निरोध इति सन्ध्यङ्गं दशरूपके विबोध इति प्राप्यते । निरोधस्तु पाठभेदो न साधु स्यात् । भरतानुसारेण '**कार्यस्यान्वेषणं युक्त्या निरोधः** स्यात् । दशरूपकेऽपि **विबोधः कार्यमार्गणमिति** लक्षितः ।

ग्रथनम्

ग्रथनं भरतानुसारेण **कार्याणामुपक्षेपः** (चर्चा) वर्तते । धनञ्जयस्तदेवा-नुसरति ।

निर्णयः

भरत-धनञ्जयौ उभौ अनुभूतेर्वर्णनं निर्णय इति परिभाषेते । अभिनव-गुप्तानुसारेणत्वानुभूतिस्तु प्रमाणसिद्धं वस्तु ।

परिभाषणम्

भरतानुसारेण परिभाषणं तु परिवाद एवात्मनिन्दा स्यात् । अभिनव-गुप्तानुसारेण परिभाषणं स्यात्— उभयोरप्यन्योन्यापराधोद्घट्टनं वचनम् । उदाहरणैस्तत् सविशेषं स्पष्टीकृतम् । सागरनन्दी, रामचन्द्रः, विश्वनाथः, भोजश्चैवं मन्यन्ते । धनञ्जयस्तु परिभाषणमन्यथा परिभाषते—

'परिभाषा मिथोजल्पः' इति।

नैतत्साधु। यतो हि नाम रूपकेषु मिथोजल्पस्तु आद्यन्तं विद्यत एव। स तु परि=मिथ, भाषणम्=जल्पः इति कृत्वा परिभाषणं लक्षयति। तत्तु चिन्त्यमेव।

प्रसादः

भरतानुसारेण प्रसादस्तु प्रीतिरेव। सा शुश्रूषादिना जायते। एतदेव धनञ्जयः 'प्रसादः पर्युपासनमिति' लक्षयित्वा समर्थयति।

आनन्दः

भरतधनञ्जयो उभौ आनन्दमभीष्टार्थप्राप्तिं मन्येते।

समयः

भरतो धनञ्जयश्च समयो दुःखस्य दूरीभवनमिति वदतः।

कृतिः

नाट्यशास्त्रे 'द्युतिलब्धार्थस्य शमनं' भवति। सैव दशरूपके कृतिरिति-परिभाषिता। अभिनवगुप्तानुसारेण क्रोधादेः प्रशमनमपि द्युतिः।

भाषणम्

भरतो धनञ्जयश्च भाषणं समानमेव परिभाषेते।[1] भरतानुसारेण गर्भसन्धौ संग्रहनामकोऽङ्गं सामदानादिर्भवत्येव। अतो निर्वहणेऽस्य ग्रहणं न समीचीनमिति संशयं दूरीकुर्वाणोऽभिनवगुप्तः प्राह—गर्भसन्धौ वैकल्पिकं स्यात् संग्रहः सामदानादिश्च, किन्तु निर्वहणे तु तस्यावश्यंभाविता।[2]

पूर्वभावः

भरतस्य पूर्ववाक्यस्य स्थाने धनञ्जयेन दशरूपके पूर्वभावो वर्णितः। पूर्ववाक्ये तु पूर्वं कथितस्यार्थस्य प्रत्यक्षीकरणम्। पूर्वभावस्तु दशरूपके केनापि समीहितकर्तव्यस्यान्येन केनचिदात्मसात्करणम्। पूर्वभावो रामचन्द्रेण, शारदातनयेन च स्वीकृतः। सागरनन्दिना, विश्वनाथेन च पूर्ववाक्यमिति स्वीकृतम्।

१. सामदानादि-सम्पन्नम्। ना० शा० १९.१०२
मानाद्याप्तिश्च भाषणम्। दश० १.५३

२. ना० शा० १९. १०२ अधिकृत्य भारती।

उपगूहनम्

भरतो धनञ्जयश्चोपगूहनमद्भुतस्य प्राप्तिरिति मन्वाते। अद्भुतं दुस्साध्यमपि भवेदिति केचित्।

काव्य-संहारः

भरत-धनञ्जयौ वरप्राप्तिः काव्यसंहार इति परिभाषेते।

'काव्यसंहारस्तु वस्तुतः सन्ध्यङ्गमेव नास्ति, यतो हि नाम नास्मिन् बीजफलानुवर्तिकथावयव' इत्यस्माकं मतम्।

प्रशस्तिः

भरतानुसारेण 'नृपदेशप्रशान्तिः प्रशस्तिः' स्यात्। धनञ्जयस्य प्रशस्ति-परिभाषा सम्यग् व्युत्पन्ना वर्तते—

'प्रशस्तिः शुभशंसनम्' इति

प्रशस्तिर्वस्तुतः सन्ध्यङ्गं नास्त्येव कथावयवविहीनत्वात्। प्रशस्तेः पूर्वमेव कथा समाप्यते।

सन्ध्यङ्ग-योजना-विशेषः

भरतमनुसृत्याभिनवगुप्तेन विशदीकृतं यदेकमपि सन्ध्यङ्गं तत्रैव सन्धौ द्विः त्रिर्वा निबन्धनीयम्। यथा रत्नावल्यां प्रतिमुखे विलासः, सागरिकायां राज्ञि वा सकृदुपनिबद्धः प्रधानं शृङ्गारमुद्दीपयति। वेणीसंहारे सम्फेट-विद्रवौ पुनः प्रदर्शितौ वीररौद्रोद्दीपनौ भवतः।[1] न च सर्वाणि सन्ध्यङ्गानि तत्र सन्धौ प्रयुज्यन्ते। रसभावादिकं समीक्ष्य यथोचितान्यङ्गानि विन्यस्यन्ते।

सन्ध्यङ्गानां क्रमो वैकल्पिक एव। कानिचित् सन्ध्यङ्गानि तु क्रमानुसारेणैव प्रयुज्यन्ते। यथा उपक्षेपः, परिकरः, परिन्यासश्च। नाट्याचार्यैः शास्त्रेषु सन्धीनां क्रमः पृथक्-पृथक् स्थापितः। अभिनवगुप्तानुसारेण 'न च क्रमेणानेनैव तानि प्रयोज्यानीति'।

सन्ध्यङ्गानां मध्ये सन्ध्यन्तराणां लास्याङ्गानां च विन्यासो दृश्यते। एतदपि सन्ध्यङ्गक्रमो वैकल्पिक इति स्पष्टयति।

एक एव कथांशः कतिपयसन्ध्यङ्गानामुदाहरणं भवितुमर्हति।

कतिपय-सन्ध्यङ्गानि न केवलं स्वकीये सन्धौ विधीयन्तेऽपितु अन्येष्वपि

१. ना० शा० १९. १०५ अधिकृत्य भारती।

सन्धिषु निधीयन्त इति अभिनवगुप्तेन विशदीकृतम्—तेन यदुद्भटप्रभृतयोऽङ्गानां सन्धौ क्रमे च नियममाहुस्तद्युक्त्यागमविरुद्धमेव ।

तथाहि—'सम्प्रधारणमर्थानां युक्तिरित्यभिधीयते' इति यन्मुखसन्धौ पंचममङ्गं वक्ष्यति तत्सर्वेषु सन्धिषु तावन्निबन्धनयोग्यमिति ।[1]

सन्ध्यङ्ग-प्रयोजनानि

भरतानुसारेण सन्ध्यङ्गानां प्रयोजनानि सन्ति—

इष्टार्थस्य रचना वृत्तान्तस्यानुपक्षयः ।
रागप्राप्तिः प्रयोगस्य गुह्यानां चैव गूहनम् ॥
आश्चर्यवदभिख्यानं प्रकाश्यानां प्रकाशनम् । १९. ५१-५२

इष्टप्राप्तिः

प्रथमं प्रयोजनं तु इष्टार्थस्य रचना वर्तते । तत्राभीष्टस्य प्रयोजनस्य रसास्वादकृता रचना विस्तारणा भवति[2] । एतत्तु सर्वेषु सन्ध्यङ्गेषु समानमेव ।

वृत्तान्तस्यानुपक्षयः

कथाशरीरस्य क्षयो न भवेदिति द्वितीयं प्रयोजनं वृत्तान्तस्यानुपक्षयो नाम । एतत्प्रयोजनं सर्वसाधारणम् ।

प्रयोगस्य रागप्राप्तिः

प्रयोगस्तावदितिवृत्तमेव । तस्य स्वयं परम्परस्यापि रागप्राप्तिः रञ्जनायोग्यत्वलाभो व्युत्पत्त्यवस्थायोगात् । पर्युपासन-नर्म-नर्मद्युतिरिति नामकानि सन्ध्यंगानि तत्रोदाहरणानि ।

गुह्यानां गूहनम्

एतत्प्रयोजनं तु पुनरुक्तेः निवर्तनार्थं भवति । तदर्थं गोपनीयाः कथांशा न प्रकटीक्रियन्ते ।[3]

आश्चर्यवदभिख्यानम्

पुनः पुनः श्रुतमपि यदभिख्यानम् (इतिवृत्तम्), तत एव नाश्चर्यकारि तदपि अङ्गयोजनायामपूर्वतामिव दधदद्भुततामेति ।[4]

१. ना० शा० १९.६८ अधिकृत्य भारती ।

२. ना० शा० १९. १०५ अधिकृत्य भारती सन्धीनां रसपारतन्त्र्यमुद्घाटयति ।

३. अभूताहरणं नाम सन्ध्यङ्गं गूहनस्योदाहरणम् ।

४. परिभावना चोपगूहनञ्चास्योदाहरणम् ।

प्रकाश्यानां प्रकाशनम्

यस्य कथांशस्य ज्ञानमतिशयोपयोगि स्यात्, तत एव प्रकाश्यम्। तस्य प्रकाशनं विस्तारणम्।

पूर्वोक्तविवरणं भारतीयं नाट्यशास्त्रं तत्राभिनवभारतीं चानुहरति। धनञ्जयस्य दशरूपके तु सन्ध्यङ्ग-प्रयोजनानां संज्ञामात्रमेव वर्तते। यथा,

> **इष्टार्थस्य रचना गोप्यगुप्तिः प्रकाशनम्।**
> **रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयः ॥ १.५५**

संक्षिप्ततरं विद्यते एतेषां धनिककृता व्याख्या। तथा हि—विवक्षितार्थ-निबन्धनम्, गोप्यार्थगोपनम्, प्रकाश्यार्थ-प्रकाशनम्, अभिनेयरागवृद्धिः, चमत्कारित्वम् च काव्यस्येतिवृत्तस्य विस्तर इत्यङ्गैः षट् प्रयोजनानि सम्पाद्यन्ते। प्रयोगस्य राग इति प्रयोजनं धनिकेन भिन्नतरं व्याख्यातम्। अभिनव-गुप्तानुसारं प्रयोग इतिवृत्तमेव। धनिकानुसारेण प्रयोगस्तावदभिनेयं तत्त्वं स्यादिति।

१०

सूच्य-दृश्य-विवेकः

किं सूच्यं किं च दृश्यमिति साधारणतो नाम्नैव स्पष्टम् ।[1] तथापि नाट्याभिनय-प्रसङ्गे एतद् द्वयं व्याख्येयम् ।

सूच्यम्

यदि काचिद् घटना पात्राणां संवादमात्रेणैव ज्ञायते, रङ्गपीठे तस्याः साक्षाद् दर्शनमनुकरणेन न विधीयते, तर्हि सा घटना सूच्या भवति । तथा हि, स्वप्नवासवदत्ते प्रथमाङ्के लावाणकदाहस्य वृत्तं सूच्यं, यतो हि नाम रंगपीठेऽग्निदाहो न प्रदर्श्यते न च तस्मिन् वासवदत्ताया यौगन्धरायणस्य वा दाहो दृश्यते । अतएव सूच्यमिदं वृत्तं स्वप्नवासवदत्तस्य प्रथमाङ्के ।

दृश्यम्

यदि काचिद् घटनानुकरण-द्वारा रङ्गपीठे साक्षात् प्रदर्श्यते, तर्हि सा दृश्यं भवति । तथा हि स्वप्नवासवदत्तस्य तृतीयाङ्के वासवदत्ता मालां गुम्फति । अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के शकुन्तला कण्वाश्रमात् प्रतिष्ठते ।

दशरूपकानुसारेण तु सूच्ये नीरसोऽनुचितो वस्तुविस्तरः स्यात् । दृश्ये पुनः मधुरोदात्तरसभावनिरन्तरो वस्तुविस्तरो भवेत् ।

अत्रानुचितो वस्तु-विस्तरः इति सन्दिग्धमेव पदम् । काचिद् घटनानुचिता स्यात्, किन्तु तद्विषयक-वस्तु-विस्तरः कथं नामानुचितो भवितुमर्हतीति न बोधगम्यम् । विस्तरस्तु वर्णनमेव ।

साधारणतो दृश्यमङ्के सूच्यं चार्थोपक्षेपकेषु निवेदयेत् ।[2]

1. कथावस्तुनो दृश्यसूच्यभेदोऽभारतीय इति डा० सिद्धेश्वरभट्टोपाध्यायेन गवेषितम् । Nāṭaka-Lakṣaṇaratnakośa P. 190
2. अङ्कप्रवेशकाद्यं भवति हि तन्नाटकं नाम । ना० शा० १८.११ अत्र प्रवेशकस्तावदर्थोपक्षेपकस्थाने वर्तते ।

सूच्य-प्रतिपादनम्

दशरूपके तु सूच्य-प्रतिपादनाय पंचार्थोपक्षेपकाः संज्ञिताः सन्ति— विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कास्यम् अङ्कावतारश्चेति। एतयोः प्रथमद्वयं भरतः प्रतिजानीते।[1] सूच्यमभिनय-शून्यं भवति। तस्य स्थानं प्रवेशकादिषु भवत्येव, किन्तु अङ्कभागेऽपि सूच्यं प्रचुरं भवति। यथा स्वप्नवासवदत्तस्य प्रथमाङ्के लावाणकदाह-वर्णनम्।

विष्कम्भकः

दशरूपकानुसारं विष्कम्भकेऽतीतानां भाविनां च कथावयवानां ज्ञापनं भवति। तेषां वर्णनं संक्षिप्तं भवति। केवलं मध्यमकोटिक-भूमिका यदि भवति, तर्हि शुद्धो विष्कम्भकः स्यात्। यदि नीचमध्यमयोर्भूमिका भवति, तर्हि सङ्कीर्णो विष्कम्भकः स्यात्। अभिनवगुप्तानुसारेण विष्कम्भयत्युपस्तम्भयतीति विष्कम्भः।

प्रवेशकः

यदि केवलं नीचभूमिका स्यात्तर्हि प्रवेशको नाम सूच्यं भवति।[2] इदं तु विष्कम्भकस्यापरं रूपमेव। नीचानां पात्राणामुक्तयोऽनुदात्ताः स्युरिति धनञ्जयो नियमयति। अनुदात्ता उक्तयः प्राकृतभाषया भवन्ति।[3]

अस्मिन् प्रकरणे उत्तममध्यमाधमपात्राणां विवेचनमावश्यकम्। तेषां लक्षणं धनंजयेन न प्रोक्तम्। भारतीये नाट्यशास्त्रे तेषां व्यवस्था निम्नानुसारं विद्यते—

> **जितेन्द्रियज्ञानवती नानाशिल्पविचक्षणा।**
> **दक्षिणाढ्या महालक्ष्म्या भीतानां परिसान्त्वनी॥**
>
> **नानाशास्त्रार्थसम्पन्ना गाम्भीर्यौदार्यशालिनी।**
> **स्थैर्य-त्यागगुणोपेता ज्ञेया प्रकृतिरुत्तमा॥**
>
> **लोकोपचारचतुरा शिल्पशास्त्र-विशारदा।**
> **विज्ञान-माधुर्ययुता मध्यमा प्रकृतिः स्मृता॥**

१. मूलनाट्यशास्त्रे ऽर्थोपक्षेपक इति नाम चूलिका, अङ्कावतारः, अङ्कास्यं चेति नामानि न सन्ति।

२. अदृष्टमप्यर्थं हृदि प्रवेशयतीति प्रवेशकः। ना० शा० १८.२६ अधिकृत्य भारती।

३. उदात्तं संस्कृतं वचनं तस्य निषेधः। ना० शा० १८.३४ अधिकृत्य भारती।

रूक्षवाचोऽथ दुःशीलाः कुसत्त्वाः स्थूलबुद्धयः ।
क्रोधना घातकाश्चैव मित्रघ्नाश्छिद्रदर्शिनः ॥

पिशुनास्तूद्धतैर्वाक्यैरकृतज्ञास्तथालसाः ।
मान्यामान्याविशेषज्ञाः स्त्रीलोलाः कलहप्रियाः ॥

सूचकाः पापकर्माणः परद्रव्यापहारिणः ।
एभिर्दोषैस्तु सम्पन्ना भवन्तीहाधमा नराः ॥ ना० शा० २४.६-७

भरतो नारीणामपि त्रिविधां प्रकृतिं वर्णयति । तद्यथा

मृदुभावा चाचपला स्मितभाषिण्यनिष्ठुरा ।
गुरूणां वचने दक्षा सलज्जा विनयान्विता ॥

रूपाभिजनमाधुर्यैर्गुणैः स्वाभाविकैर्युता ।
गाम्भीर्य-धैर्य-सम्पन्ना विज्ञेया प्रमदोत्तमा ॥

नात्युत्कृष्टैरनिखिलैरेभिरेवान्विता गुणैः ।
अल्पदोषानुविद्धा च मध्यमा प्रकृतिः स्मृता ॥

अधमा प्रकृतिर्या तु पुरुषाणां प्रकीर्तिता ।
विज्ञेया सैव नारीणामधमानां समासतः ॥ ना० शा० २४.८-१२

भरतः कतिपयप्रकृतेर्नाम्नापि वर्गीकरणं स्पष्टयति । तथा हि—नपुंसकोऽधमः । तथैव प्रेष्यादयः शकारः, विटश्च ।

इदं भेद-प्रकरणं तु प्रकृतेः स्वभावं परिलक्ष्य विशदीकृतम् । प्रवेशक-विष्कम्भकयोः भूमिका-निर्धारणं नैतेन सम्यग्भवितुमर्हति, यतो हि नाम तत्र पदत्वेनोत्तमत्वाधमत्वादिगवेषणं समीचीनं स्यादिति, अतः परमालोच्यते।

तत्र रत्नावल्यां द्वितीय-तृतीय-चतुर्थाङ्केभ्यः पूर्वं प्रवेशकाः सन्ति । एतेषु क्रमशः सुसंगतानिपुणिकयोः, काञ्चनमाला-मदनिकयोः, सुसङ्गता-वसन्तकयोश्च संवादाः प्रपञ्चिताः । प्रवेशकत्वात् ते सर्वेऽधमाः स्युः किन्तु भरतप्रतिपादितं पूर्वोक्ताधमप्रकृतिलक्षणमीषदपि तेषु न घटते । अन्यच्चोत्तर-रामचरितस्य षष्ठाङ्कात् पूर्वं मिश्रविष्कम्भको विद्यते विद्याधरमिथुनस्य संवादः । मिश्रविष्कम्भकत्वेनात्र मध्यमाधमयोर्भूमिका स्यात् । एतयोः विद्याधरयोर्मध्यमाधमत्वनिर्धारणं भरतानुसारेण सुष्ठुतरं न प्रतिभाति ।

चूलिका

धनञ्जयानुसारेण

'अन्तर्जवनिका-संस्थैश्चूलिकार्थस्य सूचना ॥ दश० १.६१

इयं चूलिका नेपथ्योक्तेभिन्नेति अग्रेऽनुसरामः । चूलिकाया वक्तारो मूलतः सूतमागधवन्दिन एवासन् । न ते पात्राणि सन्ति । चूलिकायां प्रायशः कालवर्णना, नायक-प्रशस्तिश्चाभूताम् ।[१] नेपथ्योक्तो कस्याश्चिदतीताया वर्तमानाया घटनाया वाचिकाभिनयपूर्वकं परिचयो वर्तते । चूलिकायाः स्थितिरङ्कस्यान्तिमभागे प्रायो भवति । तया पूर्वोत्तराङ्कयोर्योगो विधीयते इति कोहलः प्रतिपादयति । तद्यथा,

> विधाङ्कोऽङ्कावतारेण चूडयाङ्कमुखेन वा
> अर्थोपक्षेपणं चूडा बहुधे: सूतवन्दिभिः ।

अङ्कास्यम्

धनञ्जयानुसारेण

अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचनात् ॥ दश० १।६२

कस्यचिदङ्कस्यान्ते पात्राणि उत्तराङ्कस्य यो घटनाक्रमस्तं संकेतयन्ति । प्रथम तावदङ्कभागेऽर्थोपक्षेपका न स्युरिति ।

'र्गव संसूचयेत् सूच्यं दृश्यमङ्कैः प्रदर्शयेत्' इति नियमस्यातिक्रमो भवति यदि नामाङ्कास्यमर्थोपक्षेपक इति मन्येत ।

अन्योऽपि तत्र दुरतिक्रमः सन्देहः । अर्थोपक्षेपकद्वारेण कश्चिदर्थो नीरसोऽनुचितश्च परिचीयेत । तत्राङ्कान्तभागेऽङ्कास्यरूपेण नीरसानुचितः कथार्थ उत्तराङ्के कथं सरसोचितो भवेदिति ।

अङ्कावतारः

दशरूपकानुसारेण

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः ॥ १।६२

यत्र पूर्वाङ्कस्य कथोत्तराङ्केऽवतरति (crosses over) तत्राङ्कावतारः सा क्रमबद्धताया सूचना भवति ।

अङ्कावतारोऽपि कथमप्यर्थोपक्षेपको भवितुं नार्हति, यतो हि नाम नात्र किञ्चिदप्यर्थोपक्षेपणं भवति । अङ्कावतारस्यार्थोपक्षेपणत्वं निघ्नता ह्रासेन सम्यक् प्रोक्तम्—

१. गतावदतीतघटनानां वर्णनमपि वन्दिनः प्रस्तुवन्ति । यथा महावीरचरिते तृतीयाङ्कस्यादौ ।

The continuation scene (अङ्कावतार) does not seem to belong properly in the category of Intermediate scenes, according to the definition of these in the latter part of this section ; it is not clear how it informs the audience of matters that cannot be presened on the stage.

The Daśarūpa : A Treatise on Hindu Dramaturgy. P. 36.

डा० सिद्धेश्वर-चट्टोपाध्याय: कोहलमनुसृत्य प्रतिपादयति यत् अङ्कावतार:, अङ्कमुखं, चूलिका चाङ्कारम्भमुद्भावयन्ति । तेषां प्रयोगेण त्रिविधा अङ्का: क्रमशो भवन्ति । प्रवेशको विष्कम्भकश्च मध्यवर्तिदृश्यमेव ।[1] एतत्तु साधु प्रोक्तं, किन्तु अङ्कावतार:, अङ्कमुखं कदाप्यर्थोपक्षेपणे न समर्थौ इति तेन न प्रकटितम्[2] । अस्माकं मतेनैतौ अर्थोपक्षेपकौ वस्तुतो न स्त: ।

अङ्कावताराङ्कमुखेऽङ्कस्याभेद्याङ्गं स्त: । अस्मादपि कारणात् तयो: सूच्यमिति दृश्यांशात् पृथक् स्थितिर्न भवितुमर्हति ।

अभिनवगुप्तोऽपि अङ्कावताराङ्कमुखं इति द्वयमदृष्टार्थस्य हृदि प्रवेशनिमित्तं मन्यते । तत् सर्वथा चिन्त्यमेव ।[3] न तत्र कश्चिदर्थो निवेद्यते । केवलं ते त्रिविधाङ्केषु वर्णिता कथां योजयत:, इति कोहलेनापि स्पष्टीकृतमधोलिखित कारिकायाम्

अङ्कान्तर एवाङ्को निपतति यस्मिन् प्रयोगमासाद्य ।

नाट्यार्थकथायोगाद् विज्ञेयोऽङ्कावतारोऽसौ ॥[4]

---

१. द्विधाङ्कोऽङ्कावतारेण चूडयाङ्कमुखेन वा ।
अर्थोपक्षेपणं चूडा वह्नर्थः सूत्रविन्दभि ॥
इति ना० शा० १८ १६ अधिकृत्य भारत्या कोहलमतम् ।

The orignial conception of Arthopakṣepaka, consisting of three types of Aṅkas (marked by Aṅkāvatāra, Aṅkamukha and Cūlikā) and two types of scenes, the Praveśaka and Viṣkambhaka, was totally lost.

Naṭakalakṣaṇaratnakoṣa P. 190.

२. चट्टोपाध्यायेनापि साधु निगदितम्—Other three are not treated as scenes. They denote mode of the beginning of Acts. किन्तु नैतेन तानि अर्थोपक्षेपका भवन्ति ।

३. अदृष्टमप्यर्थं हृदि प्रवेशयन्तीति प्रवेशका । चूलिकाङ्कावताराङ्कमुख-प्रवेशक-विष्कम्भा इत्यभिप्रेता: ना० शा० १८-२६ अधिकृत्य भारती ।

४. ना० शा० १८-२८ अधिकृत्य भारत्यां कोहलमतमुद्धृतम् ।

तदयमत्र निष्कर्षो यत् पूर्वोत्तराङ्कयोः कथायोगं विधातुं प्रवेशक-विष्कम्भक-चूलिकाङ्कावतारा-ङ्कमुखानामुपयोगो भवतीति निश्चप्रचम्। अनया हाभ्याङ्कयोरर्थ-सन्निधानेन सर्वेषामेककार्यता वर्तते। किन्तु अङ्कावता-रस्याङ्कमुखस्य चार्थोपक्षेपणं सूच्यत्वं वा वितथमेव।

प्रवेशकस्तु भारतीये नाट्यशास्त्रे प्रवेशकविष्कम्भक-चूलिकाङ्कावतारा-ङ्कमुखानां स्थानीय इत्यभिनवगुप्तस्य मतं न साधु।[1]

---

१. प्रवेशकशब्दस्य महासामान्यवचनः पंचसु वृत्तः। ना० शा० १८·२६ अधिकृत्य।

११

प्रवेशक-विष्कम्भक-विमर्शः

प्रवेशक-विष्कम्भकौ तु लघु दृश्यमेव। तत्र न केवलं सूच्यमेव वर्ततेऽपितु दृश्यमपि भवितुमर्हति। सूच्यं तु बीजफलानुवर्तिकथांशानां प्रकाशनाय स्यात्, किन्तु तत्र दृश्यं बीजफलैरसम्बद्धकथांशानां विषये निर्बाधमेव भवति। अभिज्ञानशाकुन्तलस्य षष्ठाङ्कस्य पूर्वं प्रवेशके रक्षिभ्यां धीवरस्ताड्यते। नेदं दृश्यं फलानुवर्ति। अस्मिन्नाटके चतुर्थाङ्कात् पूर्वं विष्कम्भके प्रियंवदानुसूययोः कुसुमावचयस्याभिनयः प्रदर्श्यते। अयमप्यभिनयो नास्ति फलानुवर्ती। अत एव प्रवेशक-विष्कम्भकयोरभिनयशून्यत्वं न प्रतिपादनीयम्। तत्र दृश्यमपि वर्तत एव।

साधारणतः प्रवेशकविष्कम्भकयोः पात्राणि अपरेषां वृत्तान्येवोद्घाटयन्ति। किन्तु अपवादरूपेण ते स्वकीयमपि भूतकालिकं कार्यजातं क्वचिदुद्घाटयन्ते। रत्नावल्यां प्रथमाङ्कात् पूर्वं विष्कम्भके यौगन्धरायणः कथयति—मयापि चैनां देवीहस्ते सगौरवं निक्षिपता युक्तमेवानुष्ठितम्।[1]

रूपकेषु सर्वं सूच्यं च दृश्यं च वस्तुजातं प्रेक्षकैर्विज्ञेयं भवति। तत्र कथायाः कियानंशः प्रत्यक्षमभिनय-द्वारेणाङ्केषु दर्शनीयः, कियांश्चाङ्केषु वर्णनामात्रेण सविस्तरं विज्ञापनीयः, कियांश्च दर्शनीयोऽदर्शनीयो वा विष्कम्भ-प्रवेशकयोः संक्षेपेण परिचारकेभ्यः लघुपात्रेभ्योऽनुत्तमेभ्यो वा विज्ञापनीय इत्येतत् सर्वं कविः कलासौष्ठवमापादयन् निर्धारयति, तदनुसारं तस्य विनिवेशनमङ्कादिषु विदधाति। नाटकीयकथा वस्तुतो नदीप्रवाह इव प्रवर्तते। यत्र सर्वोत्तमो भागो मध्ये वर्ततेऽङ्कोचितः सन्। तेन संलग्ना इव नेपथ्योक्तिनितरां प्रभावपूर्णा भवति। तटासन्ना तु प्रवेशक-विष्कम्भक-कथाधारा नातिचटुलं प्रवहति किन्तु कथा-प्रसारापेक्षया सुदीर्घा भवन्त्येव। एते सर्वे समुदिताः कथाधारायाः सम्यक्त्वं विदधति।

१ नेदं यौगन्धरायण-वृत्तं विष्कम्भकोऽपि तु एकोक्तिरेव प्रथमाङ्कस्याङ्गमेवेति मतमस्माकम्।

प्रवेशक-विष्कम्भकौ 'त्वङ्कार्थसन्धानाय भवतः' इति तयोः परं प्रयोजनं स्पष्टीकृतमभिनवगुप्तेन।

प्रवेशक-विष्कम्भकयोरपरं प्रयोजनं भवति—अदर्शनीयस्य वस्तुजातस्याङ्कानां प्रस्तावना-रूपेण प्रकटीकरणम्। तत्रादर्शनीयता तु विविधप्रकारा भवति। अङ्क एकाहवृत्तमेव निवेशनीयम्।[1] नाटकेषु अधिकतमा अंका दश एव भवेयुः। तर्हि केवलं दशदिनानां तत्र कथा स्यात्। किन्तु नाटकेष्वनेकवर्षाणामपि कथा प्रवर्तते। सा दीर्घावधि-विस्तृता कथा प्रवेशकविष्कम्भकयोर्निवेश्यते। अत एव द्वयोरङ्कयोः कालगतावकाशे यद् घटितं तत् वृत्तजातं प्रवेशकविष्कम्भकयोर्निवेश्यते।[2]

अन्यविधा अदर्शनीयता लोकरुचि-प्रतिकूलतामाकलय्य निर्धारिता। तस्या विवरणमङ्कलक्षणे वक्ष्यते।

रंगपीठस्य क्षेत्रसीमा वर्तते। तत्र सीमितक्षेत्र एव घटितं कार्यजातं दृश्यं भवेत्। तस्माद् बहिर्घटितं कार्यजातं प्रायशः प्रवेशक-विष्कम्भकाभ्यां सूचनीयम्। यदि कश्चित्पुरुषो दूरं गच्छति, तर्हि तस्य दूरयात्रा प्रवेशकविष्कम्भकाभ्यामेव सूचनीया।[3] कतिपयरूपकेषु 'परिक्रम्य' इति नाटितकेन सूचयित्वा पात्रस्य दूरदेशगमनं कल्पयित्वा दूरं घटितं कार्यजातमपि दृश्यानुक्रमेणैकस्मिन्नेवाङ्के निवेश्यते। नेयं रीतिः साधुः।

१. एकदिवसप्रवृत्तं कार्यस्त्वङ्कोऽर्थबीजमधिकृत्य।
आवश्यककार्याणामविरोधेन प्रयोगेषु॥ ना० शा० १८. २१
तेन पञ्चाङ्कं नाटकं पञ्चकार्यदिनानीति संक्षेपः। दशाङ्कं तु दशेत्यभिनवभारती १८. २१।

२. तत्र भरतप्रतिपादितो नियमः

अङ्कच्छेदं कृत्वा मासकृतं वर्षसंचितं वापि।
तत्सर्वं कर्तव्यं वर्षादूर्ध्वं न तु कदाचित्॥ १८. ३१

इदमधिकृत्याभिनवगुप्तेन प्रोक्तम्—यस्मान्मासकृतं वर्षसञ्चितं वा यच्च तत्कार्यं सामाजिकानां हृदयगतं तस्मात् प्रवेशक-विष्कम्भकौ कर्तव्यौ। परिमितं तु यदनुसन्धेयं तत्राङ्कमुखमल्पानुसन्धेयं चूलिका, अल्पतमे अङ्कावतारः। नैतद्व्यवहारोपयोगिमात्रं चिन्त्यमेव।

३. ना० शा० १८. ३२

भरतानुसारं प्रवेशकस्य बहूनि प्रयोजनानि सन्ति । तद्यथा,

कालोत्थानगतिरसो व्याख्या संरम्भकार्यविषयाणाम् ।
अर्थाभिधानयुक्तः प्रवेशकः स्यादनेकार्थः ॥ ना० शा० १८.३५

अभिनवगुप्तानुसारेण 'कालोदयस्य गतिरवगमो यतः कालोदयसूचकः कश्चित्प्रवेशकः । यथा–अज्ज वसन्दमहूसवे सबहुमाणमाहूय' इत्यादि रत्नावल्यां प्रथमाङ्कात् पूर्वं विष्कम्भके । केनचित् प्रवेशकेन गूढं व्याख्यायते । तथा तापसवत्सराजे अमात्य-प्रणिधि —"मामिज्जई असवासएहि हालाहलस्स पमादसंकिदा ।" अत्रगूढं पदं व्याख्यातम् । संरम्भस्तु उपायान्वेषणादि तदभिधानयुक्तः प्रवेशकः । कार्यं तु यदाधिकारिकमित्यादि । तस्यार्थं पंचाङ्गस्यानुष्ठानम् ।

अर्थोपक्षेपकेषु पात्राणां निर्धारणं भरतेन विहितम्—

परिजनकथानुबन्ध प्रवेशको नाम विज्ञेयः । १८.२८

तत्र के ते सन्ति परिजना इति विशदयन्नभिनवगुप्तः स्पष्टयति -

परिजनकथानुबन्ध इति चतुर्णां लक्षणम् सूतमागधादेश्चूलिकाङ्कस्य, स्त्रीपुरुषादेर्वाङ्कमुखोपकरणस्य, चेटीकंचुकीयादेर्वा प्रवेशकविष्कम्भोपयोगिनः । नैष नियमो व्यवहारोपपन्नः । तथा हि रत्नावल्यां यौगन्धरायणो महामन्त्री स्वयमेव विष्कम्भकं एकोक्ति प्रस्तावयति । अभिज्ञानशाकुन्तले षष्ठाङ्कात् पूर्वं तु प्रवेशके रक्षिणौ, धीवरश्च संवाद-परायणाः । सूतश्चेटकंचुकीयादयो राजभृत्या नायकवृत्तान्तकोविदाः प्रवेशकविष्कम्भकयो पात्राणि स्युर्नाम, किन्तु प्राप्येषु नाटकेषु नैष नियमोऽङ्गीकृतः कविवरैः ।

रूपकेषु कति प्रवेशकविष्कम्भकाः स्युरितिनियमयन् भरतः प्राह—

अङ्कान्तरसन्धिषु च प्रवेशकास्तेषु तावन्तः । १८.२९

इह तु मध्यमामान्ये प्रवेशकविष्कम्भकद्वयं वर्तेत इति भरताभिप्रायं विवृणोत्यभिनवगुप्तः ।

प्रवेशकविष्कम्भकयोः स्थितिः कुत्र स्यादिति दशरूपके नियमितम्—'प्रवेशोऽङ्कद्वयस्यान्तः' इति अर्थात् द्वयोरङ्कयोर्मध्ये एव प्रवेशको निवेशनीयः ।[1]

1. आधुनिकयुगे प्रकाशितेषु रूपकेषु प्रवेशकविष्कम्भको उभौ अङ्कयोर्मध्ये न निवेश्येते अपि तु अङ्कस्य भाग एव प्रदर्श्येते । इयं त्रुटिः संशोधनीया । यतो हि नामाङ्कस्तु दृश्यवस्तु-निवेशनाय भवति, न तत्र सूच्यादिकं निवेशनीयम् । धनञ्जयेन स्पष्टमेव प्रोक्तम्—एभिः संसूचयेत् सूच्यं दृश्यमङ्कैः प्रदर्शयेत् । १. ६३ । अर्थात् दृश्यसूच्ययोरवस्थानं पृथक् पृथग्भवेत् । नानयोरेकत्रस्थितिः समीचीना ।

चूलिका नेपथ्योक्तिश्च

'चूलिकैव नेपथ्योक्तिरिति बहूनां नाट्याचार्याणामभिमतं न साधु' इत्यस्माकं प्रतिपादनीयम् ।

चूलिका

चूलिकाया व्युत्पत्तिश्चूलाया भवति । इयं चूला राजप्रासादस्य चन्द्रशालेति तत्र शिखरस्थः कक्ष आसीत् ।[1] तत्र सूत-मागध-वन्दिनः काले-काले राजप्रशंसामधिकृत्य श्लोकानगायन्, कालगतिमसूचयन्, राज्ञो विजयादीरुपलब्धीर्वर्णयंश्च । तेषां गानमेव चूलिकेति प्रसिद्धमासीत् । मूलतो नाट्यशास्त्रीया चूलिकोपरिवर्णितैवासीत् । गायकास्तु मागधादयः पात्राणि नासन् । ते केवलं सन्देशवाहका एव । पात्राणि तु फलानुवर्तिकार्य-घटका एव भवन्ति ।

शिशुपालवधे वैतालिकानां (सूतमागध-वन्दिनां) कलगिरो वर्णिताः—

> वैतालिकाः स्फुटपद-प्रकटार्थमुच्चै—
>
> र्भोगावलीः कलगिरोऽवसरेषु पेठुः ॥ ५.६६

इयं चूलिका रूपकेषु प्रायशोऽङ्कान्ते निवेश्यते, अपराङ्कस्य च कथावस्तु सङ्केतयति । अतएव चूलिकायाः प्रयोजनमङ्कानामनुसन्धानं प्रतीयते । तद्यथाभिनवगुप्तेन प्रतिपादितम्—

---

१. राजप्रासादानां गोपुरस्य द्विपार्श्वयोर्नाट्यशाले आस्ताम् । वर्धमानचरिते १८.११ गोपुराणि नगरद्वाराणि बभूवुः । मन्दरोपमैर्गोपुरैः नगरं रक्षितमिति महाभारते—

> द्विपक्षगरुड-प्रख्यैर्द्वारैः सौधैश्च शोभितम् ।
>
> गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः । १.२०८-३१

मानियर-विलियम्स-महोदयस्य कोशानुसारेण चूलः प्रासाद-शिखरकक्षः—A top-room of house अस्ति । अमरकोशानुसारेण चन्द्रशाला शिरोगृहम् । तत्र संगीतमासीदिति—विदग्धनः पुरस्य चन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति । रघु० १६.४० इत्यनेन प्रमाणितम् ।

'अत्रार्थस्य कस्यचित् सम्यगन्यत एवानभिसन्धानपूर्विकाप्तिः प्राप्तिरिति चूडा दर्शिता। तद्यथा रत्नावल्यां वैतालिकपाठाद् 'दशामुदयनस्य' इत्यन्त उपयोगी सम्यगर्थः प्राप्तः। तत्प्रत्यभिज्ञामूलत्वात् सागरिकानुरागस्य चूलिकया यदोत्तराङ्कस्य कथा-सङ्क्रान्तिः स्यात् तदा सोऽङ्कः चूलिकाङ्क इति कथ्यते।'[1] इयं चूलिका नेपथ्योक्तेः सर्वथा भिन्नैव। द्वयोः साम्यं त्वियन्मात्रमेव यदभिनयकर्मणि चूलोक्ति, नेपथ्योक्तिश्चोभये नेपथ्यस्थानादुच्यते। मूलतश्चूलिका चन्द्रशालायाः सूतमागधादिभिर्गीतेति प्रसिद्धम्।

नेपथ्योक्तिः

रंगे तु सीमितक्षेत्रस्य कार्यजातं दृश्यं विधीयते। तत्रस्थाः कतिपय पुरुषाः सीमितक्षेत्रस्य रञ्जकघटना अभिनयद्वारेण प्रेक्षकाणां समक्षं प्रदर्शयन्ति। तस्मात् क्षेत्राद्बहिर्घटितानामुपक्रमाणां रंगस्थपात्राणां प्रेक्षकाणां चोपरि प्रभावो यद्यासीत्तर्हि नेपथ्ये स्थितः पुरुषः पात्रं वा वागभिनयपूर्वकं स्वानुभूतं दृष्टं वा प्रकटीकरोति स्म।[2] अस्या नेपथ्योक्तेर्भृशं प्रभावोऽभवत्। नेपथ्योक्तेः पश्चात् रंगतः पूर्वं प्रवर्तमाना कथा निरुध्यते, किंचिदभिनवं च कार्यम्, अभिनवा च स्फूर्तिः समुत्पद्यतेतराम्। तथा हि अभिज्ञानशाकुन्तले दुष्यन्तः प्रसूति-विकलो मनस्तापं प्रकटयति। तस्मिन् काले नेपथ्योक्तिः श्रुता तेन—

अब्रह्मण्यम्, भो वयस्य, अविहा, अविहा एष मा कोऽपि प्रत्यवनत-शिरोधरमिक्षुमिव त्रिभङ्गं करोति। अस्मिन् प्रसंगे नेपथ्यं रंगस्य भाग इव वर्तते, यत्र स्थितो विदूषको दुष्यन्तेन संलपति। नेदं चूलिका वा सूच्यं वा। अस्मिन् संवादे वर्त्तमानघटनामधिकृत्य वागभिनयो वर्तते। सूच्ये वस्तुतोऽतीत-घटनाया विज्ञप्तिर्भवति।

उत्तररामचरिते तृतीयाङ्के रामस्य नेपथ्योक्तिरस्ति-

विमानराज, अत्रैव स्थीयताम्।

इयमुक्तिस्तु रामस्य भूमिकाया पात्रं वागभिनयपूर्वकं प्रस्तौति। अतएव सीता तां श्रुत्वा वक्ति 'अम्हहे, जलभरभरितमेघमन्थर-स्तनित-गम्भीर-मांसलः कुतो न्वयभारती-निर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकयति।

---

१ ना० शा० १८।१६ अधिकृत्य भारती।

२ अत्रेदं विचारणीयं यत् चूलिकाया वक्ता पात्रं नाभवत्। स तु केवलं सूचकोऽभवत्। तस्य वागभिनयस्य महत्त्वं प्रेक्षकेभ्यो नासीत्। प्रागेव निर्दिष्टं यत् पात्रं नाम स भवति यस्य कर्तृत्वं साक्षादेव फलानुवर्ति। न खलु सूचकाः, सन्देशवाहकाः, दूता वा पात्राणि सन्ति।

अभिनयस्य तु चतुर्ष्वङ्गेष्वाङ्गिकाभिनयो वाचिकाभिनयश्च प्रधानौ। आङ्गिकाभिनयो नेत्रयोर्विषयभूतो वाचिकाभिनयश्च श्रवणयोर्विषयभूतो रञ्जयति। नेपथ्योक्तिस्तु श्रवणविषयभूता रञ्जयति। अतएव नेयं सूच्यं केवलं ज्ञान-विषयो वा, अपितु आनन्दविषयः श्रोत्रगोचरी,अभिनय-सम्पन्ना च दृश्यमिव रोचिष्णुः।

चूलिकाया वक्ता सूतमागधवन्द्यादयः सन्ति। अत्र रामः प्रधाननायक एवनेपथ्योक्तेर्वक्ता। किं पुनः प्रधाननायकोऽपि चूलिकां प्रस्तौतीत्यन्या विप्रतिपत्तिः स्यात् यदि चूलिका नेपथ्योक्तिश्च पर्याये मन्येते।[1]

नेपथ्योक्त्या यद्वृत्तं प्रस्तूयते, तदाकस्मिकं भवति। तस्य पूर्वापराणि संविधानान्यूह्यानि भवन्ति। तद्यथा भीमस्य नेपथ्योक्तिर्विद्यते—

कृष्टा येन शिरोरुहे नृपशुना पाञ्चाल-राजात्मजा
येनास्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः।
यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवान्
सोऽयं मद्भुजपंजरे निपतितः संरक्ष्यतां पाण्डवाः॥३.४७

'दुःशासनस्य भुजपंजरे ग्रहणात् प्राक् किमभवत् पश्चाच्च किमभवत्' इति प्रेक्षकाणामूह्यमेव। अतएव पूर्वापरासम्बद्धाकस्मिकी च नेपथ्योक्तिः संक्षिप्ति-कौशलेन निर्वाह्यते। इयमेव तस्या विशेषता।

यत्र नेपथ्योक्त्या पात्रं रङ्गं प्रविशति, नेपथ्ये च कलकलध्वनिः श्रूयते— नैतत्सर्वं चूलिकां विदधाति। प्रथमा नेपथ्योक्तिः तावत्पात्रप्रवेश-विधिः। द्वितीया च बाह्यजगतः प्रवृत्तिः पात्राणां विज्ञप्तयेऽभिनय एव। नेपथ्योक्तिस्तु सन्ध्यन्तर-मिति मातृगुप्तस्याभिमतम्। तदप्यस्याश्चूलिकाया विभेदं प्रकटयति।

आकाशवाणी

आकाशवाण्या अपराणि नामानि आकाश-वचनम्, अशरीरिणी भारती, अमानुषी वाक् च सन्ति। सेयमाकाशवाणी नाट्यधर्मी वर्तते। नेपथ्योक्तिस्तु लोकधर्मी भवति। अन्यच्च तयोरन्तरमिदमेव स्पष्टं स्याद्यन्नेपथ्योक्तेर्वक्तान्यत्र नाटकीयं पात्रमावश्यकतानुसारि भवति। आकाशवाण्या वक्ता काचिद् देवता पात्रं भवितुं नार्हति क्वचिदप्यन्यत्र तस्मिन् रूपके। स एव पुरुषः पात्रत्वमर्हति यस्य कार्याणि प्रत्यक्षतो गौणतो वा फलानुवर्तीनि। कार्याणां घटकत्वेन पात्रत्वं स्यात्।

आकाशवाण्याः परं प्रयोजनं तस्याः प्रामाणिकता स्यात्। इदमपि तस्या

---

१. 'चूलिकाया वक्ता सूतमागधादयो हीनकोटिकाः पुरुषा भवेयुः, न तु रामादयो महात्मानः' इति शास्त्र-सम्मतम्।

नेपथ्योक्ते वैशिष्ट्यम् । वेणीसंहारस्य तृतीयाङ्केऽश्वत्थामा दुःशासनं रक्षितुं जिगमिषति । तदाकाशवाणी बभूव—[1]

महात्मन्, भारद्वाजसूनो, न खलु सत्यवचनमनुल्लंघितपूर्वमुल्लंघयितुमर्हसि ।

सर्वैः सर्वथा अज्ञातः सन्देश आकाशवाण्या विज्ञाप्यते नैतत्प्रयोजनं नेपथ्योक्तेः । दूरमपि सद्योघटितस्य वृत्तस्योद्घाटनं नेपथ्योक्त्या सम्भवति ।

---

१. वेणीसंहारे इयमाकाशवाणी नेपथ्योक्तिरिति मुद्रिता । नैतत् साधु ।

वाचिकश्चित्राभिनयः

१३

श्रव्य-विधानं नाट्यधर्मश्च

कोऽयं नाट्यधर्मः ? रंगपीठेऽभिनयस्य सौष्ठवाय सौकर्याय चालौकिक-विधानमपि स्वीक्रियते । तदेव नाट्यधर्मः ।[1] स खलु नाट्य एव सम्भवति । तद्द्विविधं भवति – उक्ति-प्रत्युक्ति-विधाने वाचिकाभिनयप्रसङ्गेन, कर्म-विधाने-चाङ्गिकाभिनय-प्रसङ्गेन । नाट्यधर्मोऽलोकसामान्यो भवति, लोकधर्मश्च लोकसामान्यो भवति ।[2]

वाचिकाभिनय-प्रसङ्गेन नाट्यधर्मोऽभिनवगुप्तेन व्याख्यातः —

यत उक्तप्रत्युक्तमहिम्ना चाकाश-भाषितात्मकमप्यलौकिकरूपं स्वीकुर्वता तत्सहचरं स्वगत-जनान्तिकापवारितकाद्युपलक्षितम् ।[3]

प्रकाशम्

नाट्ये लोकसामान्यः प्रकाशाभिनयो भवति, येन रङ्गपीठे कस्यचित् पात्रस्योक्तिमन्यानि सर्वाणि पात्राणि शृण्वन्ति । दशरूपके इदं प्रकाशं नामोक्ति-प्रत्युक्ति-विधानं वर्णितम्—सर्वश्राव्यं प्रकाशं स्यात् ।१.६४

१. दशरूपके यो नाट्यधर्मश्चर्चितः १.६३-६७, स एव भारतीये नाट्यशास्त्रे चित्राभिनयः पञ्चविंशेऽध्याये प्रपंचितः । अभिनवगुप्तः स्पष्टयति—वाचिक-प्रसङ्गात् चित्राभिनयं वक्तुं प्रतिजानीते – आकाशवचनानीत्यादि । ना० शा० २५.८५ अधिकृत्य भारती ।

२. तद्विपरीतो लोकधर्मो लोकसाधारणं कर्म व्यनक्ति ।

स्वभावापगतं शुद्धं तु विकृतं तथा
लोकवार्ता क्रियोपेतमङ्गलीला-विवर्जितम्
स्वभावाभिनयोपेतं नानास्त्रीपुरुषाश्रयम् ॥ ना० शा० १३.७१-७२

यदि कश्चित् पुरुषः वृक्ष-लता-पुष्पादीनि विनापि पुष्पावचयाभिनयं प्रस्तौति, जलं विना रंगे स्नाति, तदा नाट्यधर्मानुसारेऽभिनयो भवति ।

३. ना० शा० २६.१३६ अधिकृत्य भारती ।

स्वगतम्

नाट्यधर्मविधानं प्रथमं तावत् स्वगतमिति सर्वस्याश्राव्यं भवति। स्वगतमेवात्मगतमिति भरतेन प्रोक्तम्—

हृदयस्थं वचो यत्तु तदात्मगतमिष्यते।
सवितर्कं च तद्योज्यं प्रायशो नाटकादिषु॥
हृदयस्थं सविकल्पं भावस्थं चात्मगतमेव॥ २५.८८-९०

एतत्सर्वं संक्षिप्तमेव दशरूपके निगदितम्—'अश्राव्यं स्वगतं मतम्' इति।

स्वगतस्य योजनं रूपकेषु त्रिविधं वर्तते। (१) प्रकाशात्पूर्वम् (२) प्रकाशात्पश्चात् (३) स्वतन्त्रमेव प्रकाशं विना।[1] प्रायशः प्रकाशात् पश्चादेव स्वगतं दृश्यते।

इदं स्वगतमेव संस्कृतनाट्यशास्त्रे सिद्धान्ततो रूपकेषु च व्यवहारतः प्रचलति। एकोक्ति (soliloquy) स्थानेऽपि स्वगतमेव प्रयुज्यत इति न साधु। एकोक्तिस्तु वस्तुतः पृथगेवेति प्रतिपादयामः। एकोक्तौ प्रत्युक्तिर्नास्त्येवेति महत्त्वं भजते।

एकोक्तिः

एकोक्तिर्नाम रङ्गमञ्चे कस्यचित् पात्रस्य स्वकीयमनोदशाविज्ञापनमेव। इयमेकोक्तिरपरस्य कस्यचित्पात्रस्य प्रत्युत्तरं न भवति, न चान्यस्य कस्यचित्पात्रस्य प्रत्युत्तरमपेक्षते। अतएवैकोक्तिः संवादो (dialogue) न भवति। तथाहि भासस्याविमारके द्वितीयाङ्के चतुर्थाङ्के च प्रवेशकस्य पश्चात् रङ्गमञ्चे एकाकी वर्ततेऽविमारकः। तस्यैकोक्ती अधोलिखिते स्तः। द्वितीयाङ्के

अविमारकः—

अद्यापि हस्तिकरशीकरशीतलाङ्गीं
बालां भयाकुलविलोलविशालनेत्राम्।
स्वप्नेष्व नित्यमुपलभ्य पुनर्विबोधे
जातिस्मरः प्रथमजातिमिव स्मरामि॥ २.१

अहो बलमनङ्गस्य कुतः,—

दृष्टिस्तदाप्रभृति नेच्छति रूपमन्यद्
बुद्धिः प्रहृष्यति विषीदति च स्मरन्ती।
पाण्डुत्वमेति वदनं तनुतां शरीरं
शोकं व्रजामि दिवसेषु निशासु मोहम्॥ २.२

१. स्वप्नवासवदत्ते ब्रह्मचारिणः 'अनाहारे तुल्यः' इत्यादि श्रुत्वा वासवदत्ता—(स्वगतम्) दिट्ठिआ सुणिक्खतो दाणीं अय्यउत्तो।

अथवा अयुक्तमधृतित्वं पुरुषाणाम् । सङ्कल्प्यमानो हि विजृम्भते मदनः । तस्मादहमिदानीं न सङ्कल्पयामि । (स्मृत्वा) अहो तस्या रूपसम्पद्, रूपानुरूपं यौवनं, यौवनसदृशं सौकुमार्यम् ।

अत्र हि—

प्रतिच्छन्दं धात्रा युवतिवपुषां किन्नु रचितं
गता वा स्त्रीरूपं कथमपि च ताराधिपरुचिः ।
विहाय श्रीः कृष्णं जलशयनसुप्तं कृतभया
धृतान्यस्त्रीरूपं क्षितिपतिगृहे वा निवसति ॥२.३

कथमहं पुनरारब्धाश्चिन्तयितुम् । किमिदानीं करिष्ये । मनश्च तावदस्मदिच्छया न प्रवर्तते । इह हि,

प्रतिषिद्धं प्रयत्नेन क्षणमात्रं न तिष्ठते ।
चिराभ्यस्तपथं याति शास्त्रं दुर्गुणितं यथा ॥२.४

अथवा न शक्यं मनो जेतुम् । चिन्तयिष्याम्येनाम् । अहो सर्वेषां स्त्रीगुणानामेकत्र समवाय । (चिन्ताभिभूत उपविशति)

चतुर्थाङ्कः च

(ततः प्रविशत्यविमारकः)

अविमारक — (सशोकम्)

कन्यापुरात् कथमपीह विनिर्गतं मे
भाग्यावशेषमवलम्ब्य शरीरमात्रम् ।
अद्यापि तन्मम मनो न तु मामुपैति
नावेक्षते मयि तया प्रियया निबद्धम् ॥४.१

का नु खलु भवेदवस्था कुरंग्याः ।

ह्रीता भवेत् प्रच्यजनप्रवादैर्भीता च राज्ञः ह्रदमभिरुद्धा ।
बाष्पाविला मामनवेक्षमाणा मोहं व्रजेद् रात्रिषु किं करिष्ये ॥४.२

हन्त दृष्टः प्रतीकारः । तथापि तावदस्मदपेक्षया नापेक्षित आत्मा तस्मादहमपि तावत् तदर्थे प्राणान् परित्यजामि । (परिक्रम्य) कतिपयदिवसप्रोषितोऽहमस्मि । अद्य तु मानसं शारीरं च दुःखमसह्यमिव मे प्रतिभाति । इह हि,

निर्व्याजं परिचयवर्धमानरागां
रूपाढ्यामभिनवयौवनां मनोज्ञाम् ।
त्यक्त्वा तां क्षणमपि वञ्चितोऽस्मि ,जीवन्
कष्टोऽन्यः क इह भवेत् कृतघ्नभावः ॥४.३

सम्प्रति हि मदनेनान्तर्दह्यमानस्य क्षारीभवितुमारब्धो भगवान् सूर्यः सहस्ररश्मिः। (सर्वतो विलोक्य) अहो प्रतिभयता निदाघस्य। सम्प्रति हि,

अत्युष्णा ज्वरितेव भास्करकरैरापीतसारा मही
यक्ष्मार्ता इव पादपाः प्रमुषितच्छाया दवाग्न्याश्रयात्।
विक्रोशन्त्यवशाद्विवोच्छ्रितगुहाव्यात्ताननाः पर्वता
लोकोऽयं रविपाकनष्टहृदयः सयाति मूर्च्छामिव ॥४.४

किमिदानीं करिष्ये। न चास्म्यहं गन्तुं समर्थः। कुतः,

लिम्पन्ति रूक्षपवनाः सिकताग्नि-चूर्णैः
संस्वेदयन्ति च नगाः परुषैः पलाशैः।
दावैर्द्रवीकृततनुः स्रवतीव भास्वा—
नादित्यपाकचलितः फलतीव लोकः ॥४.५

हा प्रिये! हा सुन्दरि! देहि मे प्रतिवचनम्।
(मूर्च्छां नाटयति। पुनर्निःश्वस्य। ऊर्ध्वमवलोक्य)
रुद्धः खलु भगवान् सूर्यः सहस्ररश्मिः। अथवा,

किमत्र चित्रं वितताः पयोदा
रुन्धन्ति सूर्यं ननु वातनीताः।
अन्तःस्थितं मे यदि वारयन्ति
कामं भवेद् विस्मयनीयमेतत् ॥६॥

किमनेन जीवन्मरणेन। विसर्जयिष्याम्यात्मानम्। (उत्थाय परिक्रामति) किन्नु खलु करिष्ये। भवतु दृष्टम्। अस्मिन्नारण्यतटाके विसर्जयिष्याम्यात्मानम्। धिगधमं खलु मे मरणमार्गः। अभिमानमोहान्महापथो विस्मृतः। अन्यथा प्रयतिष्ये (विलोक्य) भवतु दृष्टम्। अये अदूरे दृश्यते दवाग्निः। तस्मिन् प्राणाहुतिं करिष्यामि। (उपगम्य प्रणम्य च) भगवन् अग्ने!

इष्टं चेदेकचित्तानां यदग्निः साधयिष्यति।
परत्रापि च मे कान्ता सा भवेदेककीर्तनी ॥७॥

(अग्निं प्रविश्य सकुतूहलम्) किमिदं वर्तते।

दग्धाः स्फुलिङ्गनिकरैर्निपतन्ति वृक्षा
ज्वालाश्च मे मलयचन्दनपङ्कशीताः।
अग्निर्दयां हि कुरुते मदनातुरेऽपि
पुत्रं पितेव च परिष्वजति प्रहृष्टः ॥८॥

भोः। किमतः परं विस्मयनीयम्। अग्निः खलु मां न दहति। अथवा

एतदप्यस्ति कारणम् । अन्यथा प्रयतिष्ये (परिक्रम्य) एष खलु महान् पर्वतः,

> अमितजलदवृन्दैर्मिश्रसन्दिग्धशृङ्गो
> गगनचरकुलानां विश्रमस्थानभूतः ।
> मुक्तविमतिविचित्रो मित्रसयोगहृष्टो
> नरपतिरिव नोच्चो दृश्यते निष्फलाढ्यः ॥६॥

भवतु तावदस्मिञ्छैले प्राणान् परित्यजामि । मरुत्प्रपातो हि सर्वार्थ-साधकः । यावदारोहामि । (आरुह्यावलोक्य) एतत् पानीयं गोत्रस्थं स्नात्वोप-स्पृश्य मन्त्रं जपामि । (तथा कृत्वा जपति) ॥

अभिज्ञानशाकुन्तले प्रथमाङ्कस्यान्तभागे रङ्गमञ्चे राजैवैकं पात्रमस्ति । तस्यैकोक्तिर्वर्तते—

राजा— मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावदनुयात्रिकान् समेत्य नातिदूरे तपोवनस्य निवेशयेयम् । न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम् । मम हि

> गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
> चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ १.३२

संस्कृतरूपकेषु प्रायः सर्वेष्वेकोक्तीनां प्रयोगो वर्तते ।

एकोक्तिः स्वगतं च

एकोक्त्या सह क्वचित् स्वगतं प्रवेशकश्च भवत इति स्वगतप्रवेश-कयोरेकोक्तेः वैशिष्ट्यं निर्वचनीयम् । प्रथमं तावत् स्वगतस्य प्रासंगिकं विभेदकं लक्षणमवधेयम् ।

१. स्वगतं शनैरुच्यते येन रंगमञ्चस्थान्यानि पात्राणि स्वगतभाषणं न शृणुयुः । एकोक्तिस्तारस्वरेण प्रोच्यते । यदि रंगमञ्चेऽन्यत्किञ्चित्पात्रं भवति तदपि श्रवणं करोति । कस्मादपि पात्रात् किंचिद् गोपनीयं रहस्यं न निगद्यते ।
२. स्वगतं तु संवादांश एव । अतएव प्रत्युत्तरं भवति । एकोक्तिः संवादांशो नास्ति रङ्गमञ्चे एकपात्रत्वात् । नेयं प्रतिक्रियात्मकं प्रत्युत्तरं वा ।
३. एकोक्तौ एकमेव पात्रं मुख्यतः स्वकीयां मनोदशां विज्ञापयति । स्वगते नैष नियमः ।
४. एकोक्तिर्लोकधर्मी स्यात्, स्वगतं च नाट्यधर्मी ।

एकोक्तिः विष्कम्भकादयश्च

१. विष्कम्भकप्रवेशकयोः प्रायशः संवादमुखेन कतिपयपात्राणि वृत्तवर्तिष्यमाणान् कथांशान् निदर्शयन्ति । वृत्तवर्तिष्यमाणकथानिदर्शनमेकोक्तौ नापेक्षितम् ।[१] विष्कम्भकप्रवेशकयोः क्वचिदेकमेव पात्रं भवति ।[२] तत्र संवादस्तु न भवति किन्तु कथांशसूचनं भवत्येव । विष्कम्भकप्रवेशकयोः कस्यचिदङ्कस्य कथात्मकभूमिका निदिश्यते । एकोक्तिस्तु क्वचिदागाम्यङ्कस्य कार्यव्यापारस्य मानसिकीं भूमिकां प्रस्तौति ।

२. एकोक्तिः कस्यचिदङ्कस्यादौ मध्येऽन्ते वावश्यकतानुसारं प्रयुज्यते । विष्कम्भकप्रवेशकावङ्कारम्भात् पूर्वमेव प्रयुज्येते ।

३. विष्कम्भकप्रवेशकयोर्मध्यमाधमान्येव पात्राणि भवन्ति । किन्तु एकोक्तेर्वक्तारः प्राय उत्तमपात्राणि भवन्ति ।

एकोक्तेः प्रयोजनम्

मानसिकान्तर्द्वन्द्वस्य गोपनीयभावस्य च यादृशं प्रकरणमेकोक्तौ सम्भवति तादृशमन्यथा न स्यादिति सहृदयानां वेदनमेव । रसनिष्पत्तये च नायकादेर्मनोवृत्तीनां विज्ञापना परमं साध्यमिति सिद्धान्तितमेव ।

कालिदासादय एकोक्ति-विधानं स्वीकुर्वन्ति । तथा हि अभिज्ञानशाकुन्तलस्य षष्ठेऽङ्के –

द्वितीया– परभृतिके किमेकाकिनी मन्त्रयसे ?

रूप गोस्वामिनो विदग्धमाधवे पंचमेऽङ्के राधाया एकोक्तिमधिकृत्य ललिता—

हला राधिके, एकैव किं मन्त्रयसे ।

आङ्ग्ल-भाषायामेकोक्तिः Soliloquy इति स्वगतं च Aside इति प्रथिते । तयोरन्तरमधोलिखितं स्पष्टमेव—

Aside

The aside is an almost too easy de ice for revealing directly and immediately to the audience the discrepancy between what the character says and what he feels, between the appearance of courage and the actuality of cowardice, between the innocence of the announced intention and the malice of the actual purpose.

१. एकोक्तौ क्वचित्प्रवादरूपेण वक्तुर्भाविकार्यक्रमोऽपि निदिश्यते ।

२. एकानेककृतः शुद्धः संकीर्णो नीचमध्यमैः ।

Soliloquy :

Logically and practically, it is speaking aloud of the character's feelings and ideas, an objection of intimate and personal psychological material···It brings us as close to the heart of a character as it is possible.[1]

प्रतिक्रियोक्तिः

स्वगतमिव प्रतिक्रियोक्तिरपि तस्माद् भिन्नैव भवति । नैषा नाट्यशास्त्रादिषु वर्णिता । प्रतिक्रियोक्तौ कस्यचिदेकस्य बहूनां वा प्रच्छन्नतया दृष्टाया घटनायाः श्रुताया उक्तेर्वा प्रसङ्गे न साश्चर्यमाकस्मिकं प्रतिवचनं भवति । तद्यथा मृच्छकटिके वसन्तसेना प्रच्छन्ना सती गवाक्षात् मदनिकाशर्विलकयोरुक्ति-प्रत्युक्ती श्रुत्वा स्वकीयां प्रतिक्रियोक्तिमधोविधं प्रकटयति—

वसन्तसेना— कथं मम सम्बन्धिनी कथा ?

तदनेनोद्घाटितेन गवाक्षेणापवारितशरीरा ।

मदनिका— अयि उपनय, अन्यथा निग्राह्यमम् ।

वसन्तसेना— साधु मदनिके साधु, अभुजिष्यायेव मन्त्रितम् ।

प्रतिक्रियोक्तेरभिनेतुर्दोष्कर्षो रसपेशलता चोत्कर्षशालिनौ ।[2]

जनान्तिकम्

भरतेन जनान्तिकं परिभाषितम्—

कार्यवशादश्रवणं पार्श्वगतैर्यज्जनान्तिकम्
इति गूढार्थयुक्तानि वचनानीह नाटके ।
जनान्तिकानि कर्णे तु तानि योज्यानि योक्तृभिः ॥

पूर्ववृत्तं तु यत्कार्यं भूयः कथ्यं तु कारणात्
कर्णप्रवेशे तद्वाच्यं मा गात् तत् पुनरुक्तताम् ॥

अव्यभिचारेण पठेदाकाशजनान्तिकात्मगतपाठ्यम्
प्रत्यक्ष-परोक्षकृतानात्मसमुत्थान् परकृतांश्चैव ॥

१ Bentley Millet. The Art of Drama, P. 201 and 202

२ प्रतिक्रियोक्तेरपरविधमुदाहरणं मुद्राराक्षसे चतुर्थाङ्के मलयकेतुभागुरायणयोः प्रच्छन्नतया राक्षस-करभकयोर्गोपनीय-वार्ताश्रवणेन प्रवर्तते । अनेन प्रतिक्रियोक्ति-संविधानेन मलयकेतोरभिनयस्य रसवैशद्यमनल्पोपलब्धिरेव शोभते । न तत् प्रति-क्रियोक्तिं विहायान्यथा कल्पनीयम् ।

हस्तमन्तरितं कृत्वा त्रिपताकं प्रयोक्तृभिः
जनान्तिकं प्रयोक्तव्यमपवारितकं तथा ॥

ना० शा० २५.८१-८४

दशरूपके धनञ्जयस्तु संक्षेपेण जनान्तिकं परिभाषितवान्—

त्रिपताककरेणान्यानपवार्यान्तराकथाम् ।
अन्योऽन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ॥

दश० १.६५-६६

स तु जनान्तिकस्य वर्त्तनं कथाया मध्ये भवेदिति नियमयति । पुनश्च तत्रोक्तिप्रत्युक्ती द्वयोः पात्रयोर्भवेतामिति वैशिष्ट्य-द्वयं भरतेन न प्रकटितम् । भरतस्य कर्णप्रदेशे तद्वाच्यमिति दशरूपके जनान्त इति पदेन गृहीतम् ।

अपवारितकम

भरतानुसारेण तु

निगूढभावसंयुक्तमपवारितकं स्मृतम् ।

अस्य व्याख्याभिनवगुप्तानुसारमधो लिखिता—

निगूढभावो निगूहनं सर्वेषां यन्निगुह्यते एक एव शृणुयादिति तदपवारितम् । अभिनवगुप्तोऽपवारितजनान्तिकयोरन्तरं स्पष्टयति अस्मिन् प्रसङ्गे । तद्धि जनान्तिकत्वमेकान्तिकत्वं चैकस्यैव निगुह्यते इति विशेष । नायं विशेषोऽन्यत्र व्याख्यातः ।

अपवारितकेऽपि भरतानुसारेण त्रिपताककरेणापवारणं भवति ।[२] तन्न धनञ्जयस्याभिमतम् । सोऽपवारणं परावृत्य' विधिना समर्थयति ।[३]

बहूनां नाट्याचार्याणां मतेनापवारितजनान्तिकयोरन्तरं नास्त्येव । अभिनवगुप्तेन तेषां मतं चर्चितम् । तद्यथा अन्ये त्वाहुः—उभयमित्येतज्जनान्तिकमेव । यावता हि जनस्य तद्वक्तव्यं तावतोऽन्तिके सामीप्ये तदुच्यत इति ।

---

१ भरतानुसारेण त्रिपताकोऽधोविधं भवति—
प्रसारिताः समाः सर्वा यस्याङ्गुल्यो भवन्ति हि ।
कुञ्चितश्च तथाङ्गुष्ठः स पताक इति स्मृतः ।
पताके तु यदा वक्रानामिकात्वङ्गुलिर्भवेत् ।
त्रिपताकः सविज्ञेयः कर्म चास्य निबोधत ॥९.१८,२८

२. ना० शा० १९.८४

३. रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् । दश० १.६६

आकाश भाषितम्

दशरूपकानुसारेणाकाशभाषितं कस्यचिदेकस्यैव पात्रस्य केनापि कल्पितेना दृश्येनैव पात्रेण सहोक्तिप्रत्युक्ती भवति। तद्यथा—

किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्।
श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाश-भाषितम् ॥

न खलु कल्पितपात्रं किंचिद् ब्रवीति। तस्य प्रत्युक्ती रंगस्थेन पात्रेण कल्प्यते।

नाट्यशास्त्रे भाण-लक्षण-प्रसङ्ग आकाश-भाषितं व्याख्यातम्। तद्यथा—

परवचनमात्मसंस्थं प्रतिवचनैरुत्तरोत्तरग्रथितैः।
आकाशपुरुषकथितैरङ्गविकारैरभिनयंश्चैव ॥१८.१०९

अभिनवगुप्तानुसारेण तु स एवानुवदन् सामाजिकान् बोधयति। न केवलं परवचनमभिनयेत्, किन्तु प्रतिवचनैः स्वोक्तैः सह। आकाशपुरुषस्तु नो पुरुषः।[1]

---

१. ना० शा० २२.३२१

नाट्य-प्रकृतिः

१४

नायक-विमर्शः

अस्मिन्नध्याये नायक-विमर्शः शृङ्गार-दृष्टया प्रस्तुतः । तदधिकृत्याभिनवगुप्तो व्याख्यातवान्—इह कामोपचारः पूर्वं दर्शितः कामश्च स्त्रीपुरुषहेतुक इत्युक्तम् । कामोपचारश्च शृङ्गारपर्यवसायी नायक-विशेष एवेति नायकभेदा वक्तव्याः ।[1]

नाट्यशास्त्रे नायकपदस्य त्रिविधोऽभिप्रायो निर्दिष्टः (१) प्रधाननायकः (२) प्रधाननायकः, प्रतिनायकः, नायिका, पताकानायकश्चेति मध्यमसामान्यवचनम् तथा (३) कश्चिदपि कथा-पुरुषः अमात्यः, कंचुकी, विदूषकः, भृत्यः चेटी, चेट इत्यादयः इति महासामान्य-वचनम् ।

प्रधान-नायकः

भरतेन प्रधाननायको लक्षितः —

> व्यसनी प्राप्य दुःखं वा युज्यतेऽभ्युदयेन यः ।
> कथापुरुषमाहुस्तं प्रधानं नायकं बुधाः ॥२४.२२

सोऽयं प्रधाननायको धनञ्जयेनाधिकारीति प्रोक्तः

> अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः ।
> तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥१.१२

प्रधाननायकोऽयं धीरोदात्तः, धीरललितः, धीरप्रशान्तः, धीरोद्धतश्च चतुर्विधो भवति ।[2] इमे विशेषा नायकस्य प्रकृतिं, गुणं, उपलब्धिं च समीक्ष्य निर्धारिताः ।

---

१. ना० शा० २८.१

२. ना० शा० २४.१७
नायकानामिदं चातुर्विध्यं परवर्तियोजनं प्रतिभाति । भरतस्तु मूलतो नायकानां विभाजनमुत्तममध्यमाधमकोटिषु समर्थयति । १८.३४ । नाटके उदात्तेन नायकेन भवितव्यम् । न तत्रापि धीरोदात्तस्य निर्देशनम् । अन्येषु रूपकविशेष्वपि धीरविशेषणयुतनायका न निर्दिष्टास्तेन ।

भरतानुसारेण प्रकृतिस्त्रिविधा भवति—उत्तमा, मध्यमा, अधमा च। सेयं प्रकृतिर्नायिकादीनां शृङ्गारपरायणतामधिकृत्य परिभाषिता।[1] शृङ्गार एव रोचिष्णुतमो नायकानाम्। भरतस्तु आभ्यन्तरं कामोपभोगमेव नाटके सविशेषं समर्थयति।[2] सोऽयं कामोपभोगो राज्ञामेवोचितो नाटकेषु।[3]

पूर्वोक्तविवरणेन स्पष्टं प्रतीयते यत् भरतो राजानमेव नाटकस्य नायकं मत्वा तस्य लक्षणं विशदीकरोति—

बलवान् बुद्धि-सम्पन्नः सत्यवादी जितेन्द्रियः।
दक्षः प्रगल्भो धृतिमान् विक्रान्तो मतिमाञ्छुचिः॥
दीर्घदर्शी महोत्साहः कृतज्ञः प्रियवाङ् मृदुः।
लोकपालव्रतधरः कर्ममार्गविशारदः॥
उत्थितश्चाप्रमत्तश्च वृद्धसेव्यर्थशास्त्रवित्।
परभावेङ्गिताभिज्ञः शूरो रक्षा-समन्वितः॥
ऊहापोहविचारी च नानाशिल्पप्रयोजकः।
नीतिशास्त्रार्थकुशलस्तथा चैवानुरागवान्॥
धर्मज्ञोऽव्यसनी चैव गुणैरेतैर्भवेन्नृपः॥
ना० शा० २४. ७६-८०

नृपस्यैतल्लक्षणं समाहृत्य धनञ्जयो नेतुर्लक्षणमाह—

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥
बुद्ध्युत्साह-स्मृति - प्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥ २. १-२

दशरूपक इत्थं विशेषितोऽयं नेता सामान्य-गुणलक्षितः कथमपि तत्रैव वर्णितान् धीरोद्धतनायकगुणान् समन्वयतीति स्पष्टं प्रतीयते।

१. यः स्त्रीपुरुषसंयोगो रतिसम्भोगकारकः।
स शृङ्गार इति ज्ञेय उपचारकृतः शुभः॥
भूयिष्ठमेव लोकोऽयं सुखमिच्छति सर्वदा।
सुखस्य हि स्त्रियो मूलं नानाशीलाश्च ताः पुनः॥ २२.९८-९९

२. कामोपभोगो द्विविधो नाट्यधर्मेऽभिधीयते।
बाह्याभ्यन्तरतश्चैव नारीपुरुषसंश्रयः॥ २. १४९
आभ्यन्तरः पार्थिवानां स च कार्यस्तु नाटके।
बाह्यो वेश्यागतश्चैव स च प्रकरणे भवेत्॥ २२. १५०

३. तत्र राजोपभोगं तु व्याख्यास्याम्यनुपूर्वशः॥ २२. १५१

धनञ्जयस्योपर्युक्तसामान्यनेता तु वस्तुतो राजैव। स नेतुरीदृशं राजपरकमभिप्रायं न स्पष्टं प्रकटितवानिति त्रुटिरेव। रामचन्द्रगुणचन्द्रयोर्नाट्यदर्पणे नेतुर्नृपत्वमघोविधिना स्पष्टीकृतम्—

'अथ राजशब्दं व्याख्यातुं सामान्येन नेतुः स्वरूपमाह—

> उद्धतोदात्त-ललित-शान्ता धीरविशेषणाः।
> वर्ण्याः स्वभावाश्चत्वारः नेतॄणां मध्यमोत्तमाः ॥ १. ६

धनञ्जयोऽपि नेतॄ राजत्वमधोलिखितेन श्लोकांशेन व्यञ्जयति—

> एवं नाट्ये विधातव्यो नायकः सपरिच्छदः। २. ४६

प्रसंगेऽस्मिन् परिच्छदस्तु नायिका-दूत-दूती-मन्त्रि-पुरोहितादयो राज्ञ एव कल्पनीयः।

नायकस्य सामान्यगुणास्तु भवन्ति नाम। तेषां परिगणनं भोजेनान्यविधेनैव निर्दर्शितम्। तद्यथा—उत्तमादिहेतवश्च नायकानां सामान्यगुणा जात्यादयश्चतुर्विंशतिः। यथा—जातिः, अन्वयः, अभिजनः, निवासः, आस्पदम्, पदं, पितरौ, प्रभावः, प्रतिज्ञा, शास्त्रज्ञानम्, अदीनवाक्यता, वाग्मित्वम्, देशकालावबोधः, इंगिताकारज्ञता, दाक्ष्यम्, कलावैदग्ध्यम्, चतुरता, रूपसम्पत्, सौभाग्यम्, त्यागः, सौहार्दम्, महारम्भता, शक्तिः, शौर्यमिति।

भरतकोश पृष्ठम् ३२७

इमे सामान्यगुणा साधारणतः सर्वविधानां रूपकाणां नायकेषु दृश्यन्ते।

नायका भरतादिभिः पौनःपुन्येन सम्यग्वर्गीकृताः। प्रथमं तावत् प्रकृत्यनुसारेण नायकाः उत्तमाः, मध्यमाः, अधमाश्च भवन्तीति भरतेन प्रतिपादितम्।[1] तत्रोत्तममध्यमौ गुणान्वितौ, अधमश्च दोषपूर्णः स्युः।[2]

परतो भरतो नायक-प्रकारं नियमयन् प्राह

> अत्र चत्वार एव स्युर्नायकाः परिकीर्तिताः।
> मध्यमोत्तमप्रकृतौ नानालक्षणलक्षिताः ॥ [3]
> धीरोद्धता धीरललिता धीरोदात्तास्तथैव च।
> धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिताः ॥

ना० शा० २४. १६-१७

१. ना० शा० २४. १, ७

२. ना० शा० २४. ३, ७

३. नैतत्साधु। धीरोद्धतस्तु नास्ति मध्यम उत्तमो वा।

न खल्वेतन्नियमनं व्यवहारे परिनिष्ठितम्। भाणप्रहसनयोर्नायका उत्तम-मध्यमप्रकृतिका न सन्ति। भाणनायको धूर्त-विटस्तु 'अधमः' भवति।[१] प्रहसनस्य नायकस्तु 'भगवत्तापसविप्रादयो' भवन्ति।[२] भगवत्तापसविप्रा यतिवानप्रस्थ-गृहस्थाः, अन्ये शाक्यादयस्तैरुपलक्षितम्। हास्य-प्रधानवचन-सम्बन्धशीलनादिना कुत्सितैः पुरुषैरतएव प्रहस्यमानैः सामर्थ्यात्तैरेव भगवदादिभिर्युक्तम्।[३] एतादृशा भाणप्रहसननायका भरतधनञ्जयादीनान्नायक-चातुर्विध्ये न समायान्ति।[४] एतत्तु नाट्य-शास्त्र अभावः प्रतिभासते।

नाट्यदर्पणे रामचन्द्र-गुणचन्द्रौ धीरोदात्तादिभेदा नेतुः प्रकृतेरेव सन्तीति वर्णयतः। तथाहि—

> उद्धतोदात्तललितशान्ता धीरविशेषणाः।
> वर्ण्याः स्वभावाश्चत्वारो नेतॄणां मध्यमोत्तमाः॥ १. ६

स्वभावस्वभाविनोरभेदात् समानाधिकरण्यनिर्देशः।

भारतीये नाट्यशास्त्रे धीरोदात्तादीनामुदाहरणानि सन्ति—

> देवा धीरोद्धता ज्ञेयाः स्युर्धीरललिता नृपाः।
> सेनापतिरमात्याश्च धीरोदात्तौ प्रकीर्तितौ॥
> धीरप्रशान्ता विज्ञेया ब्राह्मणा वणिजस्तथा॥ २४. ४

इति न सर्वथा साधु। अभिनवगुप्तेनास्मिन्प्रकरणे व्याख्यातम्—इति वचने पर्यालोच्यमाने देवादीनां नाटकनायकत्वानुपपत्तेः। धीरललित एक एव नायक इति। तदसत्। न हि जनकप्रभृतीनां रामादीनामपि वा धीरललितत्वम्।

१. शकारश्च विटश्चैव ये चान्येऽप्येवमादयः।
सङ्कीर्णास्तेऽपि विज्ञेया ह्यधमा नाटके बुधैः॥ २४. १८
रामचन्द्रगुणचन्द्रानुसारेण भाणप्रहसनयोः, कस्यांचिद् वीथ्यां च नीचोऽपि नायकः। नाट्यदर्पणे ४.७।

२. भगवत्तापसविप्रैरन्यैरपि हास्यवाद-सम्बद्धम्।
कापुरुषसम्प्रयुक्तं परिहासाभाषणप्रायम्॥
नाο शाο १८. १०३

३. नाο शाο १८.१०३ अधिकृत्य भारती।

४. भरतस्तु भाण-प्रहसनादीनामधमनायकान् न गणयति। अधोलिखितकारिकायां नायकानां चातुर्विध्य-नियमनमसाम्प्रतम्—
अत्र चत्वार एव स्युर्नायकाः परिकीर्तिताः।
मध्यमोत्तमप्रकृतौ नानालक्षण-लक्षिताः॥ २४. १६

यदाह—"धीरोदात्तं जयति चरितं रामनाम्नश्च विष्णोः" इति। अभिनवगुप्तानुसारतस्तु पूर्वोक्तकारिकानुसारेण धीरललितत्वं राज्ञ एव वर्णनीयं नान्यस्य, सेनापत्यमात्ययोर्धीरोदात्तत्वमेव, देवानां धीरोद्धतत्वमेव, द्विजातीनां वीरप्रशान्तत्वमेव। 'अभिनवगुप्तस्य संशोधित-प्रपञ्चोऽपि न व्यावहारिकः' इति वेणीसंहारोत्तररामचरितादिषु स्पष्टं प्रतिभाति।

नायिका-विषये नायकस्य वर्तनं परीक्ष्य प्रणयिनो नेतुः पाञ्चविध्यं भरतेन प्रतिपादितम्—

चतुरः, उत्तमः, मध्यः, नीचः, प्रवृत्तकश्च।[1]

चतुरः

समदुःखक्लेशसहः प्रणयक्रोधप्रसादने कुशलः।
योऽर्थी नात्मच्छन्दो दक्षश्चतुरः स बोद्धव्यः॥ २३. ५४

उत्तमः

मधुरस्त्यागी रागं न याति मदनस्य चापि वशमेति।
अवमानितश्च नार्या विरज्यते चोत्तमः स पुमान्॥ २३. ५६

मध्यमः

सर्वार्थमध्यस्थो भावग्रहणं करोति यो नार्याः।
किञ्चिद्दोषं दृष्ट्वा विरज्यते मध्यमः स भवेत्॥ २३. ५७

नीचोऽधमः

अभिनवकृते व्यलीके प्रत्यक्षं रज्यते दृढतरं यः।
मित्रैर्निवार्यमाणो विज्ञेयः सोऽधमः पुरुषः॥ २३. ६०

प्रवृत्तकः

अवगणितभयामर्षो मूढप्रकृतिः प्रसक्तहासश्च
एकान्तदृढग्राही निर्लज्जः कामतन्त्रेषु
रतिकलहसम्प्रहारेष्वकर्कशः क्रीडनायकः स्त्रीणाम्।
एवंविधस्तु तज्ज्ञैर्विज्ञेयः सम्प्रवृत्तस्तु॥ २३. ६२

एतेभ्यो व्यतिरिक्तं ज्येष्ठं नायकमप्यस्मिन् प्रसङ्गे भरतो विवृणोति। तद्यथा,

यो विप्रियं न कुरुते नार्याः किञ्चिद्विराग-संजातम्।
अज्ञातेप्सितहृदयः स्मृतिमान् धृतिमान् स तु ज्येष्ठः॥
ना० शा० २३. ५५

१. स्त्रीसम्प्रयोगविषये ज्ञेयाः पुरुषास्त्वमी पंच। ना० शा० २३. ५३

इमे भारतीया नायकाः साधारणत एकनायिकाः सन्ति। न तेषां वैविध्यं प्रपंचयितुं धनञ्जयो मतिं कुरुते। स तु पूर्वं प्रत्यन्यया हृतं नायकमेव युवजन-प्रीतये सविशेषं महत्त्वपूर्णं मन्यते, तेषां भेदं च दक्षिणः, शठः, धृष्ट इति प्रस्तावयति। एतेषु धृष्टो वा शठो वा तावत् भरतस्याधमेन समानः।[1]

अन्यत्र भरतः शठं परिभाषते—

वाचैव मधुरो यस्तु कर्मणा नोपपादकः।
योषितः किञ्चिदप्ययं स शठः परिभाष्यते॥ २२. ३१५

धनञ्जयस्यानुकूलो दक्षिणश्च नायको भरतेन प्रियः, कान्तः, विनीतः, नाथः, स्वामी, जीवितम्, नन्दनः इत्यादिभिः नामभिः संकेतितः।[2] धनञ्जयस्य शठो धृष्टो वा भारतीयनाट्यानुसारेण नायिकया दुःशीलः, दुराचारः, शठः, वामः, विकत्थनः, निर्लज्जः, निष्ठुरश्चाभिधीयते।[3]

धनञ्जयस्तु दक्षिणः, शठः, धृष्टः इति प्रकारत्रयमेव संक्षेपेण वर्णयति। भरतस्तावत् प्रत्येकस्य भेदानपि सूक्ष्मेक्षिकया सरसं विवृणोति। भरतानुसारेण दक्षिणादयो नायका अधोविधाः सन्ति—

दक्षिणः

कुलीनो धृतिमान् दक्षो दक्षिणो वाग्विशारदः। २२. ३१०

शठः

वाचैव मधुरो यस्तु कर्मणा नोपपादकः।
योषितः किञ्चिदप्ययं स शठः परिभाष्यते॥ २२. ३१५

निर्लज्जः

भरतस्य निर्लज्ज एव धनञ्जयस्य धृष्टः। तद्यथा

वार्यमाणो दृढतरं यो नारीमुपसर्पति।
सचिह्नः सापराधश्च स निर्लज्ज इति स्मृतः॥ २२. ३१८

प्रियः

भरतस्य प्रिय एव धनञ्जयस्यानुकूलनायकः। तद्यथा

यो विप्रियं न कुरुते न वायुक्तं प्रभाषते।
तथार्जवसमाचारः स प्रियस्त्वभिधीयते॥ २२. ३०५

1. व्यक्ताङ्गवैकृतो धृष्टः। गूढविप्रियकृच्छठः। दश० २. ७
2. ना० शा० २२. ३०५-३११
3. ना० शा० २२. ३१२-३१६

पताका-नायकः

भारतीये नाट्यशास्त्रे केवलं नायकस्यैव चर्चा स्पष्टं विद्यते। पताका-नायको वोपनायको वानुनायको वा तत्र न संज्ञितः। अभिनवगुप्तस्तावत् प्रधान-नायकेन सह पताकानायक-प्रकरीनायकयोराधिकारिकवस्तु-प्रयोगे स्थानं निर्दिशति।[१] भरतानुसारतस्तु प्राज्ञो इति विशिष्टो भवतः[२]। अपरञ्च पताका-वृत्तस्यनायक एव पताकानायकः। सुग्रीव-विभीषणौ सुप्रसिद्धौ पताकानायकौ।

धनञ्जयानुसारेण पताकानायकः पीटमर्दो भवति। पीठमर्दस्तावत् पारिभाषिकं पदम्। न तत्र पीठं न च मर्दनं व्युत्पन्नम्। पीठमर्दस्तु नायकस्यानुचरः, भक्तः, गुणैः प्रधाननायकात् किञ्चिदूनो विचक्षणः स्यादिति धनञ्जयो दशरूपकं निर्दिशति।[३]

शारदातनयानुसारेण पताकानायक एवोपनायको भवति। शारदातनयः पीठमर्द इति पदं व्युत्पन्नं मन्यते। तद्यथा,

पीठमर्यात्य पुरतः प्रयोक्ता नायिकाविषु।
स पीठमर्दो विख्यात्य कुपितस्त्री-प्रसादकः॥

पीठमर्दस्तन्मतेन विदूषको भवति।[४] न हि खलु सुग्रीवादयः पताका-नायकाः पीठमर्दाः। पीठमर्दास्तु नायिकाप्राप्तौ एव नायकस्य सहायाः। नैतन्निर्दिष्टं धनञ्जयेन। स तु पताकानायकं पीठमर्दं च पर्यायं मन्यते इति चिन्त्यम्।

प्रतिनायकः

प्रतिनायकोऽपि भरतेन न सम्यक् लक्षितः। अभिनवगुप्तस्तावत् प्रतिनायकं विशिष्टमेव मनुते।[५] प्रतिनायकस्य स्थितिः संस्कृत-नाट्य शास्त्रीयेषु सन्दर्भेषु सुविचारिता नास्त्येव। धनञ्जयानुसारेण तु—

लुब्धो धीरोद्धतः स्तब्धः पापकृद् व्यसनी रिपुः॥ २. ९

---

१. प्राज्ञैः प्रधाननायक पताकानायक-प्रकरीनायकैस्तैनक्पैः।

२. यदाधिकारिकं वस्तु सम्यक् प्राज्ञैः प्रयुज्यते। ना० शा० १६. २६
अत्र प्राज्ञाः पताकानायकादयः सन्तीति मतमभिनवगुप्तस्य।

३. दश० २.८

४. भावप्रकाशने पृष्ठं ८४

५. सा (निरूढिः) च नायकस्यामात्यस्य नायिकायाः प्रतिनायकस्य दैवस्य वा। ना० शा० १८. ८ अधिकृत्य भारती।

न खलु बहवः सन्ति प्रतिनायकस्य समीक्षका नाट्याचार्याः। रामचन्द्र-गुणचन्द्रावपि धनञ्जयमेवानुहरतः। वयं तु रुद्रटस्य मतेन प्रतिनायकं वर्णयामः। स तु गुणी अभिजातश्च स्यात्। संस्कृतरूपकेषु प्रतिनायकानां स्थितिर्वैकल्पिकी वर्तते। साधारणतः प्रतिनायका लुब्धाः, धीरोद्धताः, स्तब्धाः पापकृतः व्यसनिनश्चापवादा एव सन्ति।

नायकस्य सहायाः

विदूषकः

प्रणयात्मकेषु रूपकेषु नायकस्य प्रथमः सहायको विदूषक एव वर्तते। स विदूषको न केवलं राज्ञामेव हासकारकोऽपि तु देवानामपि। तद्यथा भरतो वर्णयति —

> **लिंगी द्विजो राजजीवी शिष्यश्चेति यथाक्रमम्।**
> **देवक्षितिभृतामात्यब्राह्मणानां प्रयोजयेत्** ॥ २४. २०

अभिनवगुप्तानुसारेण देवानां विदूषकः लिङ्गी ऋषिर्भवति। राज्ञां विदूषकः कश्चिद् ब्राह्मणो नियुज्यते। अमात्यस्य विदूषको राजजीवी भवति। ब्राह्मणानां विदूषकः शिष्य एव नियोजनीयः। विशेषतो राज्ञो विदूषकस्य प्रमुखं स्थानमासीत् रूपकेषु। तद्यथा,

> **विप्रलम्भसुहृदोऽमी सङ्कथालाप-पेशला** ॥ ना० शा० २४. २१

भरतो विदूषकस्य विशेषं वर्णयति—

> **प्रत्युत्पन्नप्रतिभो नर्मकृतो नर्मगर्भ निर्भेदः।**
> **छकविदूषितवचनो विदूषको नाम विज्ञेयः** ॥ ३५. २५

विदूषकस्तु कुरूपो वानररूपो वामीदिति रूपकेषु प्रायशो वर्णितम्।

अप्रणयात्मकेषु नाटकेषु क्वचिद् विदूषकस्य स्थानं नासीत्। उत्तररामचरिते, वेणीसंहारे, मुद्राराक्षसे च विदूषकाभावः प्रमाणयति यत् गम्भीरार्थचिन्तनस्य वैदुष्यपूर्णप्रकृतौ विदूषकस्य हास्यादिकमवाञ्छितमिति सुसम्मतम्। रामकाव्यात्मक-नाटकेषु विदूषकोऽपवाद एव।

विदूषकस्य विवरणं दशरूपकेऽतिन्यूनमेव वर्तते।

> **हास्यकृच्च विदूषकः**। २.९

विटः

विटस्तु नाट्यशास्त्रीयो वैशिक एव। भरतः शकारं विटं चाधमं

निर्दिशति । भरतानुसारेण वेश एव वेश्या । वेश्योपचारे साधुः वैशिकः ।[१] भरतस्तस्य त्रयस्त्रिंशद् गुणान् निबोधयति । तद्यथा,

शास्त्रविच्छिल्प-सम्पन्नो रूपवान्, प्रियदर्शनः, विक्रान्तः, धृतिमान्, वयोवेषकुलान्वितः, सुरभिः, मधुरः, त्यागी, सहिष्णुः, अविकत्थनः, अशङ्कितः, प्रियभाषी, चतुरः, शुभदः, शुचिः, कामोपचारकुशलः, दक्षिणः, देशकालवित्, अदीनवाक्यः, स्मितवान्, वाग्मी, दक्षः, प्रियंवदः, स्त्रीलुब्धः, संविभागी, श्रद्दधानः, दृढस्मृतिः, गम्यासु चाप्यविस्रम्भी, मानी च ।[२]

शारदातनयस्य विटः पूर्वोक्तवैशिकेन समान एव । तद्यथा,

वेशोपचारकुशलो मधुरो दक्षिणः कविः ।
ऊहापोहक्षमो वाग्मी चतुरश्च विटो मतः ।
विटश्च कामसाचिव्यकरणे चोपयुज्यते ।
माल्यप्रयोज्वलः कुर्यात्यभिमितं प्रसोदति ।
विटः प्राकृतवादो च प्रायो बहुविकारवान् ।।[३]

वैशिकस्य विटस्य वा पूर्णपरिचयश्चतुर्भाणीनामकेनोपरूपक-चतुष्टयेन प्रतिफलति । तत्र नायका अनायका वा विटा वेश्योपचारे सम्यक् प्रवर्तन्ते । ते तत्र राजकुमाराः, ब्राह्मण-युवकाः, वणिजः, शूद्रा वा सर्वे वेश्यानिरता एव स्वजीवनं सफलयन्ति । वृद्धोऽपि विटो स्वानुभवेन प्रवीणः सन् कामुकान् वेश्याश्च परामर्शैर्बोधयन्ति ।

भाणनामके रूपके वैशिको वा विटो वानुत्तमोऽपि वेशोपचार-कर्मणि न विशेषमहत्त्वपूर्णं स्थानं भजते, यथा मृच्छकटिकादिषु प्रकरणेषु । अस्मिन् प्रकरणे स शकारस्य मित्रमेव तस्य कामुकतां सम्पूरयति ।

ईदृशो महत्त्वपूर्णो विटो धनञ्जयेनातिसंक्षेपेण वर्णितः —

एकविद्यो विटश्चान्यः ।

धनञ्जयस्तु प्रणयात्मकेषु रूपकेषूपयुक्त-पीठमर्दादीनां योगं वर्णयति । स एतादृशेषु रूपकेषु मन्त्रिणां महत्त्वपूर्णभूमिकां विस्मरति । तत्तु स्वप्न-वासवदत्त-रत्नावल्योर्यौगन्धरायणस्य योगदानेन प्रमाणितमेव । धनञ्जयो मन्त्रिणां माद्यं कार्यान्तरेषु वर्णयति । कार्यान्तराणि तु अन्तःपुराद्बाह्यानि सन्ति ।

१. वेशोपचारे साधुर्वा वैशिकः परिकीर्तितः । ना० शा० २३. १

२. ना० शा० २३. २-३

३. भावप्रकाशने पृष्ठ ८४. २६७, २८८

भरतानुसारेण (युव) राजः, सेनापतिः, पुरोधाः, मन्त्री, सचिवः, प्राड्विवाकः, कुमाराधिकृतश्च नायकस्य सहायाः सन्ति । अन्येऽपि तत्र सहाया भवेयुरिति भरत आह—

एते चान्ये च बहवो मान्या ज्ञेया नृपस्य तु । २४. ७५

भरतनिर्दिष्ट-सहायेषु युवराजः, सेनापतिः, सचिवः, प्राड्विवाकः, कुमाराधिकृतश्च धनञ्जयेन न संगृहीताः । अस्मिन् प्रसङ्गे नायकस्य सहायो राजा भवेदिति भरतः स्पष्टयति ।[1] कथं नाम राजा स्वयमेव स्वकीयः सहायः स्यादिति सन्देहे समुत्पन्नेऽभिनवगुप्तो व्याख्याति—युवराजोऽत्र राजशब्देनोक्तः । अत्र धनञ्जयस्याधोलिखित-कारिकाभिनवगुप्तं नानुसरन्ती संशयमेव जनयति –

मन्त्री स्वं वोभयं वापि सखा तस्यार्थचिन्तने । दश० २. ४२

कथं कश्चिद् राजा नायकः स्वयमेव स्वकीयः सहायः स्यादिति भ्रमोऽभिनवगुप्तस्य व्याख्यया दूरीकरणीया । अतएव धनञ्जयस्य कारिका चिन्त्यैव ।

धनञ्जयेन तपस्वी, ब्रह्मवादी, सुहृत्, कुमारः, आटविकः, सामन्तः, सैनिकः, वर्षवरः, किरातः, मूकः, वामनः, म्लेच्छः, आभीरः, शकारः इति बहुजना नायकोपकारकाः परिगणिताः ।[2]

सर्वे ते नायकस्य सहाया गुणानुसारं ज्येष्ठाः, मध्यमाः, अधमाश्च भवन्ति ।

नायकगुणाः

नायकस्य मानसिकवृत्तिमधिकृत्य तस्याष्ट गुणा निर्धारिताः सन्ति । इमे तु सात्त्विकगुणा इति सत्त्वादेव तेषां प्रादुर्भावं व्यनक्ति । सत्त्वं नाम चित्त-वृत्तिरेव । नायकस्येमे सात्त्विकगुणाः पात्रेण सात्त्विकाभिनयद्वारा प्रेक्षकान् प्रति प्रकटीक्रियन्ते ।[3] सात्त्विकाभिनयस्तु चतुर्षु अभिनयेषु रसभावापेक्षया प्राथम्यं भजते । अतएव सात्त्विकगुणा बहुमताः सन्ति ।

---

१. राजा सेनापतिश्चैव पुरोधा मन्त्रिणस्तथा ।
सचिवाः प्राड्विवाकाश्च कुमाराधिकृतास्तथा ।। २४. ७४

२. दशरूपके २. ४३-४४

३. चतुर्विधोऽभिनयो भवति—सात्त्विकः, वाचिकः, आङ्गिकः, आहार्यश्चेति । तत्र सात्त्विकाभिनये प्रकृतेः चित्तवृत्तेः, वाचिकाभिनये वाच्याः, आङ्गिकाभिनये शारीरिककार्याणाम्, आहार्याभिनये च तस्याः वस्त्रपरिधानादीनामनुकरणं पात्रैः प्रस्तूयते ।

अष्टगुणेषु शोभा, माधुर्यम्, स्थैर्यम्, गाम्भीर्यम्, औदार्यम् तेजश्च एतेव नायकस्य कार्येभ्यः प्रेक्षकाणां बोधगम्यानि भवन्ति। शेषं द्वयं विलासो ललितञ्च प्रत्यक्षमेव प्रतिफलतः।

शोभा

भरतानुसारेण नायकस्य दाक्ष्यं, शौर्यम्, उत्साहो, हीनविषयेषु घृणा, उत्तमगुणेभ्यो रुचिश्च शोभाया उद्भवः।[1] धनञ्जय एतेषामुत्साहं न गणयति इति[2] तस्य त्रुटिरेव, यतो हि नाम इमे पौरुषा गुणा सन्ति। पौरुषगुणेषु वीररसोचितोत्साहस्तु वर्णनीय एव।

विलासः

भरतानुसारेण विलासे नायकस्य गतिवृषभवत् महिमशालिनी भवति, दृष्टिश्च शनैः सञ्चरति। तदर्थं सल्लपनमीषद्हासपूर्वकं जायते। धनञ्जय-स्तत्त्वतो भारतीयं लक्षणमनुहरति।

माधुर्यम्

कथं नाम माधुर्यं नायकेन समिष्यत इति वर्णयन् भरतः करणानाम् (इन्द्रियाणाम्) युद्ध-नियुद्ध-व्यायामादिष्वभ्यासमावश्यकं मनुते।[3] यस्यां स्थितौ साधारणजनानां महान् विकारो जायेत, तस्यामपि माधुर्यगुणोपेतस्य नायकस्य विकारो मधुर एव स्यात्। धनञ्जयो भरतं तत्त्वतोऽनुहरति।

स्थैर्यम्

भरतानुसारेण धर्मकामविषयकेभ्यः संकल्पेभ्यः सदाग्रहो हि स्थैर्यं नाम गुणः। नायको विघ्नोपहतोऽपि वैषम्यात् विचलितो न भवति। धनञ्जयो भरतं संक्षेपेणानुहरति।

गाम्भीर्यम्

भरतानुसारतः

> यस्य प्रभावाद्वाकारा हर्षक्रोधभयादिषु।
> भावेषु नोपलक्ष्यन्ते तद्गाम्भीर्यमिति स्मृतम्॥ २२.३८

अस्मिन् प्रसङ्गेऽभिनवगुप्त आकारं व्याख्याति—

---

१. दाक्ष्यं शौर्यमथोत्साहो नीचार्थेषु जुगुप्सनम्।
उत्तमैश्च गुणैः स्पर्धा यतः शोभेति सा स्मृता॥ ना० शा० २२. ३४

२. नीचे घृणाधिके स्पर्धा शोभायां शौर्यदक्षते। ३. ११

३. ना० शा० २२.३६ अधिकृत्य भारती।

आक्रियते चित्तवृत्तिरेभिरित्याकारः मुखरागदृष्टिविकारादयः। गाम्भीर्ये सति आकारा न प्रकटीभवन्ति । एतदेव लक्षणं धनञ्जयः संक्षिप्तं ब्रूते—

गाम्भीर्यं यत्प्रभावेन विकारो नोपलक्ष्यते । २.१२

यदा विकार ईषदुपलक्ष्यते तदा माधुर्यं भवतीति द्वयोरन्तरमिति धनिकः ।

तेजः

भरतानुसारेण शत्रुप्रयुक्ताधिक्षेपावमानादेरसहनं तेजो भवति । तत्र नायको प्राणसंशयेऽपि अवमानादेः प्रतिक्रियाया विरतो न भवति । अन्यासु स्थितिषु—नीत्यनुवर्तने, देशकालानुवर्तने चावमानसहनं न सापवादं भवतीति प्राणात्ययेऽपीति पदयोरौचित्यम् । परेणेति पदेन भरतस्य विज्ञापनीयं वर्तते यत् मित्रेण गुरुणा वा कृतमवमानं सहत एव नायकः । नैतत्तेजो-विरोधि ।

धनञ्जयो भरतमेव संक्षिप्तमनुहरति ।

ललितम्

भरतानुसारेण

अबुद्धिपूर्वकं यत्तु निर्विकारस्वभावजम् ।
शृङ्गाराकारचेष्टत्वं ललितं तदुदाहृतम् ॥ २२.३९

यत्र विकाररहितं स्वभावत एव शृङ्गाराकारचेष्टाः सन्ति, तत्र ललितं नाम सात्त्विकगुणो भवति । भरतमेव धनञ्जयोऽनुहरति ।

औदार्यम्

औदार्यं तु नाम्नेव प्रतीतम् । धनञ्जयानुसारेण तु जीवनदानं पराकाष्ठा औदार्यस्य भवति। न केवलं दानमपितु अभ्युपपत्तिः (परित्राणार्थार्थिनो ग्रहणम्) प्रियभाषणं च शत्रूणामपि विषये विलसत इति महिमौदार्यस्य । धनञ्जयानुसारेण सज्जनानामात्मसात्करणमप्यौदार्यस्य लक्षणम् ।

१५

नायिका-लक्षणम्

भरतो धनञ्जयश्चोभौ शृङ्गारे कामोपभोगविलासे च परायणां प्रकृतिमेव प्रायोनिदर्शयतः । नायिका शृंगारवृत्तौ प्राधान्यं भजते ।

भरतानुसारेण कामोपभोगाय नायिकाः त्रिविधा भवन्ति—बाह्याः, बाह्याभ्यन्तराः, आभ्यन्तराश्च ।[1] बाह्या नायिका वेश्याः सन्ति प्रकरणे प्रयोज्या । आभ्यन्तरास्तु अन्तःपुरे राजभोग्या नाटकोचिता भवन्ति । बाह्याभ्यन्तराः तु एकावरुद्धा वेश्या भवन्ति ।[2]

राज्ञो नायिका वेश्या न भवेत्, किन्तु दिव्यवेशाङ्गना नायिका भवितुमर्हति, यथा विक्रमोर्वशीये । धनञ्जयस्य स्वीया साधारण-स्त्री च, भरतस्य कुलजा, बाह्या च स्तः । बाह्याभ्यन्तरा धनञ्जयेन न दृष्टा ।

भरतोऽष्टविधनायिकाः अपश्यत् । तद्यथा, वासकसज्जिका, विरहोत्कण्ठिता, स्वाधीनभर्तृका, कलहान्तरिता, खण्डिता, विप्रलब्धा, प्रोषितभर्तृका, अभिसारिका च । एताः सर्वा विवाहस्य पश्चाद्वर्तिन्यो नायिकाः । विवाहात्पूर्वमेव रूपकेषु कामसमुत्पत्तिर्नाम यद्सर्वाधिकतमो विषयः कवीनां प्रेक्षकाणां च, स भरतेन सम्यक् पर्यालोचितः, किन्तु धनञ्जयेनेतद्दत्तावधानोऽयं प्रसङ्गः ।

भरतस्तावत् कविमार्गप्रदर्शयितुकामो नायिकायाः पुरतो नायकादर्शं प्रस्तुतवान्—

> रूपगुणादिसमेतं कलादिविज्ञान - यौवनोपेतम् ।
> दृष्ट्वा पुरुषविशेषं नारी मदनातुरा भवति ॥

---

१. बाह्या चाभ्यन्तरा चैव स्याद् बाह्याभ्यन्तरापरा ।
   कुलीनाभ्यन्तरा ज्ञेया बाह्या वेश्याङ्गना स्मृता ।
   कृतशौचा तु या नारी सा बाह्याभ्यन्तरा स्मृता ॥ ना० शा० २२.१५२-३

२. सा च वेश्या पुनर्भवा । ना० शा० २२.१५३ अधिकृत्य भारती

मदनातुराया वेश्याया कुलजायाश्च शरीरविकाराः कीदृशो भवन्तीति भरतेन सम्यग्वर्णितम्। तद्यथा नायकसमक्षं नायिका-विकाराः—

वेश्याविकाराः

ललिता चलपक्ष्मा च तथा च मुकुलेक्षणा।
व्यस्तोत्तरपुटा चैव काम्या दृष्टिर्भवेदिह॥
ईषत्-संरक्तगण्डस्तु सस्वेदलवचित्रितः।
प्रस्पन्दमानरोमाञ्चो मुखरागो भवेदिह॥
काम्येनाङ्गविकारेण सकटाक्षनिरीक्षितैः।
तथाभरण - संस्पर्शैः कर्ण - कण्डूयनैरपि॥
अङ्गुष्ठाग्रविलिखनैः स्तननाभिप्रदर्शनैः।
नखनिस्तोदनाच्चैव केशसंयमनादपि॥

ना० शा० २२.१६१-१६५

कुलजा-विकाराः

प्रहसन्ती च नेत्राभ्यां प्रततं च निरीक्षते।
स्मयते सा निगूढं च वाचं चाधोमुखी वदेत्॥
स्मितोत्तरा मन्दवाक्या स्वेदाकारनिगूहनी।
प्रस्पन्दिताधरा चैव चकिता च कुलाङ्गना॥

ना० शा० २२.१६७-१६८

नायकसङ्गमलभमाना मदनातुरा नायिका दशस्थानगतं कामं प्रदर्शयति— अभिलाषः, चिन्तनम्, अनुस्मृतिः, गुणकीर्तनम्, उद्वेगः, विलापः, उन्मादः, व्याधिः, जडता, मरणञ्च।[1]

पूर्वोक्तमदनातुरा नायिका नायकं प्रति आत्मावस्थाप्रदर्शिनीं दूतीं प्रेषयति।[2]

राज्ञां प्रच्छन्नकामिता

भरतस्तावत् प्रच्छन्नकामितमेव शृङ्गारस्याभीष्टतमं प्रापणीयं मन्यते। तथा हि—

प्रच्छन्नकामितं राज्ञा कार्यं परिजनं प्रति।

---

१. ना० शा० २२.१७३-१८१
२. दूता अपि विसृज्यन्त एतदर्थमिति न क्वचिन्निर्दिष्टम्। बहुषु भाणेषु नायिकादूता विटा एव सन्ति।

> यद्वामाभिनिवेशित्वं यतश्च विनिवार्यते ।
> दुर्लभत्वं च यन्नार्याः सा कामस्य परा रतिः ॥
>
> ना० शा० २२. २०७

अभिनवगुप्तानुसारेण राज्ञामियं प्रच्छन्नकामिता बहुव्यापिनी बभूव। तत्र ऊढा, पुनर्भूः, अवरुद्ध-गणिका, कन्यका, प्रेष्या च राजकीय-प्रणयपाशेऽव-रुद्धा आसन्।[1] अभिनवगुप्त स्पष्टयति—धर्मवृत्तिना राज्ञा परिचार्यो द्वेष्या-दुर्भगा अपि सेव्या इति। एतासु नायिकासु धनञ्जयः केवलं कन्यकामूढां च वर्णयति।[2]

अष्टविधा नायिकाः

नायकप्रणयाबद्धानां नायिकानामष्ट भेदा अवस्थापेक्षयाभिनिर्भिन्नाः —

स्वाधीनपतिका

भरतानुसारतः

> सुरतातिरसैर्बद्धो यस्याः पार्श्वे तु नायकः ।
> सान्द्रामोदगुणप्राप्ता भवेत् स्वाधीन-भर्तृका ॥ २२. २१५

धनञ्जयस्तु संक्षेपेणानुहरति भरतमस्मिन् प्रकरणे।

वासकसज्जा

वासकं तु शयनगृहमस्मिन्। नायकस्य प्रणयमिलन-संभावनामपेक्ष्य वासकस्य सज्जा (मण्डनम्) नायिका विदधाति। एवं व्यापृता नायिका वासक-सज्जेत्यभिधीयते। भरतस्ता परिभाषते—

> उचिते वासके या तु रतिसम्भोगलालसा ।
> मण्डनं कुरुते हृष्टा सा वै वासकसज्जिका ॥
>
> ना० शा० २२. २१३

धनञ्जयस्तु भरतं संक्षेपेणानुहरत्येव।

---

१ इदं प्रकरणं तात्कालिकीं राजकीयप्रवृत्तिं प्रकटयति। आदर्शविमुखा एते राजानः समाजस्य पतनाय बभूवुः, यतो हि नाम समाजो राजानमेवानुवर्तते। यथा भरत आह—"यान् यान् प्रकुरुते राजा तांस्तान् लोकोऽनुवर्तते।" अत्र नेदं विस्मरणीयं यद् योरपीय-देशेषु राज्ञां नागरिकाणां च प्रणय-परिधिरतिबृहद् बभूवेति तत्रत्यनाट-कानामितिवृत्तैः प्रसिद्धम्।

२. दश० २. २० अन्यस्त्रो कन्यकोढा च।

विरहोत्कण्ठिता

भरतानुसारतः वासकसज्जाया नायको यदि यथासमयं नायाति तर्हि सा विरहोत्कण्ठिता भवति ।

वासके नागतः प्रियः ।

धनञ्जयो भरतमेवानुहरति ।

खण्डिता

भरतधनञ्जयौ तां नायिकां खण्डितां वदतो यस्याः रमणोऽन्यनायिका-सक्त्या तां न संगच्छते ।

कलहान्तरिता

पत्या कलहकारिणी नायिका कलहानन्तरं तस्माद्विदूरा भवति । सामर्षं च कुरुते । नायकस्तु ईर्ष्यावशीभूतस्तां न मिलति । ईदृशी नायिका कलहान्तरिता भवति । धनञ्जयस्तामनुशयभावापन्नामपि लक्षयते ।

विप्रलब्धा

दूतद्वारेण संगमनार्थं प्रतिज्ञाय यदि नायको नागच्छेत् तर्हि नायिका विप्रलब्धा भवतीति भरतधनञ्जययोर्मतम् ।

प्रोषितप्रिया

यस्या नायिकायाः प्रणयी प्रवासं करोति, सा यथानाम प्रोषितप्रिया भवति । भरतस्तस्या रूपं वर्णयति—

प्ररूढालककेशान्ता भवेत् प्रोषितभर्तृका । २२. २१८

अभिसारिका

धनञ्जयस्याभिसारिका तु संक्षेपेण वर्णिता—

कामार्ताभिसरेत्कान्तं सारयेद्वाभिसारिका । २.२७

भरतस्तावदभिसारिकाया विस्तृतं लक्षणं ब्रूते—

हित्वा लज्जां तु या श्लिष्टा मदेन मदनेन च ।
अभिसारयते कान्तं सा भवेदभिसारिका ॥

अभिनवगुप्तो व्याख्याति—अभिसरः सहायः । तस्य व्यापारेण प्रिय-तममाक्रामति ।

अभिसारिका तु वेश्या वा कुलजा वा प्रेष्या वा भवेत् । अभिसरणकाले तासां भावविशेषा भरतेन वर्णिताः —

वेश्या

> समदा मृदुचेष्टा च तथा परिजनावृता ।
> नानाभरणविन्यासै गच्छेद् वेश्याङ्गना शनैः ॥ २२. २२७

कुलजा

> संलीना स्वेषु गात्रेषु त्रस्ता विनमितानना ।
> अवगुण्ठनसंवीता गच्छेत् कुलजाङ्गना ॥ २२. २२८

प्रेष्या

> मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
> आविद्धगतिसंचारा गच्छेत् प्रेष्या समुद्धतम् ॥ २२. २२९

सुप्तं नायकं केन विधिना जागरयेदिति भरतेन प्रोक्तम्—

> अलंकारेण कुलजा वेश्या गन्धैस्तु शीतलैः ।
> प्रेष्या तु वस्त्रव्यजने कुर्वीत प्रतिबोधनम् ॥ २२. २३१

भरतस्तु राजकीयनायिकानां परिगणनं समन्ततः प्रस्तौति । धनञ्जयस्तु तासामवहेलनामेव प्रदर्शयते । नाटकनाटिकादिषु महादेवी-प्रभृति-नायिकानां स्थानं महत्त्वपूर्णं वर्तते, किन्तु धनञ्जयस्ता न परिभाषत इति तस्य त्रुटिरेव । एतत्प्रकरणं तु भरतानुसारेणावधेयम् ।

नानाप्रकृतिलक्षणा नायिका धीरा, ललिता, उदात्ता, निभृता च राजकीया भवन्ति । एते भेदाश्चतुर्विधानां दिव्या-नृपपत्नी-कुलस्त्री-गणिकानां च भवन्ति । तत्र दिव्या राजाङ्गनाश्च गुणयुक्ता भवन्ति । कुलजाङ्गना उदात्ता, निभृताश्च भवन्ति । गणिका शिल्पकारिका च ललिते अप्युदात्ते च स्तः ।[1]

अन्तःपुरचारिण्यः स्त्रियः

भरतोऽन्तःपुरस्थनारीणां परिचयं सम्यक् प्रस्तौति । तद्यथा,

> महादेवी तथा देव्यः स्वामिन्यः स्थापिता अपि ।
> भोगिन्यः शिल्पकारिण्यो नाटकीयाः सनर्तकाः ॥
> अनुचारिकाश्च विज्ञेयास्तथा च परिचारिकाः ।
> तथा संचारिकाश्चैव तथा प्रेषणकारिकाः ॥
> महत्तर्यः प्रतीहार्यः कुमार्यः स्थविरा अपि ।
> आयुक्तिकाश्च नृपतेरयमन्तःपुरे जनः ॥ २४. ३०-३२

१. ना० शा० २४. २३-२६

एतासु महादेवी-प्रभृति शिल्पकारिणीपर्यन्तं नायिका भवन्ति। एतासां वर्णनमधोविधं नाट्यशास्त्रे विद्यते—

महादेवी

अत्र मूर्धाभिषिक्ता या कुलशील-समन्विता।
गुणैर्युक्ता वयस्था च मध्यस्था क्रोधना तथा॥
मुक्तेर्ष्या नृपशीलज्ञा सुखदुःखसहा समा।
शान्तिस्वस्त्ययनैर्भर्तुः सततं मंगलैषिणी॥
शान्ता पतिव्रता धीरा अन्तःपुरहिते रता।
एभिर्गुणैस्तु संयुक्ता महादेवीत्युदाहृता॥ २४. ३३-३५

अभिनवगुप्तानुसारेण सर्वेषां मूर्धनि प्रधानस्थानेऽभिषिक्ता भवति महादेवी। सा मध्यस्थेति वयसि मध्यमे तिष्ठति। महादेवी तु शृङ्गारोचिता नातीव प्रतिभाति। सा महादेवी आभिमुख्यं नायकस्य प्रयाति।

देवी

एभिरेव गुणैर्युक्तास्तत्संस्कारविवर्जिताः।
गर्विताश्चातिसौभाग्याः पतिसम्भोगतत्पराः॥
शुचिनित्योज्ज्वलाकाराः प्रतिपक्षेऽभ्यसूयिकाः।
वयोरूपगुणाढ्या यास्ता देव्य इति भाषिताः॥ २४. ३६-३७

तत्र बहवो देव्यो नायिका बभूवुः।

स्वामिनी

सेनापतेरमात्यानां भृत्यानामथवा पुनः।
भवेयुस्तनया यास्तु प्रतिसम्मानवर्जिताः॥
शीलरूपगुणैर्यास्तु सम्पन्ना नृपतेर्हिताः।
स्वगुणैर्लब्धसम्माना: स्वामिन्य इति ताः स्मृताः॥
ना० शा० २४. ३८-३९

स्थापिता

रूप-यौवनशालिन्यः कर्कशा विभ्रमान्विताः।
रतिसम्भोग-कुशलाः प्रतिपक्षाभ्यसूयिकाः॥
दक्षा भर्तुश्च चित्तज्ञा गन्धमाल्योज्ज्वलाः सदा।
नृपतेश्छन्दवर्तिन्यो न ह्रीर्ष्यामानगर्विताः॥
उत्थिताश्च प्रमत्ताश्च त्यक्तालस्या न निष्ठुराः।
मान्यामान्यविशेषज्ञाः स्थापिता इति ताः स्मृताः॥
ना० शा० २४ ४०-४२

योगिनी

> कुलशीललब्धपूजा मृदवो नातिचोत्कटाः ।
> मध्यस्था निभृताः शान्ता योगिन्य इति ताः स्मृताः ॥
>
> ना० शा० २४.४३

शिल्पकारिका

> नानाकला-विशेषज्ञा नानाशिल्पविचक्षणाः ।
> गन्धपुष्पविभागज्ञा लेख्यालेख्य-विकल्पिका ।
> शयनासनभागज्ञाश्चतुरा मधुरास्तथा ।
> दक्षाः सौम्याः स्फुटाः श्लिष्टा निभृताः शिल्पकारिकाः ॥

राज्ञोऽन्तःपुरेऽन्या बहवो नार्यो नियुक्ता आसन् । तथा हि—

नाटकीया नर्तकी च नाट्यनृत्याभिनयेन मनोरञ्जनार्थमासन् । अनुचारिका सतत राजानमनुचरतिस्म । शय्यापाली, छत्रधारी, व्यजन-धारिणी, संवाहिका, गन्धयोक्त्री, प्रसाधिका, आभरणयोक्त्री, माल्यसंयोजिका च परिचारिका बभूवुः । राजकीय-कक्षासु, उपवनेषु, मन्दिर-प्रासादेषु संचारिका वा यामकिनी वा रात्रौ रक्षार्थमभवत् । परिचारिका प्रेषण-कर्मणि नियुक्तासीत् । महत्तराया विशिष्टं स्थानमासीद् भरतानुसारेण—

> सर्वान्तःपुर-रक्षासु स्तुतिभिस्स्वस्त्ययनेन च ।
> या वृद्धिमभिनन्दन्ति ता विज्ञेया महत्तराः ॥ २४.५९

प्रतीहारी नाटकेषु सुप्रसिद्धैव वर्तते । तस्या कार्याणि भरतेन वर्णितानि—

> सन्धि विग्रह-सम्बद्ध-नानाचार-समुत्थितम् ।
> निवेदयन्ति याः कार्यं प्रतिहार्यस्तु ताः स्मृताः ॥ २४.६०

अन्तःपुरे वृद्धाः पूर्वराजानां नीतिपथस्य व्याख्यानाय नियुक्ता आसन् । तद्यथा,

> पूर्वराजनयज्ञा याः पूर्वराजाभिपूजिताः ।
> पूर्वराजानुचरितास्ता वृद्धा इति संज्ञिताः ॥ २४.६२

आयुक्तिकानां स्थानमन्तःपुरचारिणीषु स्त्रीषु सविशेष वर्तते । तद्यथा—

> भाण्डागारेष्वधिकृतास्तथायुधाधिकृतास्तथा ।
> फलमूलौषधीनां च तथा चैवान्ववेक्षिकाः ॥
> गन्धाभरणवस्त्राणां माल्यानां चैव चिन्तिकाः ।
> बह्वाश्रये तथा युक्ता ज्ञेया ह्यायुक्तिकास्तु ताः ॥ ना० शा० २४.६२-६४

नायिकानां स्वभावजा भेदाः

उत्तमा, मध्यमा, अधमा च नारीणां त्रिविधा प्रकृतिर्भवति। भरतस्तु नायिकादीनां भेदमुत्तमादिगुणैः प्रस्तौति। तद्यथा,

सर्वासामेव नारीणां त्रिविधा प्रकृतिः स्मृता।
उत्तमा, मध्यमा, नीचा वेश्यानां तु स्वभावजा॥

उत्तमा

या विप्रियेऽपि तिष्ठन्तं प्रियं वदति नाप्रियम्।
न दीर्घरोषा च तथा कलासु च विचक्षणा॥
शीलशोभाकुलाधिक्यैः पुरुषैर्या च काम्यते।
कुशला कामतन्त्रेषु दक्षिणा रूपशालिनी॥
गृह्णाति कारणाद् रोषं विगतेर्ष्या ब्रवीति च।
कार्यकाल-विशेषज्ञा सुरूपा सा स्मृतोत्तमा॥ २३.३५-३८

न खलु कवयो नायिकानामेतान् गुणान् वर्णयितुं सदा समुत्सुका दृश्यन्ते इति महती त्रुटिस्तेषां निबन्धानामस्त्येव। नायिकानां कलासु वैचक्षण्यं, शीलं, कार्यकालविशेषज्ञत्वं च विरल-विरलमेव रूपकेषु परिस्फुरन्ति। प्रायशो नायिकानां रूपमेव नायकमाकर्षति। तथा साधुरीतिर्लोकादर्शसमुपस्थापनापेक्षया।

मध्यमा

पुरुषैः काम्यते या तु तथा कामयते च तान्।
कामोपचारकुशला प्रतिपक्षाभ्यसूयिनी॥
ईर्ष्यातुरा स्वनिभृता क्षीणक्रोधातिगर्विता।
क्षणप्रसादा या चैव सा नारी मध्यमा स्मृता॥ २३.३९-४०

अधमा

अस्थानकोपना या तु दुष्टशीलातिमानिनी।
चपला परुषा चैव दीर्घरोषाधमा स्मृता॥ २३.४१

यौवन-भेदः

भरतो नारीणां विकासानुक्रमेण चतुरो यौवन-भेदान् वर्णयति। तत्र स प्रथमं नारीणां लावण्य-रूपादिकं वर्णयति, पश्चाच्च शृंगारं प्रति तासामुत्साहं चित्रयति। तद्यथा,

प्रथमयौवनम्

> नेपथ्यरूपचेष्टागुणेन शृंगारमासाद्य
> पीनोन्नतजघनाधरस्तनं कर्कशं रतिमनोज्ञम् ॥
> शृंगार-समुत्साहं प्रथमं तद्यौवनं ज्ञेयम् ॥ २३.४३
> नात्यर्थं क्लेशसहा न कुप्यति न हृष्यति स्त्रीभ्यः ।
> सौम्यगुणेष्वासक्ता नारी नवयौवना ज्ञेया ॥ २३.४८

दशरूपके धनञ्जयस्य मुग्धा नायिका भरतस्य प्रथमयौवनवतीव प्रतिभाति । मुग्धा धनञ्जयानुसारेण—

> नववयःकामा रतौ वामा मृदु क्रुधि ॥ २.१६

प्रथमयौवनं मुग्धाया भवति ।

द्वितीय-यौवनम्

भरतानुसारेण

> गात्रं पूर्णावयवं पीनौ च पयोधरौ नतं मध्यम् ।
> कामस्य सारभूतं यौवनमेतद् द्वितीयं तु ॥

द्वितीय-यौवन-भेदे कीदृशः स्वभावो भवति—

> किञ्चित्करोति मानं किञ्चित् क्रोधं च मत्सरं चैव ।
> क्रोधे च भवति तूष्णीं यौवन-भेदे द्वितीये तु ॥
>
> ना० शा० २३.४४,४६

भरतस्य द्वितीयं यौवनं तु धनञ्जयस्य मध्यायाः स्यात् । तद्यथा,

> मध्योद्यद्यौवनानङ्गा मोहान्तसुरत-क्षमा ॥ २.१६

> धीरा सोत्प्रास-वक्रोक्त्या मध्या साधु कृतागसम् ।
> खेदयेद्दयितं कोपादधीरा परुषाक्षरम् ॥ २.१७

तृतीयं यौवनम्

भरतस्य तृतीयं यौवनं धनञ्जयस्य प्रगल्भाया अवस्था स्यात् । भरतानुसारेण तृतीयं यौवनं तु—

> सर्वाङ्गसंयुक्तं रतिकरणोत्पादनं रतिगुणाढ्यम् ।
> कामाप्यायितशोभं यौवनमेतत् तृतीयं तु ॥
> रतिसम्भोगे दक्षा प्रतिपक्षासूयिनी रतिगुणाढ्या ।
> अनिभृतगर्वितचेष्टा नारी ज्ञेया तृतीये तु ॥ २३.४५,५०

धनञ्जयस्येदृशी तु प्रगल्भा भवति—[१]

> यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्गके ।
> विलीयमानेवानन्दाद् रतारम्भेऽप्यचेतना ॥ २.१८

चतुर्थ-यौवनम्

भरतस्य चतुर्थ-यौवनं शृंगारस्यान्तिमावस्था भवति । तद्यथा—

> नवयौवने व्यतीते तथा द्वितीये तृतीयके वापि ।
> शृंगार-शत्रुभूतं यौवनमेतच्चतुर्थं तु ॥
> अम्लानगण्डजघनाधरस्तनं किञ्चिदूनलावण्यम् ।
> कामं प्रति नोच्छ्वासं यौवनमेतच्चतुर्थं तु ॥
> चित्तग्रहण-समर्था कामाभिज्ञा स्वमत्सरोपेता ।
> अविरहितमिच्छति सदा पुरुषं नारी चतुर्थे तु ॥

ना० शा० २२·४६,४७,५१

इदं चतुर्थं यौवनं धनञ्जयेन न संगृहीतम् ।

धनञ्जयस्तु नायिकाविशेषान् सूक्ष्मतरं पर्यालोचयति । नायिकानां कृतागसं नायकं प्रति तर्जनं, ताडनं, परुषाक्षरप्रयोजनञ्च विरल-विरलमेव रूपकेषु प्रवर्तन्ते, किन्तु परवर्तिनाट्याचार्याः सोत्साहं तान्यधिकृत्य नायिका-प्रभेदान् प्रस्तुवन्ति । धनञ्जयस्तु इदं क्रोधोद्भवं वर्तनं नायिकानां सम्यग्वर्णयति । नैतत्सर्वं भारतीये नाट्यशास्त्रे प्रकाशितम् ।

अन्यस्त्री

धनञ्जयानुसारेण तु कन्यका ऊढा चान्यस्त्रीति वक्तव्यम् । कन्यकास्तु गान्धर्व-विवाहरीत्या स्वीक्रियन्ते । ऊढाः पुनः भाणादिषु रूपकेषु नायिका दृश्यन्ते । अभिनवगुप्तानुसारेणान्तःपुरस्य परिचारिका राज्ञः प्रच्छन्नकामितायाः प्रणयानुरागिण्यो नायिका अन्यस्त्रिय एव ।[२]

साधारणस्त्री

साधारणस्त्रियो गणिकाः सन्ति । ता द्विविधा भवन्ति – एकान्तावरुद्धाः, सर्वभोग्याश्च । एकान्तावरुद्धा तु राज्ञामपि प्रणयिनी भवितुमर्हतीति प्रच्छन्न-कामिता-प्रकरणे निर्दिष्टम् । सर्वभोग्या-विषये धनञ्जयो विशदयति—

१. प्रगल्भायाः कोपचेष्टां वर्णयन् धनञ्जय आह—

> सावहित्थादरोदास्ते रतौ धीरेतरा क्रुधा ।
> सन्तर्ज्य ताडयेन्मध्या मध्या धीरेव तं वदेत् ॥ २.१९

२. इदं तु राज्ञां प्रच्छन्नकामिता-प्रकरणे सविस्तरं व्याख्यातम् ।

छन्नकाम-सुखार्थाज्ञस्वतन्त्राहंयुपण्डकान् ।
रक्तेव रञ्जयेदाढ्यान्निःस्वान् मात्रा विवासयेत् ॥

दश० २. २२

नायिकाया नायकस्य च परस्परं मिलनं कथं भवेदिति प्रकरणे नायिकाना सहाया धनञ्जयेन परिगणिता —दूती, दासी, सखी, कारुः, धात्रेयी, प्रतिवेशिका, लिंगिनी, शिल्पिनी च ।

योषिदलङ्काराः

नायकस्य यथा सात्त्विकगुणा भवन्ति, तथैव नायिकाया विंशतिः अलङ्काराः सत्त्वजाः सात्त्विका वा सन्ति । तेषु भावो हावश्च हेला च त्रयः शरीरजा भवन्ति, शोभा, कान्तिः, दीप्तिः, माधुर्यम्, प्रगल्भता, औदार्यम्, धैर्यञ्च सप्त भावा अयत्नजा भवन्ति । लीला, विलासो, विच्छित्तिर्विभ्रमः, किलकिञ्चितम्, मोट्टायितम्, कुट्टमितम्, बिब्बोकः, ललितम्, विहृतञ्च दशभावाः स्वभावजाः सन्ति ।

एतेषां लक्षण-विषये भरतस्यानुसरणमेव धनञ्जयस्य साधारण-पद्धतिः ।

अभिनवगुप्तानुसारेणैषामलंकाराणां तावदेव महत्त्वं स्त्रीणां कृते भवति, यावद् ब्राह्मणानां कृते उपनयनस्य भवति ।[1] अन्यच्च भरतानुसारेण ।

अलंकारास्तु नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः । ना० शा० २२. ४

अर्थादलंकाराणां सन्निवेशेन भावानां रसानाञ्च योऽतिशयः समुत्पद्यते, तेन काव्यं रोचिष्णु जायते ।

---

१. तस्य ब्राह्मणस्योपनयनमिव भविष्यत्समस्तपुरुषार्थसम्पत्तियोग्यत्वेन योषितां परमो ह्युत्सवो लोकोत्तरोऽलंकारः सातिशयमानन्द-स्थानं परं पवित्रमित्युपपद्यते । ना० शा० २२.११ अधिकृत्य भारती ।

वृत्तयः

सर्वेषामेव काव्यानां मातृका वृत्तयः स्मृताः । ना० शा० १८. ४

सर्वो हि संसारो वृत्तिचतुष्केण व्याप्तः । वृत्त्यङ्गानि सर्वकाव्येषु सन्त्येव । व्यापारः पुमर्थसाधको वृत्तिः वा । वृत्तयस्तु नायकानां चेष्टा एवेति मतमभिनवगुप्तस्य ।[1] तद्वृत्तिचतुष्टयं भारती, सात्त्वती, कैशिकी, आरभटी च वेदेभ्यो विनिःसृतम्—

ऋग्वेदाद् भारती क्षिप्ता यजुर्वेदाच्च सात्त्वती ।
कैशिकी सामवेदाच्च शेषा चाथर्वणादपि ॥

ना० शा० २०.२५

अभिनवगुप्तानुसारेण तु—'पाठ्यप्रधाना भारती, अभिनय-प्रधाना सात्त्वती, अनुभावाद्यावेशनयरस-प्रधानारभटी, गीतवाद्योपरंजकप्रधाना कैशिकीति ।

नैता वृत्तय एकान्तं विलसन्ति । अभिनवगुप्त एतदेव विशदयन् प्राह—

अथासां परस्परसङ्कीर्णतया लक्ष्ये (बहुरूपतां) वहन्तीनां यत्र यत्प्राधान्येनान्यतमरूपावभासनं तत्प्रदर्शयितुमुत्तरो ग्रन्थः । (वाङ्मनःकायचेष्टांशेषु) नह्येकोऽपि कश्चिच्चेष्टांशोऽस्ति । कायचेष्टा अपि हि मानसीभिः सूक्ष्माभिश्चेष्टाभिर्व्याप्यन्त एव ।...... अन्योऽन्यं संवलिता वृत्तयः केवलं क्वचित् किञ्चिदधिकमिति प्राधान्येन व्यपदेशः परिवर्तते ।[2] करुणादावपि च मनोदेहव्यापारसम्भवेऽपि बाहुल्येन वाग्व्यापार-सम्भवात् भारती-वृत्तिरुच्यते ।[3]

१. 'द्वितीयभागे पृष्ठं ४५२ द्रष्टव्यम् । वृत्तयश्चेष्टा मातर इव' इत्यादि ना० शा० १८.१ अधिकृत्य भारती ।

२. ना० शा० २०.२६ अधिकृत्य भारती ।

३. ना० शा० २०.१११ अधिकृत्य भारती ।

धनञ्जयानुसारेण तु नायकादीनां व्यापारमाश्रित्य वृत्तिर्भवति।[1] एतदेवाभिनवगुप्तेन प्रथितम् —

'व्यापारः पुमर्थसाधको वृत्तिः'।

स च सर्वत्रैव वर्ण्यते इत्यतो वृत्तयः काव्यस्य मातृकाः। न हि किञ्चिद् व्यापारशून्यं वर्णनीयमस्ति।[2]

भारतीवृत्तिः

भरतो भारतीं परिभाषते —

या वाक्प्रधाना पुरुष-प्रयोज्या
स्त्रीवर्जिता संस्कृतपाठ्ययुक्ता।
स्वनामधेयैर्भरतैः प्रयुक्ता
सा भारती नाम भवेत्तु वृत्तिः॥ २०.२६

इयं परिभाषा समाधानमर्हति। स्त्रीवर्जितेति किम्? अभिनवगुप्तो व्याख्याति — कैशिकीप्राधान्यावकाशं गमयति। अर्थात् स्त्रियः स्युर्नाम, किन्तु तासां वाचः प्राधान्यं न स्यात्, यतोहि नाम स्त्रीणां व्यापाराणां प्राधान्यं कैशिकीवृत्तौ दर्शनीयम्। तथैव संस्कृतपाठ्ययुक्तेति विवरणीयम्। प्राकृतपाठः कैशिक्यां विलसतीति व्यङ्ग्यम्। प्राकृतभाषा भारत्यां भवेन्नाम, किन्तु तस्याः सर्वोत्तमोपयोगः स्त्रीणां प्राकृतभाषया कैशिक्यामेव विलसतीति। धनञ्जयेनास्मिन् विषये मौनं नावलम्बितम्। स लक्षयते — भारती संस्कृतप्रायो वाग्व्यापारः। धनिकोऽपि विवृणोति — पुरुषविशेषप्रयोज्यः संस्कृतबहुलः इत्यादि।[3]

भारत्याश्चत्वारो भेदाः — प्ररोचना, आमुखम्, वीथी, प्रहसनं च भवन्ति। अस्मिन् प्रकरणे भेदाः प्रकाराः न सन्ति अपि तु अंशा एवेति अभिनवगुप्तेन व्याख्यातम्।

भरतानुसारेण तु

भेदास्तस्यास्तु विज्ञेयाश्चत्वारोऽङ्गत्वमागताः॥ २०.२७

अंशभूताः प्ररोचनादयोऽङ्गत्वं प्राप्ताः।

---

१. तद् व्यापारात्मिका वृत्तिः। दश० २.४७

२. ना० शा० १८.११० अधिकृत्य भारती।

३. भाषा-प्रकृति-विषयकमेतन्नियमनमनावश्यकं प्रतिभातीति अस्मन्मतम्।

प्ररोचना

भरतः प्ररोचनां परिभाषते—

जयाभ्युदयिनी चैव मंगल्या विजयावहा ।
सर्वपापप्रशमनी पूर्वरङ्गे प्ररोचना ॥ २०·२८

धनञ्जयस्तावत् प्ररोचनामन्यथा परिभाषते—

उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना । ३.५

श्रोतारो रूपकाभिनयं प्रति रुचिपरायणा भवन्तु इत्युद्दिश्य रूपकस्य प्रशंसनं प्ररोचना भवति ।

आमुखम्

भरत आमुखं परिभाषते—

नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्तु कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैर्वीथ्यङ्गैरन्यथापि वा ।
आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि वा ॥

अभिनवगुप्तानुसारेण 'चित्रैरिति भाविरूपकार्थानुकूलविषयानुसारिभिः' आमुखं भवति । आमुखमिति (१) मुखसन्धेर्निवर्तते यतः (२) आमुखमीषन्मुखं प्रस्तूयते अनया (३) कार्याभिमुखं नीयते पूर्वरङ्गविधिः (४) तदभिमुखं वा कार्यारम्भः तन्नीयते । पूर्वरङ्गप्रसङ्गेन या प्रस्तावना भवति, सा नास्ति भारतीभेदः ।

धनञ्जयो भरतानुसारेण प्रायश आमुखं परिभाषते । भरतमतेनामुखस्य पंच भेदा भवन्ति--कथोद्घातः, प्रवृत्तकम्, प्रयोगातिशयः, उद्घात्यकः, अवलगितश्च ।[1] धनञ्जयः केवलमङ्गत्रयं वितनुते । स उद्घात्यकमवलगितं च वीथ्यङ्गेषु निवेशयति, सर्वाणि वीथ्यङ्गानि चामुखे निवेशयति । भरतोऽपि सर्वाणि वीथ्यङ्गानि आमुखे निवेशयति ।[2]

एतेषामामुखाङ्गानां विवरणं पूर्वरङ्गप्रसङ्गेऽभिधास्यते वीथ्यङ्गानां च वर्णनं वीथीकोटिक-रूपकस्य प्रकरणेऽभिधास्यते ।

अत्र कतिपय सन्दिग्धस्थलानि वर्तन्ते । प्रथमं तावत् यदि नाम वृत्तयो नायकव्यापारात्मिकाः सन्ति तर्हि कथं प्ररोचना भारतीवृत्तेरङ्गं भवेत् । तत्र नायकव्यापारो नास्ति । अन्यच्च प्रहसनं यदि तत्र स्यात्, तर्हि

---

१. उद्घात्यकः कथोद्घातः, प्रयोगातिशयस्तथा ।
प्रवृत्तकावलगिते पञ्चाङ्गान्यामुखस्य तु ॥ २०.३३

२. ना० शा० २०.३७

भाणोऽपि कथं तत्र नावस्थीयेत । उभयोर्वाचिकाभिनयप्राधान्यत्वात् तत्र भारतीवृत्तेरवसरो वर्तते एव । अस्मिन् प्रसङ्गे रामचन्द्रगुणचन्द्रयो-र्मतमुल्लेखनीयम्—

सर्वरसवीथी-प्रधान-शृङ्गार-वीर-भाण-प्रधान-हास्य-प्रहसनानि स्वयमेव भारत्यामेव वृत्तौ निर्यन्त्रितानि ।[1] दशरूपकेऽपि भाणो भारती-प्रधान इति स्पष्टीकृतम् ।[2]

कैशिकी

भरतः कैशिकीं वृत्तिं परिभाषते[3]—

> या श्लक्ष्णनैपथ्यविशेषचित्रा
> स्त्रीसंयुता या बहुनृत्तगीता ।
> कामोपभोगप्रभवोपचारा
> तां कैशिकीं वृत्तिमुदाहरन्ति ॥ २०.५२

अभिनवगुप्तानुसारेण हृदयग्राहि वस्त्रमाल्यादिना चित्रा, गीतनृत्य-निर्भरा, शृङ्गार-व्यवहारमयी कैशिकी वृत्तिर्भवति । धनञ्जयः गीत नृत्य-विलासाद्यैः शृङ्गारचेष्टितैः कैशिकी मृदुर्भवतीति परिभाषते ।

नर्म

कैशिक्याश्चत्वारो भेदाः सन्ति—नर्म, नर्मस्फञ्जः, नर्मस्फोटः, नर्म-गर्भश्च । नर्म तावत् भरतानुसारेणाधोविध लक्षितं भवति- (१) आस्थापित-शृङ्गारम् (२) विशुद्धकरणम् (३) निवृत्तवीररसं (४) हास्यवचनं च । एतद-नुसारेण कैशिक्या शृङ्गारस्य प्रधानता, भावानां विशुद्धिः, वीररसस्य चाभावः, हास्यांशानां प्रचुरता च द्योतिता । त्रिविध तु नर्म भवति (१) ईर्ष्याक्रोध-प्रायम् (२) उपालम्भसूचनार्थं (३) परहृदयमाक्षेपकृच्च । भरतो नर्म सविप्रलम्भमिति प्रपञ्चयति ।[4] को विप्रलम्भो नाम ? विप्रलम्भस्तु कस्या-श्चिन्नायिकाया अतिसन्धानम् । स तु वासवदत्ताया दृश्यते रत्नावल्याम् । तत्र ईर्ष्याक्रोधोपालम्भादीनां प्रादुर्भावः ।

१. नाट्यदर्पण ३.२ अधिकृत्य टीका च ।

२. भूयसा भारतीवृत्तिः । दश० ३.५३

३. रामचन्द्रगुणचन्द्रानुसारेण कैशिका स्त्रिय एव । तासामियं कैशिकी । भरतस्तु स्त्री संयुतेति विशेषणेन तदेव व्यनक्ति ।

४. ना० शा० ५७-५८ तदधिकृत्याभिनवभारती च ।

धनञ्जयस्तु अष्टादशविधं नर्माकलयति । तच्च शुद्धहास्येन, सशृंगारहास्येन, सभयहास्येन च रचितं त्रिविधम् । एतेषु शृंगारहास्यं च त्रिधा भवति—आत्मोपक्षेपः (स्वानुरागनिवेदनम्), सम्भोगेच्छाप्रकाशनम्, मानश्च । सभयहास्यं द्विविधं भवति—शुद्धभयात्मकम्, रसान्तराङ्गभूतभयात्मकञ्च । एतानि षट् प्रत्येकशः वाचा, वेषेण, चेष्टया चोपपन्नत्वात् त्रिधा भवन्ति । अतएव नर्म अष्टादशधा ।

न खलु भरतस्य नाट्यशास्त्र एतेषामष्टादशविधत्वस्य सङ्केतः । स त्रिविधं नर्म वर्णयति । षड्विधानां नर्मणां वाग्वेषचेष्टितैस्त्रिधाभूतानां नर्मणामुदाहरणानि धनिकेन न लिखितानि । एतेषां कुतस्त्यं तु भरतस्याधोलिखित-कारिकायाः प्रतिज्ञायते—

> नवसंगमसम्भोगो रतिसमुदयवेषवाक्यसंयुक्तः ।
> ज्ञेयो नर्मस्फुञ्जो ह्यवसानभयात्मकश्चैव ॥ २०.५६

नर्मस्फिञ्जविषयकाणि रतिसमुदयवेषवाक्यानि नर्म-व्याख्या-प्रकरणे धनञ्जयेन गृहीतानि । नर्मस्फिञ्ज प्रकरणे तेन रतिसमुदयादयो न वर्णिताः ।

नर्मस्फिञ्जः

स्फिञ्जस्य स्थाने स्फुञ्जः, स्फञ्जः, स्पन्दः इति च पठ्यते । भरतानुसारेण नर्मस्फिञ्जः नवसंगम-सम्भोगे प्रादुर्भवति । नायकयोरन्योन्यास्थाबन्धरूपाया रतेः समुदयः, तादृशेन वेषेण, वाक्येन वा संयुक्तो भवति । अस्थायि-सम्भोगस्यान्तो भयात्मको भवति । अभिनवगुप्तानुसारेण भयं पूर्वनायिकाकृतं स्यात् । स्फिञ्जस्तु विघ्न एव ।

धनञ्जयो भरतमेवानुहरति संक्षेपेणास्मिन् प्रकरणे ।

नर्मस्फोटः

अभिनवगुप्तानुसारेण स्फोटस्तु शृङ्गारस्य वैचित्र्यं चमत्कारोल्लासकृतस्फुटत्वम् । भरतानुसारेण विविधरसानां भावा आंशिकरूपेण न तु समग्रतयास्मिन् नर्मस्फोटे विलसन्ति । अतएव तदनु रसा भयानकहास्यरौद्रादयः केवलमाक्षिप्यन्ते एव । तत्र हासलव एव स्यान्नतु हास्यरसः ।

धनञ्जयो भरतं संक्षेपेणानुहरति ।

नर्मगर्भः

भरतानुसारेण नर्मगर्भस्तु—

> विज्ञानरूपशोभाधनादिभिर्नायको गुणैर्यत्र ।
> प्रच्छन्नं व्यवहरते कार्यवशान्नर्मगर्भोऽसौ ॥

अभिनवगुप्तो नर्मगर्भपदं व्युत्पादयति—नर्मोपयोगिनो विज्ञानाद्या गर्भीकृता इव प्रच्छन्नतया यत्रेति। यथा प्रच्छन्नरूपो नायकः संकेत-स्थानं गच्छति। एतत्सर्वं नवमङ्कुरमिव हृदये भवतीति कार्यवशात् पदस्य व्याख्या।

कैशिकीवृत्तिर्निर्हास्यापि भवतीति धनञ्जयवचनं चिन्त्यमेव।[1] नर्म तु हास्यमेव।[2] कैशिक्या हास्य-प्रधानताभिनवगुप्तेनापि विशदीकृता।

सात्वती

भरतानुसारेण सात्वती भवति—

या सात्त्वतेनेह गुणेन युक्ता
न्यायेन वृत्तेन समन्विता च।
हर्षोत्कटा संहृतशोकभावा
सा सात्त्वती नाम भवेत्तु वृत्तिः॥

वागङ्गाभिनयवती सत्त्वोत्थान-वचनप्रकरणेषु
सत्त्वाधिकारयुक्ता विज्ञेया सात्त्वती वृत्तिः॥
वीराद्भुतरौद्ररसा निरस्तशृङ्गारकरुण-निर्वेदा
उद्धतपुरुषप्राया परस्पराधर्षण-कृता च॥

ना० शा० २०. ४१-४३

अभिनवगुप्तस्तु सात्वतीं व्युत्पादयति। सात्वतो गुणो मानसो व्यापारः। सत्त्वं प्रकाशः तद्विद्यते यत्र तत् सत्त्वं मनः। तस्मिन् भवः सात्त्वतः। सत्त्वोत्थानस्य सत्त्वाधारस्य वचनं येषु प्रकरणेषु काव्यखण्डेषु इत्यादि। सात्त्विकाभिनयस्याधिकारे आधिक्यक्रियया सात्त्वती वृत्तिरुक्ता।

धनञ्जयस्तु संक्षिप्ततरमेव सात्वतीं परिभाषते—

'विशोका सात्वती सत्त्वशौर्यत्यागदयार्जवैः'

न केवलं वीरोचितामेव सात्त्वतीं परिकल्पयतीति तस्य परिभाषया स्फुटति, सत्त्वशौर्यत्यागदयार्जवादीनां गुणानां वीर एव समाहितत्वात्। किन्तु भरतेन तत्र रौद्राद्भुतयो रसयोः, उद्धतपुरुषाणां परस्पराधर्षणस्य च वैशिष्ट्येन सत्त्वशौर्यत्यागदयार्जवादीनि व्युत्क्रान्तानि। अभिनवगुप्तोऽपि सत्त्वं प्रकाश इति समर्थयन् 'उद्धतपुरुषप्राया' इत्यादि न दृष्टम्। तर्हि सात्त्वतीवृत्तौ सत्त्वाद् बहिरपि किञ्चित्तत्त्वं निभिद्यत एव।

१. अङ्गैः सहास्यनिर्हास्यैरेभिरेषात्र कैशिकी। दश० २. ५२
२. हास्यप्रवचनबहुलं नर्म। ना० शा० २०. ५७

सात्वती चतुर्विधा भवति—उत्थापकः, परिवर्तकः, संल्लापकः, सांघात्यकश्च ।

संल्लापकः

भरत संल्लापकं परिभाषते—

> **साधर्षो निराधर्षोऽपि वा रागवचनसंयुक्तः ।**
> **साधिक्षेपालापो ज्ञेयः संल्लापकः सोऽपि ।। २०.४८**

अर्थात् संल्लापके भावावेशपूर्ण वचनमधिक्षेपार्थाश्च स्युः । पूर्वसूरिभिरपेक्षितमाधर्षवचनं तत्र नावश्यकम् ।

धनञ्जयस्तावदन्यथा परिभाषते । तद्यथा,

> **संलापको गभीरोक्तिर्नानाभावरसा मिथः ।**

गभीरवचसा संलापो भवतीति नैकान्तिकं लक्षणम् ।

उत्थापकः

भरतस्तूत्थापकं वर्णयति—

> **अहमप्युत्थास्यामि त्वं तावद्दर्शयात्मनः शक्तिम् ।**
> **इति संघर्षसमुत्थः तज्ज्ञैरुत्थापको ज्ञेयः ।। २२. ४५**

धनञ्जयो भरतं तत्त्वतोऽनुहरति ।

सांघात्यकः

भरतधनञ्जययोः सांघात्यकस्य परिभाषा समानेव वर्तते । मन्त्रशक्त्या, अर्थशक्तया, दैवशक्त्या शत्रूणा परस्परविघटनमेव सांघात्यकः । विघटनं क्वचिदात्मदोषेण, वाचा वा सम्भाव्यत इति भरतस्याधिकं वाच्यम् ।

परिवर्तकः

किमपि हस्तगतं कार्यं परित्यज्यान्यकार्यग्रहणमेव परिवर्तकः कार्यपरिवर्तनमेव । भरतधनञ्जययोर्द्वयोः समाना परिभाषा परिवर्तकस्य वर्तते ।

आरभटी

भरतानुसारेणारभटी भवति—

> **आरम्भटप्रायगुणा तथैव बहुकपटवञ्चनोपेता ।**
> **दम्भानृतवचनवती त्वारभटी नाम विज्ञेया ।। २०.६४**

आरभटास्तु क्रोधावेगादि-विशिष्टा जनाः साहसिका एव । तत्र क्रोधावेग-कपट-वञ्चना-दम्भानृतवचनानां समाहारो भवेत् ।

धनञ्जयस्तावद् भरतलक्षणात् विशिनष्टि तद्यथा,

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।

भरतधनञ्जययोरारभटी-विषयकं वैषम्यं यत्र-तत्र संक्षिप्ति-सम्फेट-वस्तूत्थापनावपातानामारभट्या अङ्गानां लक्षणैरपि परिचीयते ।

संक्षिप्तिः

दशरूपकस्य संक्षिप्तिः भारतीये नाट्यशास्त्रे संक्षिप्तक इति प्रोक्तम् । भरतानुसारेण—

अन्वर्थशिल्पयुक्तो बहुपुस्तोत्थानचित्रनेपथ्यः ।
संक्षिप्तवस्तु-विषयो ज्ञेयः संक्षिप्तको नाम ॥ २०.६८

अर्थात् कुशलशिल्पिविरचिता अर्थाः तत्र भवन्ति । तत्र पुस्तस्योत्थानम्, विचित्रं नेपथ्यं (कञ्चुकचर्मवर्मादि) च प्रस्तूयेते । अभिनवगुप्तस्तु संक्षिप्तं व्युत्पादयन्ति—

संक्षयाक्षिप्तानि वस्तूनि विषयोऽस्येति संक्षिप्तकः । मायाशिरोनिक्षेपादि प्रस्तूयतेऽनया वृत्या ।

धनञ्जयस्य संक्षिप्तेः परिभाषा तत्त्वतः समानैव ।

सोऽपरां परिभाषामपि प्रस्तौति—

पूर्वनेतृनिवृत्त्यान्ये नेत्रन्तरपरिग्रहः । २.५७

सम्फेटः

भरतधनञ्जयौ सम्फेटं तत्त्वतः समानमेव परिभाषेते । तद्यथा,

सम्फेटस्तु समाघातः क्रुद्धसंरब्धयोर्द्वयोः । दश० २.५८

भरतस्तु युद्धे कापटिकयोजनमभिप्रैति ।[1]

वस्तूत्थापनम्

भरतानुसारेण तु

सर्वरससमासकृतं सविद्रवविद्रवाश्रयं वापि ।
नाट्यं विभाव्यते यत्तद् वस्तूत्थापनं ज्ञेयम् ॥ २०.७०

अभिनवगुप्तस्तूत्थापनं व्याकरोति—वस्तूनां बहूनामर्थानामुत्थापनं प्रसङ्गागतनिबन्धनं यत्र कार्ये तत्तथोक्तम् । अत्र मायादेरीषदपि योगो नास्ति किन्तु धनञ्जयो मायया वस्तूत्थापनमभिप्रैति । तद्यथा,

1. बहुयुद्ध-नियुद्धकपट-निर्भेदः । ना० शा० २०.७१

मायाद्युत्थापितं वस्तु वस्तूत्थापनमिष्यते ॥ दश० २.५८

अवपात:

भरतधनञ्जयो समानमेव लक्षणमवपातस्य प्रस्तुत: ।

तत्र पात्राणां निष्क्रमणं (बहिर्गमनम्), प्रवेश:, त्रासो, विद्रवश्च भवन्ति । भरतेन प्रोक्तमासीद्यत् भयेन हर्षेण वावपातो जायते । अभिनव-गुप्त: स्पष्टयति—अवपतन्ति पात्राणि यस्मिन्निति अवपात: ।

एतासु चतुर्वृत्तिषु भारती शाब्दी वृत्ति: स्यात् । शेषा: तिस्र आर्थी वृत्तय: । उद्भटसम्प्रदाये काचित् पञ्चमी वृत्ति समर्थिता । न सा धनञ्जयस्याभिप्रेता ।

रस-वृत्ति-संविन्यास:

कस्मिन् रस-प्रकरणे का वृत्तिर्बाहुल्येन समाश्रिता भवेदिति भरतो धनञ्जयश्च नियमयत । तयोर्विधाने साम्यं नास्तीति अधोलिखित-तालिकया स्पष्टीक्रियते ।[१]

वृत्ति:	धनञ्जयमतेन रस:	भरतमतेन रस:
कैशिकी	शृङ्गार:	हास्य:, शृङ्गारश्च
सात्त्वती	वीर:	वीरोऽद्भुतश्च
आरभटी	रौद्र:, बीभत्स:	रौद्रो भयानकश्च
भारती	सर्वे रसा:	बीभत्स: करुणश्च

न खलूपर्युक्तविधानं भरतस्य सार्वत्रिकम् । तथा हि, वीथी तु शृङ्गार-प्रधाना कैशिकीवृत्तिमयी भवति । सा भारतीवृत्तेरङ्गभूतेति भरतस्याभि-मतम् ।

भरतानुसारेण नाटके प्रकरणे च सर्वा वृत्तयो विलसन्तु । अवशिष्टेषु रूपकेषु कैशिकी वृत्तेरभाव: स्यात् ।[२]

१. हास्यशृङ्गारबहुला कैशिकी परिचक्षिता ।
सात्त्वती चापि विज्ञेया वीराद्भुतसमाश्रया ॥
रौद्रे भयानके चैव विज्ञेयारभटी बुधै: ।
बीभत्से करुणे चैव भारती सम्प्रकीर्तिता ॥ ना० शा० २०.७३,७४

२. ना० शा० १८.७-९ । वीथी तु कैशिकी समाश्रिता भवतीति धनञ्जय: । दश० ३.६८

१७

प्रवृत्तिः

वृत्तिस्तु धनञ्जयेन परिभाषिता—

'तद्व्यापारात्मिका वृत्तिः' इति

प्रवृत्तिरपि नायकादिव्यापार इति धनिकः ।[1] भरतानुसारेण देशवेष-भाषाचारवार्ताः प्रख्यापयतीति प्रवृत्तिः ।[2] न खल्वेतासां सम्यग्वर्णनं सम्भाव्यत इति पश्यन्तः स्पष्टमेव धनञ्जयो निर्दिष्टवान्—

लोकादेवावगम्यैताः यथौचित्यं प्रयोजयेत् ॥ दश० २.६३

तथापि प्रवृत्तीनां कतिपयतत्त्वानि भरतेन धनञ्जयेन च संगृहीतान्येव । प्रथमं तावद् भाषा-विधानं वर्ण्यते ।

भाषाविधानम्

नव संस्कृतं प्राकृतं च चातुर्वर्ण्य-समाश्रयं प्रथितम् । धीरोदात्तादयश्चतुर्विधा नायकाः संस्कृतमवदन् । किन्तु कारणवशादपवादरूपेण तेषामपि भाषा प्राकृतं भवितुमर्हति । परिव्राजकः, मुनिः, श्रेष्ठक्षत्रिया, शिष्टः, यतिः, राज्ञी, गणिका (वेश्या), शिल्पकारिका च संस्कृतं वदेयुः ।[3] देवा, अप्सरसश्च संस्कृतवादिनः । अन्यानि पात्राणि प्राकृतं वदेयुः । तद्यथा, प्राकृतं वदन्ति लिङ्गी, श्रमणः, तपस्वी, भिक्षुश्च, यदि ते सुसंस्कृताः न सन्ति । सर्वे शुद्रजातीयाः शौरसेनीमवदन् अथवा स्वदेशभाषामवदन्[4] । धनञ्जया-

---

१. दश० २.६३ अधिकृत्यावलोकः ।

२. प्रवृत्तिर्देशविशेषगता वेषभाषासमाचारवैचित्र्य-प्रसिद्धिरुच्यते । ना० शा० १३.३७ अधिकृत्य भारती ।

३. ना० शा० १७.२५-४८

४. मृच्छकटिके नायिका वसन्तसेना गणिका (वेश्या) अस्ति । सा तु प्राकृतं वदतीति नियमविरुद्धमेव । राज्ञी कश्चिदेव संस्कृतं वदति प्राचीन-रूपकेषु । नैतद् भारतीय-विधानानुकूलम् ।

नुसारेणाधमानां पात्राणामपि भाषा शौरसेनी भवेत् । अत्यन्तनीचपात्राणि, पिशाचाश्च पैशाचं मागधं च वदन्तु । साधारणोऽयं नियमो दशरूपके—

> यद्देशं नीचपात्रं यत्तद्देशं तस्य भाषितम् ॥
> कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः ॥ दश० २.६६

सम्बोधनानि

रूपकेषु पात्राणां परस्परामन्त्रणं बहुविधं वर्तते । भरतानुसारेणामन्त्रणीया विविधैर्जनैः कथं सम्बोध्या इत्यधोलिखिततालिकया ज्ञायते —

आमन्त्रणीयाः	सम्बोधनानि	वक्तारः
महर्षिः	भगवन्	
महर्षि योषितः	भगवति	
देवः, लिङ्गी, श्रुतिधरः	भगवन्	
ब्राह्मणः	आर्य	
पार्थिवः, भूपतिः	महाराज	
आचार्यः	उपाध्याय	
वृद्धः	तात	
राजा	नाम्ना, राजन्	ब्राह्मणः
सचिवः	सचिव, अमात्य	,,
,,	आर्य	शेषैर्जनैः
उच्चतरसहयोगी	भाव, मार्ष, मार्षक	
रथी	आयुष्मन्	सूतः
अधमः	वयस्य, हंहो, हण्डे	समानः
प्रशान्तः	तपस्विन्, साधो	
युवराजः	स्वामिन्	
भर्तृदारकः	कुमार	
अधमः	सौम्य, भद्रमुख	
शिष्यः, सुतः	वत्स, पुत्रक, तात	पिता, गुरुः
शाक्यः, निर्ग्रन्थः	भदन्त	
नृपतिः	देव	भृत्यः, प्रकृतिः
सार्वभौमः	भट्ट	परिजनः
,,	राजन्	ऋषिः
महीपतिः	वयस्य, राजन्	विदूषकः
राज्ञी, चेटी	भवति	,,

विदूषकः	नाम्ना, वयस्य	राजा
पतिः	आर्यपुत्र (यौवने)	
	आर्य (अन्यदा)	
पूर्वजभ्राता	आर्य	
अनुजः	वत्स, तात, पुत्रक	
तपस्विनी, देवता	भगवति	
गुरुभार्या	स्थानीये, भवति	
गम्या	भद्रे	
वृद्धा	अम्बे	
राजपत्नी	भट्टिनी, स्वामिन्, देवि	परिजन
महिषी	देवि	
भोगिनी	स्वामिनि	
कुमारी	भर्तृदारिके	प्रेष्या
भगिनी यवीयसी	स्वसः	
ब्राह्मणी, लिङ्गस्था, व्रतिनी	आर्ये	
पत्नी	आर्ये, पितृनाम्ना, सुतनाम्ना वा	
सखी	हला	समाना
प्रेष्या	हञ्जे	
वेश्या	अज्जुका	परिजनः
गणिकामाता	अत्ता	,,
भार्या (शृङ्गारकाले)	प्रिये	
पुरोहितभार्या	आर्ये	
सार्थवाहभार्या	,,	

भरतमनुसृत्य धनञ्जयेन दशरूपके सम्बोधन-प्रकरणं संक्षेपेण सम्पादितम् ।

भरतेनौत्पत्तिकपात्राणां नामानि कीदृशानि स्युरित्यस्मिन् विषये नियमितम् । साधारणतो मनुर्विहितोपाधयस्तेन संगृहीताः, किन्तु रूपक एव विशिष्टानां पात्राणां नाम्नश्चर्चोपादेयात्र । तद्यथा, कापालिकानां नामानि घण्टान्तानि स्युः । वेश्यानां नामानि दत्ता-मित्रा-सेनादीनि स्युः । प्रेष्यास्तु नानाकुसुम-नामानो भवेयुः । चेटानां नामानि मङ्गलार्थानि करणीयानि । उत्तमपात्राणां नामानि गम्भीरार्थानि विधेयानि । धनञ्जयेन नामविषयकं किञ्चिदपि न प्रपञ्चितम् ।

रूपक-संस्थानम्

१८

पूर्वरङ्गः

रूपकस्याभिनयात् प्रागेव रंगे यत्किञ्चित् क्रियते, स पूर्वरङ्गः ।[१] तथा हि भरतः —

> यस्माद् रङ्गे प्रयोगोऽयं पूर्वमेव प्रयुज्यते ।
> तस्मादयं पूर्वरङ्गो विज्ञेयो द्विजसत्तमाः ॥ ५.७

रङ्गस्तु नाट्यमण्डपो नाट्यशाला वा भवति ।

पूर्वरङ्गस्याधिकांशभागस्य प्रयोगो यवनिकान्तरागतैर्नटैर्निष्पाद्यते ।[२]

पूर्वरङ्गस्य द्वाविंशत्यङ्गानि भवन्ति । तेषु प्रत्याहारोऽवतरणमारम्भाश्रावणा, वक्त्रपाणिः, परिघट्टना, संघोटना, मार्गासारितमासारितं चेति नवान्तर्यवनिकागतैर्वैणिकादिभिः प्रयोक्तृभिः प्रयोज्यानि । पश्चात् यवनिकां विघट्य प्रयोक्तारः गीतकं, वर्धमानकमुत्थापनं, परिवर्तनं, नान्दीं, शुष्कावकृष्टां, रंगद्वारं, चारीं, महाचारीं, त्रिगतं, प्ररोचनां च सम्पादयन्ति ।

एतेष्वङ्गेषु नान्दी, रंगद्वारं, त्रिगतं प्ररोचना च सविशेषं वर्तन्ते ।

नान्दी

भरतानुसारेण नान्दी—

> आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते ।
> देव-द्विज-नृपादीनां तस्मान्नान्दीति संज्ञिता ॥ ५.२४

---

१. पूर्वरंगस्य भावप्रकाशने उद्धृता परिभाषा सम्यग्युज्यते—

सभापतिः सभा सभ्या गायका वादका अपि ।
नटी नटश्च मोदन्ते यत्रान्योन्यानुरंजनात् ।
अतो रंग इति ज्ञेयः पूर्वं यत् स प्रकल्प्यते
तस्मादयं पूर्वरंग इति विद्वद्भिरुच्यते ॥ पृ० १९४

शुभङ्करानुसारेण 'पूर्वरंगः सभापूजा । भरतकोशे पृ० ३७७

२. यवनिका रङ्गपीठ-तच्छिरसोर्मध्ये । ना० शा० ५.७ अधिकृत्य भारती ।

सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः ।
नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलंकृताम् ॥ ५.१०६

नमोऽस्तु सर्वदेवेभ्यो द्विजातिभ्यः शुभं तथा ।
जितं सोमेन वै राज्ञा शिवं गोब्राह्मणाय च ॥ ५. १०७

ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा ।
प्रशास्त्विमां महाराजः पृथ्वीं च ससागराम् ॥ ५.१०८

राष्ट्रं प्रवर्धतां चैव रंगस्याशा समृद्ध्यतु ।
प्रेक्षाकर्तुर्महान् धर्मो भवतु ब्रह्मभाषितः ॥ ५.१०९

काव्यकर्तुर्यशश्चास्तु धर्मश्चापि प्रवर्धताम् ।
इज्यया चानया नित्यं प्रीयन्तां देवता इति ॥ ५.११०

रंगद्वारम्

रंगद्वारादेवाभिनयः प्रारभ्यते । तथा हि भरतः

यस्मादभिनयस्त्वत्र प्रथमं ह्यवतार्यते ।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम् ॥ ५.२६

रङ्गद्वारे कश्चित् श्लोकः पठ्यते, पश्चात् जर्जरो नाम्यते --

राज्ञो वा यत्र भक्तिः स्यादथवा ब्रह्मणस्तवम् ।
गदित्वा जर्जरश्लोकं रङ्गद्वारे च यत्स्मृतम् ॥ ५.११४

अभिनवगुप्तानुसारेणात्र रंगस्य भाविनो रूपकस्य द्वारमिव उत्थापनाङ्गं नाट्यमुत्थापितम् ।

त्रिगतम्

त्रयः पुरुषाः सूत्रधारः, पारिपार्श्वकः, विदूषकश्च भविष्यन्नाटकादिविषयं संवदन्ति । अतएव त्रिगतमिति प्रोच्यते । त्रिगतं तु भारतीवृत्तेरङ्गम् ।[1] तत्र विदूषकः कथानिकां प्रस्तौति । तद्यथा भरतः

विदूषकः सूत्रधारस्तथा वै पारिपार्श्वकः ।
यत्र कुर्वन्ति सञ्जल्पं तच्चापि त्रिगतं मतम् ॥ ५.२८

तथा च भारतीभेदे त्रिगतं सम्प्रयोजयेत् ॥ ५.१३३

---

१. स एव काव्योपक्षेपस्त्रिषु समायत्तत्वात् त्रिगतशब्देनोक्तः । ना० शा० ५.२८ अधिकृत्य भारती ।

विदूषकस्त्वेकपदां सूत्रधारस्मितावहाम् ।
असम्बद्धकथाप्रायां कुर्यात् कथानिकां ततः ॥ ५.१३४

प्ररोचना

प्ररोचनायां काव्यार्थस्योपक्षेप (सूचना) सिद्ध्योपलक्षितो भवतीति भरत आह—

उपक्षेपेण काव्यस्य हेतुयुक्तिसमाश्रया ।
सिद्धेनामन्त्रणा या तु विज्ञेया सा प्ररोचना ॥ ५.२९

प्ररोचना तु सामाजिकानामाकर्षणं वा हर्षसंवर्धनं वा नाटकविषये स्यात् । तथा

प्ररोचना हि कर्तव्या सिद्धेनोपनिमन्त्रणम् ।
रंगसिद्धौ पुनः कार्यं काव्यवस्तु-निरूपणम् ॥ ५.१३५

धनञ्जयस्तु पूर्वरंगविधौ प्ररोचनामेव प्रथमं विविच्य परिभाषते —

उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना ॥ ३.६

नेयं परिभाषा काव्योपक्षेपमावश्यकं निर्दिशतीति अभावश्चिन्त्यः ।

प्ररोचनायाः पात्राणि त्रिगतस्य पात्राण्येव । तानि सर्वाणि प्ररोचनाया अन्ते निष्क्रामन्ते । तद्यथा भरतः

सर्वमेव विधिं कृत्वा सूचीवेधकृतैरथ ।
पार्श्वस्थाविद्धगतैर्निष्क्रामेयुः समं त्रयः ॥ ५.१३६

अभिनवगुप्तानुसारेण 'प्ररोचना प्रकृष्टरुचिहेतुभूतत्वात्' भवति ।[1]

प्रस्तावना

अभिनवगुप्तो भरतमनुसृत्य द्विविधां प्रस्तावनां व्याकरोति । तद्यथा,

द्विविधा प्रस्तावना भवति - पूर्वरङ्गस्याङ्गभूता, अन्यस्य वा । तत्र पूर्वरङ्गाङ्गस्याः कविरुदासीन । स्थापक एव स्वतन्त्रो निर्माता तत्र्यो वा कविर्ध्रुवागानादावपि (पदम्) ।[2]

पूर्वरङ्गस्याङ्गभूता या प्रस्तावना भवति, सा भरतेनाधोविधं परिभाषिता—

---

१. ना० शा० ५.२९ अधिकृत्य भारती

२. ना० शा० ५.१६९ अधिकृत्य भारती ।

> प्रस्तावनां ततः कुर्यात् काव्यप्रख्यापनाश्रयाम् ।
> उद्घात्यकादि कर्तव्यं काव्योपक्षेपणाश्रयम् ॥ ५.१६६
>
> मुखबीजानुसदृशं नानामार्गसमाश्रयम् ।
> नानाविधैरुपक्षेपैः काव्योपक्षेपणं भवेत् ॥ ५.१७८

तामेव प्रस्तावनां विशदयन्नभिनवगुप्तः प्राह—

मुखाङ्गे ह्युपक्षेपे तदेवोपक्षिप्यते । बीजे च तदेव स्वल्पमात्रम् । इह तु तत्समम् । तथा हि नटी-विदूषक-पारिपार्श्वकैः समन्तादिति विचित्रभेदेन स्वकार्यनिरूपणव्याजेन ये नानाविधा उपक्षेपा उपांशुछन्नत्वेन रूपकार्थबीजस्य सामाजिकहृदयभूमौ क्षेपास्तैः काव्यं प्रस्ताव्य-प्रस्तावक-स्थापकादौ निष्क्रामेताम्[१] ।

अतः परं भारतीवृत्तेरङ्गभूता प्रस्तावना भरतानुसारेण विशिष्यते—

इयं प्रस्तावना 'आमुखम्' एव ।[२]

> नटी विदूषको वापि पारिपार्श्वक एव वा ।
> सूत्रधारेण सहिता संलापं यत्तु कुर्वते ॥
>
> चित्रैर्वाक्यैः स्वकार्योत्थैः वीथ्यङ्गैरन्यथापि वा ।
> आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि वा ॥२०·३०७३१

चित्रैर्वाक्यैरितिपदयोर्व्याख्याभिनवगुप्तेन निष्पादिता— भाविरूपकार्यानुकूलविषयानुसारिभिरित्यादि ।

भरतानुसारेण पञ्चाङ्गान्यामुखस्य भवन्ति—उद्घात्यकः, कथोद्घातः,

---

१. ना० शा० ५·१६८ अधिकृत्य भारती ।
अस्योदाहरणं तु रत्नावल्यामवधेयम्—
नटी—निष्पन्न इदानीमसि त्वम् । तत्किमिति न नृत्यसि । मम मन्दभाग्यायाः पुनरेकैव दुहिता । सापि त्वया कस्मिंश्चिद्देशान्तरे दत्ता । कथमेवं दूरदेशस्थितेन जामात्रा सहास्याः पाणिग्रहणं भविष्यतीत्यनया चिन्तयात्मापि न मे प्रतिभाति । किं पुनर्नर्तितव्यम् । अतः परं भारतीवृत्त्यङ्गभूतमामुखं कथोद्घातः नेपथ्ये साधु भरतपुत्र साधु । एवमेतत् । कः सन्देहः इत्यादि प्रस्तावना ।

२. अभिनवगुप्त आमुखं व्युत्पादयति—आमुखमिति मुखसन्धेर्निवर्तते यतः । यदि वात्रामुखं प्रारम्भमीषन्मुखं वा प्रस्ताव्यतेऽनयेति (प्रस्तावना) ।
ना० शा० २०·३१ अधिकृत्य भारती ।
आमुखस्य कर्ता कविः कथं भवतीति—
एवं च यदा स्थापकोऽपि सूत्रधारगुणाकारो रामादिवदेव प्रयुज्यते, तदेदं कविकृतमामुखं भवति । तत्रैव ।

प्रयोगातिशयः, प्रवृत्तकम्, अवलगितं च।[1] एतेषु उद्घात्यकोऽवलगितं च वीथ्यङ्गेषु परिगण्यते।

तत्रोद्घात्यकः

पदानि त्वगतार्थानि ये नराः पुनरादरात् ।
योजयन्ति पदैरन्यैस्तदुद्घात्यकमुच्यते ॥१८·११६

अभिनवगुप्तानुसारेण 'प्रश्नप्रतिवचनयोरन्याभिप्रायरूपेण योगेन यद्वैचित्र्यं तद्वीथ्यङ्गम्। यदा प्रष्टैवप्रतिवचनवैचित्र्यमभिसन्धाय पृच्छति, प्रतिवक्तोचितमभिधत्ते तदा तदुत्तरमुद्घात्यकः। यथा,

का श्लाघ्या गुणिनां क्षमा, परिभवः कोऽयं स्वकुल्यैः कृतः ।
किं दुःखं परसंश्रयो, जगति कः श्लाघ्यो य आश्रीयते ॥ पाण्डवानन्दे

भरत एकविधमुद्घात्यकं मन्यते। धनञ्जयस्तावद् द्विविधं मन्यते। न केवलं प्रश्नोत्तरस्य वाक्यगत एवापितु गूढार्थपदपर्यायमालापि उद्घात्यकस्य लक्षणं निर्माति। दशरूपकानुसारेण कस्यचिद्गूढपदस्यार्थं व्याख्यातुं नेकपर्यायाः प्रस्तूयन्ते। इदमभिनवमनुसन्धानं धनञ्जयस्य।

अवलगितं तु भरतानुसारेण—

यत्रान्यस्मिन् समावेश्य कार्यमन्यत् प्रसाध्यते ॥१८·११६

अर्थात् यत्रोत्तरे दीयमानेऽनन्यानुसन्धानपूर्वकेऽप्यन्यत्कार्यं सिध्यति, तदान्यकार्यावलगनादवलगितम्। इदं स्वरूपं त्ववलगितस्याविनाभावेन द्वयोः कार्ययोः प्रतिफलति। यदि नाम द्वयोः कार्ययोर्दैववशादेकपदे सिद्धिः स्यात्तर्हि अपरविधमवलगितं भवतीति धनञ्जयेन परिभाषितम्—

प्रस्तुतेऽन्यत्र वान्यत् स्यात्तच्चावलगितं द्विधा ॥३·१५

कथोद्घातनामक आमुखाङ्गे सूत्रधारस्य वाक्यं वा वाक्यार्थं वा पुनर्वदन् पात्रं रङ्गपीठे प्रविशतीति भरत-धनञ्जययोः समाना परिभाषा[2]। धनञ्जयानुसारेण पात्रं सूत्रधारस्य वाक्यं स्वेतिवृत्तसमं मन्यत इति विशेषमनुसन्दधाति। अभिनवगुप्तः कथोद्घातपदं व्याख्याति–कथा काव्यार्थरूपा ऊर्ध्वमेव हन्यते गम्यते तत्रेति कथोद्घातः।

यदा सूत्रधारस्य प्रस्तावना-प्रसङ्ग उक्तोऽयं नाट्यात्मकं वृत्तं संस्पृशति, पात्रप्रवेशञ्च संयोजयति तदा प्रयोगातिशयो भवति। अभिनवगुप्तः प्रयोगातिशयं

१. एतेषां पञ्चामुखाङ्गानां केवलमेकमेवैकस्मिन् रूपके प्रयोज्यमिति भरतो नियमयति—

एषामन्यतमं श्लिष्टं योजयित्वार्थयुक्तिभिः । २०·३८

२. ना० शा० २०·३५, दश० ३·१०

व्याहरति—सूत्रधार एव यत्र प्रयोगे प्रयोगं समुद्गककवाटयुगलवद् योजयति स प्रयोगद्वयश्लेषणात् प्रयोगातिशयः।[१] सूत्रधारस्य प्रयोगः स्वक्षेत्रमतिशेते। अत एव प्रयोगातिशय इत्यभिधीयते।

प्रवृत्तकमिति पञ्चममङ्गमामुखस्य। तस्य परिभाषा भारतीये नाट्यशास्त्रे दशरूपके च तत्त्वतः समानैव। तद्यथा भरतः

> कालप्रवृत्तिमाश्रित्य वर्णना या प्रयुज्यते।
> तदाश्रयाच्च पात्रस्य प्रवेशस्तत्प्रवृत्तकम्॥ २०.३७

सूत्रधारेण कालप्रवृत्तिमवलम्ब्य किञ्चिद् वस्तु वर्ण्यते। तदाश्रयेण च पात्रस्य प्रवेशः तत्कालप्रवृत्त्या स्वार्थीकृतत्वात् प्रवृत्तकम्। अत्र श्लिष्टपदानां प्रयोगेणोपमानीकृतनायकः प्रायः रङ्गं प्रविशति।

भरतानुसारेण तु आमुखस्य पूर्वोक्तानि पंचैवाङ्गानि सन्ति। तेषु द्वे वीथ्यङ्गे स्तः। अवशिष्टानि चैकादश वीथ्यङ्गानि आमुखे वाग्वैचित्र्यस्य प्रदर्शनाय सन्तु नाम, किन्तु तानि आमुखाङ्गानि न भवन्ति, यतो हि नामामुखाङ्गत्वाय भावि-रूपकार्थानुकूलविषयत्वमावश्यकमेव। एतत्तत्त्वं तु शेषभूतैकादशवीथ्यङ्गेषु नास्त्येव। अतएव भरतेन तानि आमुखाङ्गानीति न प्रपञ्चितम्।[२]

धनञ्जयस्तु वीथ्यङ्गान्यामुखाङ्गानीति प्रतिपादयति। नैतत्साधु प्रतिभाति।[३]

१. ना० शा० २०.३६ अधिकृत्य भारती।

२. एतदेवाभिनवगुप्तेन निर्दिष्टम्। तद्यथा, आमुख सामान्यलक्षणेऽप्युक्तं वीथ्यङ्गैरिति, तथापि उद्घात्यकोऽवलगितं च भाविकाव्यार्थप्रस्तावनेति। ना० शा० २०.३३ अधिकृत्य भारती। धनंजयोऽपि पात्राक्षेपणमर्थाक्षेपणं वामुखाङ्गानामावश्यकं प्रतिपादयति ३.२१।

३. दशरूपके ३.७।

११

काव्यबन्धः

दशविधेषु रूपकेषु नाटकं प्रकरणं च प्राधान्यं भजेते । तयोरपि नाटकं प्रकरणादपि प्रधानं, कथावस्तुनः प्रसिद्धत्वात् । प्रकरणे या कल्पनावस्तु-सम्भावना, सापि प्रसिद्ध्युपजीविनी भवति । अभिनवगुप्तानुसारेण नाटकस्योत्कर्ष इतिहासादिप्रमाण-वस्तुसद्भप्रदर्शकत्वेन प्रतीतः ।

नाटकम्

भरतानुसारेण प्रख्यातवस्तु-विषयं नाटकं भवति । प्रख्यातं तु भारतादिकमिति अभिनवगुप्तः । अत्रादिशब्देन वैदिकसंहिताः, ब्राह्मणारण्यकोपनिषदः पुराणोपपुराणानि आदिकाव्यं रामायणञ्च गृह्यन्ते । एतेषां स्वतः प्रामाण्यम् इत्यस्माकं मतम् ।

नायकः

नाटकस्य नायक उदात्तः स्यादिति भारतीयं मतमभिनवगुप्तो विशदयति । तद्यथा—उदात्त इति वीररसयोग्य उक्तः । तेन धीरललित-धीरप्रशान्त-धीरोद्धत-धीरोदात्ताश्चत्वारोऽपि गृह्यन्ते ।[1] प्रसिद्धनाटकेषु न केवलं धीरोदात्ता एव नायका अपितु अपरविधा अपि सन्त्येव । स्वप्नवासवदत्तस्य नायक उदयनो मुद्राराक्षसस्य च चन्द्रगुप्तो धीरललितौ । धनञ्जयादयः परवर्तिनाट्याचार्या धीरोदात्तमेव नाटकस्य नायकं स्वीकुर्वन्तीति पूर्णमभिप्रायं न व्यनक्ति ।[2]

भरतानुसारेण राजर्षि-वंशोत्पन्नो राजैव नाटकस्य नायको भवितुमर्हति ।[3] अत्र राजर्षिस्तु राजान ऋषय इवेत्युपमित-समासेन निष्पद्यते ।

केवलं राजान एव नायका भवितुमर्हन्ति, न देवाः, न ऋषयो महात्मानो वेति महती विप्रतिपत्तिर्भरतेन समुपस्थापिता । तदनुसारेण तु शङ्कराचार्यो

---

१. ना० शा० १८.१० अधिकृत्य भारती । उदात्ता भणिकापि स्यात् । २१.३४

२. अभिमन्युगुणैर्युक्तो धीरोदात्तः प्रतापवान् । दश० ३.२२ ।

३. राजर्षिवंश्यचरितम् । १८.१०

नायको न भविष्यति कस्यचिन्नाटकस्य। प्रबोधचन्द्रोदयः संकल्प-सूर्योदयोऽपि च राजर्षिवंश्य-चरितविहीनौ नाटकं न स्याताम्। नेदं भारतीयं नियमनं परवर्ति-कविभिर्मनागपि स्वीकृतमिति नाटकेतिहासेन स्पष्टं प्रतीयते।

देवा अपि नायका भवितुं न योग्या इत्यभिनवगुप्तेन भारतीयमतमनु-सृत्य प्रतिपादितम्।[1] स विशदयति—यदि मुख्यत्वेनैव देवचरितं वर्ण्यते, तत्तार्हिविप्रलम्भकरुणाद्भुतभयानक-रसोचितं चेन्निबध्यते, तन्मानुषचरितमेव सम्पद्यते, प्रत्युत देवानामाधयाधानं प्रसिद्धिविघातकम्। तत्र चोक्तो दोषः। विप्रलम्भाद्यभावे तु का तत्र विचित्रता रञ्जनाया एतत्प्रमाणत्वात्। अतएव हृदयसंवादोऽपि देवचरिते दुर्लभः। न च तेषां दुःखमस्ति, यत्प्रतीकारोपाये व्युत्पादनं स्यात्। अभिनवगुप्तस्यायं प्रपञ्चस्तथ्यहीन एव। विप्रलम्भं विनापि मुद्राराक्षस-वेणीसंहारादीनि उत्तमानि नाटकानि सन्त्येव। देवानामपि दुःखं भवत्येव। इन्द्रवृत्रप्रकरणे तत्तु स्पष्टं खलु। असुरैः पराजिता देवा दुःखं नान्वभवन्निति असत्। धनञ्जयस्तु दिव्यं नायकं नाटकोचितं निर्धारयति। तद्यथा,

प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः[2]। ३.२३

वर्त्तमानराजापि नायको न स्यादिति निर्धारयन् अभिनवगुप्तो विशद-यति—तत्र विपरीतप्रसिद्धिबाधयाध्यारोपस्याकिंचित्करत्वात्।

वृत्तम्

नृपतीनां कीदृशं चरितं नाटके वर्णनीयमिति भरतः प्राह—

नानाविभूतिभिर्युक्तमृद्धिविलासादिभिर्गुणैश्चैव ॥१८.११

नृपतीनां यच्चरितं नाना रसभावचेष्टितं बहुधा।
सुखदुःखोत्पत्तिकृतं भवति हि तन्नाटकं नाम ॥१८.१२

अत्र नृपतिचरिते सुखं दुःखं चोभे वर्णनीये इति महत्त्वपूर्णम्। नृपतीनां चरितं प्रह्लीभावदायकं भवति। तथा हृदयानुप्रवेशरञ्जनोल्लासनया हृदयं चोपाय-व्युत्पत्तिपरिघट्टतया चेष्टया नर्तयति। अतएव नाटकनाम सार्थकम्।

पंचसन्धि-पंचावस्था-संवलितं नाटकीयं वृत्तं पताका-प्रकरीभिः संवर्धितं स्यात्।

---

१. दिव्याश्रयोपेतम् (नाटकम्) ना० शा० १८.१०
प्रकरणं तु लोकसंश्रयं भवति। दश० ३.३८

२. अत्र प्रख्यातग्रहणं प्रकर्षद्योतकमिति अभिनवगुप्तः।

नायकस्य रसस्य वानुचितं वृत्तं त्याज्यं वान्यथा वा प्रकल्पनीयम् । सर्वेषु नाटकेषूत्पाद्यकथांशो वैशिष्ट्यं भजते ।

अङ्कः

नाटकस्यारम्भः प्रायशोऽङ्कादेव प्रवर्तते । नाटकीयं वृत्तमङ्केषु विभक्तमेव प्रदर्श्यते । तत्रैकस्मिन्नङ्क एकदिवसपर्यन्तं वृत्तं ग्रहणीयम् । यदि कस्यचिदेकस्य दिनस्य वृत्तमेकस्मिन्नंके न समायाति, तर्हि तदधिकं वृत्तं द्वितीयेऽङ्के वर्णनीयमथवा प्रवेशक-विष्कम्भकाभ्यां सूचनीयमिति भारतीयं विधानम् ।[1] साधारणतः प्रत्यवस्थमेकोऽङ्को भवेत् ।[2]

भरतोऽङ्कं परिभाषते—

यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः ।१८.१६

अभिनवगुप्तोऽङ्कं स्पष्टतम परिभाषते । तद्यथा, अवान्तरवस्तु-समाप्तौ विश्रान्तयं ये विच्छेदा अङ्का इति ।[3]

नाटकारम्भे यदि नीरसो वस्तुविस्तरोऽपेक्षितो भवेत्तर्हि स सूच्यं विधाय विष्कम्भकेण सन्निवेश्योऽन्यथाङ्को भवति प्रारम्भे । अङ्कस्य कथाया आक्षेप आमुखं भवति ।

दशरूपके यन्निगदितम्—

बिन्दुव्याप्तिपुरस्कृतोऽङ्कः ।३.३१

तत्तु विप्रतिपत्तिमेवानुसन्धत्ते, यतो हि नाम धनञ्जयो बिन्दुं प्रतिमुख-सन्धावेव परिच्छिनत्ति । नैतत् साधु ।

अन्यच्च दशरूपके निगदितम् ।

'प्रत्यक्षनेतृचरितोऽङ्कः' । ३.३०

एतत्तु भरतस्याधोलिखितकारिकाया अनुहरणमेव—

१. विष्कम्भकस्तु प्रथमाङ्कात् पूर्वमपि स्थापनीयः । प्रवेशकस्तावद्द्वयोरङ्कयोर्मध्य एव निवेशनीयः ।

२. इतिवृत्तस्य बिन्दुसूत्रस्यूतस्य प्रारम्भाद्यवस्थापंचकचारिणो यदा प्रारम्भावस्था पूर्णत्वमेति तदाङ्कच्छेदो बिन्दुद्वारानुसन्धीयमानद्वितीयाङ्काभिधेयरूपो विधेयः । एवं प्रयत्नाद्यवस्थाचतुष्टयेऽपि वाच्यमिति पंच तावदङ्का इति मुख्यः कल्पः । ना० शा० १८.१३ अधिकृत्य भारती ।

३. ना० शा० १८.११ अधिकृत्य भारती ।

ये नायका निगदितास्तेषां प्रत्यक्षचरितसंयोगः ।
नानावस्थोपेतः कार्यस्त्वङ्कोऽविकृष्टस्तु[1] ॥१८.१७

कि नामाङ्के नायकानां प्रत्यक्षमेव चरितं भवति, उताहो चरितं सूच्यमपि अङ्के स्यात् । नायक-चरितं सूच्यमपि नाटके वर्तत एवेत्यस्माकं मतम् । तथा हि—वेणीसंहारस्य चतुर्थाङ्के सुन्दरको दुर्योधनं सूचयति यत् वृषसेनार्जुनयोर्घोरं युद्धमभवत् । तत्र वृषसेनो मृत इति । मुद्राराक्षसे दूतांश्चाणक्याय राक्षसाय चारिभिर्नायकैः कृतं कार्यजातमङ्कभागे सूचयन्ति । एवमेवान्येषु रूपकेष्वपि दृश्यते । भरतस्य धनंजयस्य चेतद् विधानं न सत् ।

भरतानुसारेणाङ्कान्ते कस्यचिदर्थस्य समाप्तिः स्यात्, तस्य बीजस्य च परिणतिर्जायेत । तत्रैव विन्दुर्भवति, येनापराङ्कस्य कथा प्रवर्तते ।[2]

केषाञ्चिदङ्कानां नामानि तत्र नायकानामभिधानेन वस्तुनो वा संज्ञया प्रख्यापितानि, इति सागरनन्दिनोऽनुसन्धानम् । तद्यथा उत्तररामचरिते छायाङ्क इति ।

अङ्के दर्शनीयमदर्शनीयञ्च

अङ्के किं दर्शनीयं किं चादर्शनीयमिति वितर्कः । भरतानुसारेण तु अद्भुततत्त्वानि प्राथम्येन दर्शनीयानि । कानि च तानि तत्त्वानि —क्रोधप्रसादशोकाः, शापोत्सर्गः, विद्रवो विवाहश्च रंजकानि सन्ति । अभिनवगुप्तानुसारतोऽन्यान्यपि रंजकवस्तूनि तत्र स्युः ।

अदर्शनीयानि तु बहून्येव परिगणितानि । तद्यथा भारतीये नाट्यशास्त्रे —

युद्धं राज्यभ्रंशो मरणं नगरावरोधनं चैव ।
प्रत्यक्षाणि तु नाङ्के प्रवेशकैः संविधेयानि ॥ ना० शा० १८.३८

युद्धं त्वभिनेयमिति भरतेनान्यत्र प्रतिपादितम् ।[1]

१. अङ्कस्तावत् कार्यस्य (Act) पर्याय एव संजातः । तद्यथा अभिनवगुप्तेन चर्चितम्—कार्यशब्देनाङ्क उच्यते । ना० शा० १८.२० अधिकृत्य भारती ।

२. यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः ।
किञ्चिदवलग्नविन्दुः सोऽङ्क इति सदावगन्तव्यः ॥ १८.२८

१. नानाप्रहरणमोक्षैः शिरःकबन्धभुजकर्तनैश्चैव ।
एभिश्चार्थविशेषैरस्याभिनयः प्रयोक्तव्यः ॥ ना० शा ६.६५
अथवा योगशिक्षाभिर्विद्या मायाकृतेन वा ।
शस्त्रमोक्षः प्रकर्तव्यो रंगमध्ये प्रयोक्तृभिः ॥ ना० शा० २१.२२५
नानाशस्त्रविमोक्षो हि कार्योऽनेन प्रयोक्तृभिः ।
न्यायाश्चैवात्र विज्ञेयाश्चत्वारः शस्त्रमोक्षणे ॥ ना० शा० १०.७१ अग्रेऽपि द्रष्टव्यम्

अभिनवगुप्तस्तावदपरेषां मतमुद्धरति यत् मरणं क्वचित् प्रयोज्यं भवति। किन्तु स स्पष्टतया व्याकरोति— मृतस्य कथं निष्क्रमणं, कथं वावस्थानं ततो नाट्योपयोगिसमस्तध्रुवा-गानादिक्रियाविलोपः, सामाजिकानां विरसताप्रतिपत्तिरिति तु सर्वत्र मरणं समानम्। तस्माद् रङ्गे मरणमप्रयोज्यमेव।[1]

अन्यत्रापि भरतो मरणं वर्जनीयं दृश्यं न मन्यते।[2] धनञ्जयोऽपि मरणदृश्यं न वर्जयति। साहित्यदर्पणे विश्वनाथोऽङ्के मरणं वर्जयति।

अभिनवगुप्तस्य पूर्वोक्तं मतं न साधुसम्मतमित्यस्माकं समीक्षा, यतो हि नाम स्वयमेव भरतेन रंगे मरणाभिनयस्य निर्देशाः स्पष्टीकृताः। तद्यथा—

नानाभावोपगतं मरणाभिनये बहुकीर्तितं तु।
विक्षिप्तहस्तपादैर्निभृतैः सन्नैस्तथा कार्यम्॥
व्याधिप्लुते च मरणं विवर्णगात्रैस्तु सम्प्रयोक्तव्यम्।
हिक्काश्वासोपेतं तथा पराधीन-संचारम्॥
विषपीतेऽपि च मरणं कार्यं विक्षिप्तगात्रकरचरणम्।
विषवेगसम्प्रयुक्तं विस्फुरिताङ्गक्रियोपेतम्॥ २५.१००-१०२

भासनाटकादिषु मरणदृश्यं प्राप्यत एव।

भरतानुसारेणान्यानि कानिचिद् रंगवर्ज्यानि अङ्के अदर्शनीयानि स्युः।[3] तथा हि—

न कार्यं शयनं रंगे नाट्यधर्मं विजानता।
केनचिद् वचनार्थेन अङ्कच्छेदो विधीयते॥ २२.२८५
यद्वा शयीतार्थवशादेकाकी सहितोऽपि वा।
चुम्बनालिंगनं चैव तथा गुह्यं च यद् भवेत्॥ २२.२८६
दन्तच्छेद्यं नखच्छेद्यं नीवीस्रंसनमेव च।
स्तनान्तरविमर्दं च रंगमध्ये न कारयेत्। २२.२८७
भोजनं सलिलक्रीडा तथा लज्जाकरं च यत्।
एवंविधं भवेद्यत्तत्तदङ्के न कारयेत्॥ २२.२८८

---

१. ना० शा० १८.३८ अधिकृत्य भारती।

२. ना० शा० ७.८६-९० ।

३. आवश्यकतानुसारं भाणादिषु प्रायः विट एव प्रविष्टपात्रं भवति। स 'इदमिदं मया दृश्यते' इति ब्रूयात्। एवं परस्थं वा यदा व्याख्यायते च प्रत्यक्षत्वेनैतदुपयुज्यते।

ना० शा० २२.२८३ अधिकृत्य भारतीमतम्।

पितापुत्रस्नुषाश्वश्रू-दृश्यं यस्मात् नाटकम् ।
तस्मादेतानि सर्वाणि वर्जनीयानि यत्नतः ॥ २२.२८८

नैतानि वर्ज्यानि कविभिर्नाटकादिषु सर्वथा परित्यक्तानि ।[1]

भारतीये नाट्यशास्त्र एव कामशास्त्र-प्रकरणमिवाधोविधं वर्णनं विद्यते—

गृहीतयाथ केशान्ते हस्ते वस्त्रेऽथवा पुनः ।
हुं मुञ्चेत्युपसर्पन्त्या वाच्यः स्पर्शालसं प्रियः ॥ २२.२८४
अमुच्यमाने केशान्ते संजातस्वेदलेशया ।
हं हुं मुंचापसर्पेति वाच्यः स्पर्शालसाङ्गया ॥ २२.२८६
अक्ष्णोः संवरणे कार्यं पृष्ठतश्चोपगूहनम् ।
नार्यास्त्वपहृते वस्त्रे दीपच्छादनमेव च ॥ २२.२८८
उत्थाप्यालिङ्गयेच्चैव नायिका नायकं ततः ।
रतिभोगगता हृष्टा शयनाभिमुखो व्रजेत् ॥ २२.२९१
एतद्गीतविधानेन सुकुमारेण योजयेत् ।
यदा शृङ्गारसंयुक्तं रतिसम्भोगकारणम् ॥ २२.२९२

इदं मतं तु प्राचीनतरं प्रतिभाति । तत् तु नाट्यशास्त्रे संगृहीतम् । एतेषां वर्जनं तु परवर्तिभिः सुसंस्कृतैः सुरुचिपरायणैश्च ऋषिकल्पैराचार्यैः समर्थितम् ।

भरतेन महाजनपरिवारमित्यादिवर्ज्यं निर्दिष्टवान् । तद्यथा,

न महाजनपरिवारं कर्तव्यं नाटकं प्रकरणं वा ।
ये तत्र कार्यपुरुषास्चत्वारः पञ्च वा ते स्युः ॥ १८.४१

एषा कारिकाभिनवगुप्तेन व्याख्याता— यद्यदप्रयोज्यं प्रत्यक्षेण तस्य सामान्यद्वारकं संग्रहं दर्शयितुमाह—बहुतरपुरुषसाध्यं यत्किंचित् तद्यथा समुद्रे सेतुबन्धनमित्यादि । तत्सर्वं प्रत्यक्षेण न प्रदर्शनीयम् । तथा महतो जनस्य पितापुत्रश्वश्रूस्नुषागुरुशिष्यादेः परितो वरण व्रीडातङ्कादियोगेन यत्र जायते वैरस्यं वा महाजनस्य सभ्यस्य च यत्र परिवरणं चित्तसंकोचः तत्सर्वं परिचुम्बनाद्यपि न प्रत्यक्षप्रयोज्यम् ।

---

१. कौमुदी-महोत्सवस्य पंचमाङ्के नायको नायिकां परिष्वजते । तापसवत्सराजस्य षष्ठाङ्के विदूषको दासीं कांचनमालामालिङ्गते । तपतीसंवरणस्य षष्ठाङ्के राजा नायिकामालिंगते । पारिजातमञ्जर्याः प्रथमाङ्के राजा नायिकां पारिजातमञ्जरी च परिष्वजते । प्रद्युम्नाभ्युदयस्य तृतीयाङ्के नायकयोः परिष्वजनं दृश्यम् ।

भरतमेवांशतोऽनुसरन् धनञ्जयो रंगे वर्ज्यानि वर्णितवान्—

> दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम् ।
> संरोधं भोजनं स्नानं सुरतं चानुलेपनम् ।
> अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत् ॥ दश० ३. ३४. ३५

दूरयात्रा-प्रकरणेऽङ्को विच्छेद्य इति भरतः ।[1]

स तु 'नाधिकारिवध'मित्यादि अदर्शनीयं गणयति । एतत्तु नापेक्षितम्, यतो हि नाम यदि कश्चिन्नायको म्रियते, तर्हि कथं सोऽधिकारी भविष्यति । भरतेनापि सङ्केतितमासीत्—

> न वधः कर्तव्यः स्याद्योऽभ्युदयी नायकः ख्यातः ।

एतदपि नापेक्षितमासीत् । अधिकारि-नायकस्तु फलवान् भवत्येव । फलवत्ता हि जीवनान्तं न सहते । कार्यनायको यदि म्रियेत तर्हि को दोषः ।

अङ्के पात्र-संख्या

अभिनवगुप्तो नाटकस्याङ्के पात्रसंख्यां विवेचयति । तद्यथा—यदि च प्रत्यक्षप्रयोज्यं तत्र पञ्चकार्यपुरुषाः । यदि वा चत्वारः प्रकरीपताकादिरूपाः तेषां च परिवारस्वभावात्तावन्त एवेति । यदि प्रकर्षस्तदा दशाष्टौ वा रङ्गे प्रविष्टा भवन्ति । ततोऽधिकेषु त्वभिनयचतुष्टयं सम्यगविभावनीयं स्यात् देवयात्रा परिदृश्यमानजनसमाजवत् इति भरतस्याधोलिखितकारिकाया व्याख्या-

> ये तत्र कार्यपुरुषाश्चत्वारः पञ्च वा ते स्युः । १८.४१

अङ्के तावत् त्रीणि चत्वारि वा पात्राणि भवेयुरिति धनञ्जय निर्देशः । तद्यथा, 'पात्रैस्त्रिचतुररङ्कम्' इत्यादि ।[2]

अङ्कस्यान्यविशेषाः

नाटकेऽङ्कानां स्वल्पतमा संख्या पंचाधिकतमा च दश स्यात् । महानाटके दशभ्योऽप्यधिका अङ्का स्युरिति परवर्तिनाट्याचार्याणां सम्मतम् ।

अङ्कस्तु आसन्ननायको भवेदिति धनञ्जयमतम् ।[3]

---

१. धनञ्जयस्य दूराध्वानमिति पदं नाट्यशास्त्राधोलिखित-कारिकातः गृहीतम्—

> यः कश्चित् कार्यवशाद् गच्छति पुरुषः प्रकृष्टमध्वानम् ।
> तत्राप्यङ्कच्छेदः कर्तव्यः पूर्वतत्त्वज्ञैः ॥ १८.३२

२. दश० ३.३७

३. एतत्तु भरतस्याधोलिखित कारिकामनुहरति—

> ये नायका निगदितास्तेषां प्रत्यक्षचरितसम्भोगः ।
> नानावस्थोपेतः कार्यस्त्वङ्कोऽविप्रकृष्टस्तु ॥ १८.१७

अत्र नायक इति मध्यम-सामान्य वचनम् । नायकेन प्रधाननायकः, पताकानायकः, प्रतिनायकाः, नायिका वा ग्रहणीया । भरतानुसारेण तु

नायकदेवीगुरुजनपुरोहितामात्यसार्थवाहानाम् ।
नैकरसान्तरविहितो ह्यङ्क इति स वेदितव्यः ।। १८.१८

एतां कारिकां विशदयन्नभिनवगुप्तो व्याख्याति—नायका मुख्याः पताकादयो देव्यो महादेवी-भोगिनीप्रभृतयः, गुरुजनो मातृपितृभ्रात्राचार्यादिः, सार्थवाहोऽत्र सेनापतिः । इतिवृत्तवशाद् वणिगेव वा । एषां सम्बन्धी अङ्कः एतदर्थाभिधायकः ।

नाटकारम्भे क्वचिदेतान् विहाय केवलमन्ये कथापुरुषाः कंचित्कालं भवन्तु नाम, किन्तु साधारणतोऽङ्कस्याधिकांशभागे नायको रंगमध्ये वर्तत एव, यतो हि नाम तेषामेव कथा सभ्यानामाकर्षणं विदध्यात् ।

अङ्कस्य केन्द्रीभूतनायकोऽङ्कस्य मध्ये रंगान्न निष्क्रामेत् अनायका एवान्यानि साधारणपात्राणि प्रविशन्ति निष्क्रामन्ति च कार्यापेक्षया, किन्तु नायकस्यायमेव महिमा यत् रंगाद् बहिस्तस्य कार्यं साम्प्रतिकं न विद्यते[1] ।

अङ्कान्ते सर्वाणि पात्राणि यवनिकातिरोधानेन निष्क्रामन्ति ।[2]

अङ्के कार्य-सातत्यम्

अङ्के कार्यसातत्यमपेक्षितमेव । एकस्य दिनस्य व्यच्छिन्नकार्यमव्यवधानेन विरामेण विना प्रचरति । परम्परानुवर्तिनाटकेषु दृश्य-विभाजनं तत्राङ्कानां नास्त्येव । यदि दृश्य-विभाजनमिवाऽपक्वाप्रियोजना स्यात्तर्हि कार्यसातत्यं विघटेत । क्वचिदनिर्दिष्टमेव दृश्यविभाजनमङ्कानामस्ति । तत्र व्यवधानं स्यादेव ।

रसयोजना

भरतस्तु नाटकेऽङ्को नैकरसान्तरविहितो भवेदिति निर्दिशति ।[3]

---

१. अनायकपुरुषमत्वविच्छिन्न एवाङ्के निष्क्रामति । ना० शा० १८.३२ अधिकृत्य भारती ।

२. ना० शा० १८.२३ अधिकृत्य भारती ।

३. ना० शा० १८.१८

अर्थादत्र बहवो रसा भवेयुः । तत्रैवाभिनवगुप्तो व्याख्याति—देवीषोबे शृंगारो नायके वीर इत्येवमन्यदुत्प्रेक्ष्यम् । अन्यत्र भरतः समर्थयति—

अङ्ग इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान् । १८.१४

नृपतीनां यच्चरितं नानारसभावचेष्टितं बहुधा ॥ १८.१२

सर्वेषु रूपकेषु निर्वहणेऽद्भुतरसो भवेत् ।[1]

अभिनवगुप्तानुसारेण शृंगार-वीर-रौद्रैः स्त्रीरत्न-पृथ्वीलाभ-शत्रुक्षयाः, करुणादिभिस्तन्निवृत्तिरितीयता क्रमेण लोकोत्तर-संभाव्यमनोरथ-प्राप्तौ भवितव्यमद्भुतेन ।[2]

'नाटके वीररसः प्रधानः' इति समीक्षतेऽभिनवगुप्तः । 'तथा हि सर्वरसयोग्यतायामपि नाटके प्रकरणे च धर्मार्थादिवीर एव प्रधानः परमार्थतः सर्वेषु नायक-भेदेषु वीरत्वानुगमदर्शनात् ।

अङ्गी रसस्तु काव्य आद्यन्तं व्याप्तो भवति । स तु प्रधानरस एव स्यात् । अपर एव फलानुवर्ती रसः । नाटकान्ते यत्फलं नायकेन लभ्यते, तदनुसृत्य फलानुवर्ती रसो जायते । तद्यथा, उत्तररामचरिते करुणस्तु प्रधानो वाङ्गी वा रसः स्यात्, किन्तु तत्र फलानुवर्ती रसस्तु शृंगार एव । अङ्गी रसस्तावत् वीरः शृंगारश्चैव भवत इति धनञ्जयस्य मतं न सर्वथा पूर्णम् । रौद्रः करुणश्चाङ्गिनो रसो क्रमशः वेणीसंहारे उत्तररामचरिते च विलसत इति सम्यगवधेयम् ।

वस्तुरसयोः सामञ्जस्यं सम्यग् निदिष्टं धनञ्जयेन ।

न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ॥

रसं वा न तिरोदध्यात् वस्त्वलंकारलक्षणैः ॥ ३.३३,३४

वृत्तिः

नाटके प्रकरणे च सर्वा वृत्तयः सन्तीति भरतस्य मतम्—

ज्ञेयं प्रकरणं चैव तथा नाटकमेव च ।

सर्ववृत्तिविनिष्पन्नं नानाबन्धसमाश्रयम् ॥ १८.७

प्रकरणम्

नाटक-प्रकरणयोरंशतः साम्यविषयेऽप्योल्लिखितं भरतस्य वचनं

यन्नाटके मयोक्तं वस्तु-शरीरं च वृत्तिभेदाश्च ।

तत्प्रकरणेऽपि योज्यं सलक्षणं सर्वसन्धिषु तु ॥ १८.४७

१. ना० शा० १८.४३

२. ना० शा० १८.४३ अधिकृत्य भारती

एतत्तु व्याख्यातमभिनवगुप्तेन—नानाविभूतियुक्तमृद्धि-विलासादिभिरित्यादिनायकफलवत्त्वमुक्तं तत्। वस्तु - शरीरमिति—अङ्कप्रवेशकाद्यम्।[१] वृत्तिभेदाश्चेति नानारसभावचेष्टितैर्बहुधा. सुख-दुःखकृतमिति। सलक्षणमिति अङ्कप्रवेशकयोर्लक्षणयुक्तमिति।

वस्तु

प्रकरणे वस्तुशरीरं च कविनोत्पत्तिकमात्मशक्त्या इति भरतस्य प्रथमवचनम्। तत्र वस्तु साध्यफलं शरीरमिति तदुपाय इति मतमभिनवगुप्तस्य।[२]

वस्तु वा नायको वौत्पत्तिको भवतु, किन्तु न ते सर्वेषु प्रकरणेषु सर्वथोत्पाद्ये इति सन्धारणीयम्। कविस्तु प्रकरण-निमित्तमनार्षमाहार्यं चापि वस्तु क्वचित् प्रचिनोति। तस्यैतादृशं प्रचयनमेव प्रकरणनाम्नः सार्थकतां विदधाति।

अभिनवगुप्तानुसारेण वस्तुनि 'योऽनुत्पाद्योंऽशः न कुत्रस्यो ग्राह्यः'। अनुत्पाद्योंऽश आहार्यो भवेदनार्षो वा। अनार्षमिति पुराणादि-व्यतिरिक्त-बृहत्कथाद्युपनिषद्यपनिबद्धं मूलचरितादि। आहार्यमिति पूर्वकविकाव्यादाहरणीयं समुद्रदत्तचेष्टितादि। अनार्षमाहार्यं च वस्तु संचित्य तदेव प्रसिद्धैर्गुणैर्युक्तं प्रकरोति कविः।[३] अतएव प्रकरणं नाम। प्रकरोति तदिति तस्माद्धेतोरेतदपि प्रकरणम्। पुनरपि अभिनवगुप्तो विस्पष्टयति—तेन बृहत्कथादिसिद्धस्य मूलदेवादेरधिकावापं कविशक्तिर्यदा विधत्ते तदा प्रकरणम्। एवं पूर्वकविसमुत्प्रेक्षित-समुद्रदत्त-चेष्टितादिवर्णनेऽपि अधिकावापं विदधत्कविः प्रकरणं कुर्यादिति तात्पर्यम्।[४]

अभिनववस्तु-योजनायाः कावश्यकतेति विशदयन् अभिनवगुप्तः प्राह—

विनेयोऽभिनववस्तुवृत्तकौतुकपरतन्त्र इति समुत्पाद्यवस्तुना प्रकरणेन विनीयते।[५]

१. विष्कम्भकप्रचुरं प्रकरणं स्यादिति मतमभिनवगुप्तस्य।

२. ना० शा० १८.४५ अधिकृत्य भारती।

३. यदनार्षमथाहार्यं काव्यं प्रकरोत्यभूतगुणयुक्तम्
उत्पन्न-बीज-वस्तुप्रकरणमिति तदपि विज्ञेयम्॥
ना० शा० १८.४६ एतदधिकृत्य भारती।

४. तत्रैव

५. ना० शा० १८.७ अधिकृत्य भारती। पाश्चात्त्या अपि तथैव मन्यन्ते—To the poet the highest value lies in his own invention, and out of fondness for this, he at his own convenience, changes the actual incident.—European Theories of the Drama p. 357

प्रकरणे नायकादीनां चरितं नैकविधं स्यादिति अनेकरसोत्सः तद् भवेदिति मतमभिनवगुप्तस्य ।[१]

दशरूपके धनञ्जयो वृत्तमुत्पाद्यमेव मन्यते। नैतत् सर्वांशतः साधु। तत्राहार्यानार्षवस्तुनोर्निषेधः। अन्यच्च वस्तु लोकसंश्रयं स्यादिति विशेषद्योतकं लक्षणं तेन सुष्ठु प्रपञ्चितम् ।[२]

नायकादयः

प्रकरणे विप्रः, वणिक्, सचिवः, पुरोहितः, अमात्यः, सार्थवाहो (पण्यानामाहर्ता) नायका भवन्ति। प्रख्यातोदात्तनायकस्तत्र नास्त्येव। न च देवा न राजानो नायका भवन्ति।[३] नायको वैशिकोऽपि भवति—वेश्याकामुकः, वेश्योपचारे निपुणः।[४]

नाटकेषु प्रायशोऽन्तःपुरीया प्रकृतिः स्यात्, किन्तु प्रकरणे तद्विपरीतं बाह्यजनाः सन्ति—दासः, विटः, श्रेष्ठीत्यादयः। अभिनवगुप्तानुसारेण तु पात्रविधानं नाटकापेक्षयाधोविधं वर्तते—

नाटकपात्राणि	तस्य स्थाने	प्रकरण पात्राणि
कंचुकिन्	,,	दासः
विदूषकः	,,	विटः
अमात्यः	,,	श्रेष्ठी

भरतानुसारेण विदूषकस्य स्थानं प्रकरणे नास्ति, किन्तु मृच्छकटिके देवीचन्द्रगुप्ते च विदूषकोऽपि वर्तते।

प्रकरणे द्विविधे नायिके स्तः। प्रथमं तावदूढा पत्नी स्यात्। तस्याश्चेष्टितं स्वल्पमेव वर्ननं। न सा नाटकवद् महादेवीव राज्ञो नित्यनवनायिकाव्यवहारे बाधां समुपस्थापयति। अतएव भरतेन प्रोक्तम्—

---

१. ना० शा० १८.४८ अधिकृत्य भारती।

२. नोदात्तनायककृतं न दिव्यचरितं न राजसम्भोगम्। इति प्रकरणवृत्तस्य विशेषणानि (ना० शा० १८.४८) लोकसंश्रयं दश० ३.३९ व्यञ्जन्ति।

३. देवीचन्द्रगुप्तमिति प्रकरणमपवाद एव। तत्र नायकश्चन्द्रगुप्तो राजा उदात्त एव।

४. वैशिकस्य लक्षणानि ना० शा० २३.२-७। तद्यथा

यो हि सर्वकलोपेतः सर्वशिल्प-विचक्षणः।
स्त्रीचित्तग्रहणाभिज्ञो वैशिकः स भवेत् पुमान्॥

तस्य त्रयस्त्रिंशत् गुणाः तत्रैव परिगणिताः। ना० शा० २३.४-९

मन्दकुलस्त्रीचरितम्,[1] इति । १८.५०

वेश्या तु प्रधाननायिका वर्तते क्वचित् प्रकरणे । अत एव वेश्योपचार-सम्बन्धि आधिकारिकवृत्तं तत्र भवति । वेश्याया लक्षणानि सविस्तरमेव भरतो वर्णयति । ता, लुब्धाः, पण्डिताः, चतुराः, मानिन्यो, बालाः, भीरवः, गर्विताः, उदात्ताश्च भवन्ति ।[2] अन्येऽपि भेदा वेश्यानां स्वभावजाः —उत्तमा, मध्यमा, नीचा च भरतेन निरूपिताः । तद्यथा,

या विप्रियेऽपि तिष्ठन्त प्रियं वदति नाप्रियम् ।
न दीर्घरोषा च तथा कलासु च विचक्षणा ॥ २३.३६
शीलशोभाकुलाधिक्यैः पुरुषैर्या च काम्यते ।
कुशला कामतन्त्रेषु दक्षिणा रूपशालिनी ॥ २३.३७
गृह्णाति कारणाद्रोषं विगतेर्ष्या ब्रवीति च ।
कार्यकालविशेषज्ञा सुरूपा सा स्मृतोत्तमा ॥ २३.३८
पुरुषैः काम्यते या तु तथा कामयते च तान् ।
कामोपचारकुशला प्रतिपक्षाभ्यसूयिनी ॥ २३.३९
ईर्ष्यातुरा स्वनिभृता क्षणक्रोधातिगर्विता ।
क्षणप्रसादा या चैव सा नारी मध्यमा स्मृता ॥ २०.४०
अस्थानकोपना या तु दुष्टशीलातिमानिनी ।
चपला परुषा चैव दीर्घरोषाधमा स्मृता ॥ २०.४१

वेश्या कुलाङ्गना च परस्परं न मिलतः । अत एव तयोः पारस्परिकः संघर्षो न परिलक्ष्यते ।

भरतधनञ्जयानुसारेण वेश्यां विनापि प्रकरणवृत्तं स्यादिति साधु सम्मतम् । प्रधानत्वेन भरतो नियमयति—

दासविटश्रेष्ठियुतं वेशस्त्र्युपचारकारणोपेतम् ॥ ना० शा० १८.४८

भाषा तत्र कुलस्त्रियाः शौरसेनी, वेश्यायाः संस्कृतं च स्याताम् । किन्तु मृच्छकटिकादिषु वेश्याः प्राकृतं वदन्तीति वैषम्यम् । आचारः कुलस्त्रियां, विनयप्रधानः, अन्यस्यां तद्विपरीत इति ।

मुख्यम्

भरतानुसारेण विष्कम्भः प्रकरणे विशिष्ट एव । अभिनवगुप्तः प्रकरणे

१. 'मन्द-कुलस्त्री-चरितम्' इत्यन्यथापि व्याख्यातम् । तद्यथा मन्दकुलानां स्त्रीणां चरितं यत्रेत्याहुः । तेन कुलाङ्गनापि तत्र मन्दकुलैवेति दर्शितं भवति । १८.५० अधिकृत्य भारती ।

२. ना० शा० २३.३२, ३४

विष्कम्भकस्य बाहुल्यं निगदति । विष्कम्भकस्य वस्तु कीदृशं स्यादिति विशदयति अभिनवगुप्तः—सन्धीनां यः संक्षेपो युद्ध-राज्यभ्रंशादीनां वार्तानां यः संक्षेपः तमभिसन्धाय अङ्कस्य अङ्कयोर्वान्तराले मध्ये विष्कम्भको योज्यः ।[1]

रसः

धनञ्जयानुसारेण प्रकरणे रसस्य स्थितिर्नाटकवत् स्यात् । नाटके धनञ्जयानुसारतस्तु वीरशृंगारौ इति रसद्वयं वर्तते ।

प्रकरण-वैविध्यम्

सप्तविधनायकानुसारं सप्तविधं प्रकरणं भवति ।[2] तत्र त्रिविध-नायिकास्थितिमनुसृत्य त्रिविधः प्रत्येकस्य भेदः स्यात् । प्रथमं तावत् सचिवा-दीनां सम्बन्धिनी यत्र गार्हस्थ्योचिता वार्ता पुरुषार्थत्रयसाधकमितिवृत्तं न तत्र वेश्याङ्गना नायिकात्वेन निबन्धनीया । विटादीनां तु नायकत्वेन कृतानां गार्हस्थ्य-चिन्तायां वेश्यापि निबन्धनीया । यदि गृहस्थचिन्तावर्णनं न भवति श्रेष्ठिसार्थवाहादीनां च विप्रादिवदविरुद्धो वेश्यायोग इति सापि प्रदर्शनीयेति लब्धमर्थात् । तत्र न तु कुलस्त्रीसगमः कर्तव्यः । एवं श्रेष्ठिसचिवादि-विषयं शुद्धभेदद्वयमुक्तम् । विटादिविषयस्तु संकीर्ण एव वेश्याकुलजाभ्यां भवति ।

धनञ्जयः केवलं त्रिविधमेव प्रकरणं नायिकाभेदान्मन्यते—कुलजा, वेश्या, उभयमिति त्रेधा प्रकरणं वृत्तम् ।[3]

नाटकप्रकरणयोः पुरुषार्थयोजना

अभिनवगुप्तेन पुरुषार्थविषयिणी समीक्षा नाटक-प्रकरणयोः प्रस्ताविता । तद्यथा, सकलपुरुषार्थविषया व्युत्पत्तिः नाटकेन प्रधानस्य राजप्रायस्य क्रियते, प्रकरणेन च मध्यमप्रायस्य । अपूर्वकौतूहलवतस्तत्रापि चेतोवशीकरणाभि-धानात् चित्रव्युत्पत्तिः ।

1. प्रवेशको विष्कम्भको वाङ्कयोर्मध्ये भवेदिति स्पष्टीकृतमभिनवगुप्तेन । अधुना विष्कम्भकादयोऽङ्कस्य भागा इव नाटकेषु प्रायशो मुद्रिता इति न साधु रीतिः ।

कथं न प्रवेशको योज्यः प्रथमाङ्कात् प्रागिति विशदयन् अभिनवगुप्तः प्राह—बीजं बिन्दुश्च प्रथममुपक्षिप्येते । तत्र च पृथग्जनस्य लब्धनिवेशत्वात् सचिवादिगोचरत्वाच्च तदुपक्षेपे विष्कम्भकस्यैवावसर इति । ना० शा० १८.५५ अधिकृत्य भारती ।

2. ना० शा० १८.५१ अधिकृत्य भारती ।

3. अपि: प्रकरणं त्रेधा संकीर्णं धूर्तसंकुलम् । दश० ३.४२

नाटिका

नाटकप्रकरणयोर्योगात् नाटिका सम्भवात। तत्र नायको नृपतिः, । नायिकान्तःपुरकन्या, संगीतशाला-कन्या वा प्राप्तव्या भवेत् । वस्तु उत्पाद्यं स्यात् । तत्र स्त्रीणां बहुलता प्रवर्तते । अर्थात् स्त्रीणां कार्याणि प्रचुराणि सन्ति । चतुरङ्का नाटिका ललिताभिनयात्मिका भवति । अर्थात् तत्र कैशिकीवृत्तिः प्रधानेति मतमभिनवगुप्तस्य । सा तत्र चतुर्भिरंकैः सम्यक् विलसति ।

अपरञ्च भरतानुसारेण सेयं नाटिका

बहुनृत्तगीतपाठ्या रतिसम्भोगात्मिका चैव ।
राजोपचारयुक्ता प्रमादनक्रोधदम्भसंयुक्ता
नायकदेवीदूतीसपरिजना नाटिका ज्ञेया ॥ १८.५८-६०

अत्र सम्भोगो राज्यप्राप्तिमपि द्योतयति । अभिनवगुप्तः प्रसादन-क्रोधदम्भं विशदयन् व्याख्याति तत्पूर्व-नायिकागतैः क्रोधप्रसादवञ्चनैरवश्यं भाव्यम् ।

नायकः

धनञ्जयानुसारेण नाटिकाया नायको धीरललितो नृपतिः स्यात् । तत्र अङ्गी रसः स्वभावतः शृंगारः स्यादेव

पूर्वनायिका तु महादेवी एव नवनायिकायाः प्रणय-पथे बाधं समुपस्था-पयति । सा धनञ्जयेन परिभाषिता--

देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ।
गम्भीरा मानिनी कृच्छ्रात्तद्वशान्नेतृसंगमः ॥ ३.४५

प्राप्या नायिका तु

नायिका तादृशी मुग्धा दिव्या चातिमनोहरा । ३.४६

वृत्तम्

दशरूपकानुसारेण तु

अन्तःपुरादिसम्बन्धादासन्ना श्रुतिदर्शनैः ।
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम् ॥ ३.४७
नेता तत्र प्रवर्तेत देवीत्रासेन शंकितः ॥

नाटिकावृत्ते यत् प्रच्छन्नकामितं सविशेषं वर्तते, तत्तु भरतेन स्पष्टीकृतमधोविधिना—

बहुमानेन देवीनां वल्लभानां भयेन च ।
प्रच्छन्नकामितं राज्ञा कार्यं परिजनं प्रति ।।
यद्यप्यस्ति नरेन्द्राणां कामतन्त्रमनेकधा ।
प्रच्छन्नकामितं यत्तु तद्धि रतिकरं भवेत् ।।
यद् वामाभिनिवेशित्वं यतश्च विनिवार्यते ।
दुर्लभत्वं च यन्नार्याः सा कामस्य परा रतिः ।।

ना० शा० २२.२०५-२०७

नैतत् खलु धनञ्जयेन दृष्टं निर्दिष्टं वा ।

भाणः

दशरूपकेषु भरतानुसारेण भाणो नवमं स्थानं भजते, धनञ्जयमतेन च तृतीयं स्थानं भजते । वस्तुतो भाणो दृश्यकाव्यस्य प्रशस्तोद्देश्यानि सम्यङ् न निर्वर्तयति । रूपकाणां क्रमस्य निर्धारणमभिनवगुप्तानुसारेणाङ्क-संख्यादृष्ट्या त्रिवर्गोपायत्वप्राधान्यापेक्षया च भरतेन कृतम् । अभिनवगुप्तो निदिशति यत् नाटकप्रकरणनाटिका विहायान्यरूपकाणां तु त्रिवर्गोपायत्वं नास्ति एकाङ्कत्वात् । डिमस्तु चतुरङ्कोऽपि पश्चान्निर्दिष्ट इत्यत्र तल्लक्षणे कारणं वक्ष्यामः ।[1] भरतमतेन समवकारस्तृतीयं स्थानं भजते ।

अभिनवगुप्तो भाणं व्युत्पादयति -

एकमुखेनैव भाण्यन्ते उक्तिमन्तः क्रियन्ते अप्रविष्टा अपि पात्रविशेषा यत्रेति भाणः ।[2]

कथावस्तु

हास्यरसोचितविटधूर्ताद्यनुप्रवेशेन समानयोगक्षेमो भाण इत्यभिनवगुप्तवचनम् । तत्र एक एव रंगे प्रविष्टः पात्रविशेष आत्मानुभूतं वा शंसति, परगतं वा वर्णयति । भाणो बहुचेष्टो भवति । अर्थात् भाणे सामान्यपृथग्गतोपयोग्यस्तु लोकव्यवहारो वेश्याविटादिवृत्तान्तात्मा निरूप्यते ।

भाणो विविधाश्रयो भवतीति भरतवचनं तत्रार्थानां तत्सम्बद्ध-लोकानां च वैविध्यमनुसन्दधाति । धनञ्जयो भाणं शौर्यसौभाग्य-सम्भवं विशेषयति । एतदपि सन्दिग्धमेव वच इति प्रकृतिदर्शनात् प्रतिभाति ।

अपरं च भूयसा भारतीवृत्तिरङ्कोऽङ्कं वस्तु कल्पितमिति भाणं परिभाषते धनञ्जयः । तत्र सन्धिद्वयं मुखं निर्वहणं च विलसति ।

१. ना० शा० १८.९२ अधिकृत्य भारती ।

२. ना० शा० १८.१०७ अधिकृत्य भारती ।

रसः

'भाणे वीरशृङ्गारौ भूयिष्ठौ' इति धनञ्जयवचनं साधु न प्रतिभाति। उभयो रसयोः कृते उदात्तप्रकृतिरपेक्ष्यते। तस्या अभाव एव भाणे प्रत्यक्षमेव। भाणेषु विस्मय एव प्रधान इति वदत्यभिनवगुप्तः।[1] शृंगाराभासः स्यादेव।

अभिनयविधानम्

अभिनवगुप्तानुसारेण भाणे वाचिक आङ्गिकश्चाभिनयो भवति। परवाक्यवचनं स्वयमङ्गविकारैः पात्रविशेषोऽभिनयति। आकाशे शून्ये यानि पुरुषकथितानि स तान्येवानुवदन् सामाजिकान् बोधयति। अभिनयार्थं कार्य-नैरन्तर्यमपेक्ष्यते।

उपयोगः

अभिनवगुप्तोऽपि भाणस्य हीनप्रवृत्तिं परिलक्ष्यैवेतस्य समर्थनहेतुं लिखितवान्—बाहुल्येन पृथग्जनव्युत्पत्ति-योनिरूपकमिदं राजपुत्रादीनामपि शम्भलीवृत्तान्तो ज्ञेय एवावञ्चनार्थमिति।

भाणे लास्याङ्गानां स्थितिर्महत्त्वपूर्णेति तेषां विवरणं प्रस्तूयते। अपरविधेष्वपि रूपकेषु लास्याङ्गानां नियोजनं भवत्येव।

लास्याङ्गानि

रूपकेषु सन्ध्यङ्गवत्, वीथ्यङ्गवद् वा लास्याङ्गानि योज्यानीति भरतेन अभिनवगुप्तेन च प्रतिपादितम्।[2] तद्यथा अन्यान्यपि लास्यविधावङ्गानि तु नाट्योपयोगीनि। लास्यं खलूपरूपकविशेषो वीथीवद् वर्तते।[3] यथा वीथ्यङ्गानि सन्ति तथैव लास्याङ्गानि प्रवर्तन्ते।

धनञ्जयो लास्याङ्गानि परिगणयति—

> गेयं पदं स्थितं पाठ्यमासीनं पुष्पगण्डिका।
> प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्॥
> उत्तमोत्तमकं चैव उक्तप्रत्युक्तमेव च॥ ३.५२,५३

१. उत्सृष्टिकाङ्क-प्रहसनभाणास्तु करुणहास्य-विस्मय-प्रधानत्वात् रंजकरसप्रधानाः। ना० शा० १८.११० अधिकृत्य भारती।

२. अन्यथा सन्ध्यन्तरालानि सामादीनि महान्तान्येक-विंशतिः लास्याङ्गानि गेयपदादीनि दश यानि वक्ष्यन्ते, तेषां (नाटके) कुत्र निवेशः स्यात्। ना० शा० १९.९४ अधिकृत्य भारती।

३. भाणवच्चैकहार्यं स्याद्बहुवस्तु तथा भवेत्। ना० शा० ३१.३३२

स एतेषां विवरणं न प्रस्तौति । भरतेन लास्याङ्गानि परिभाषितानि । तद्यथा,

> आसनेषूपविष्टैर्यत्तन्त्रीभाण्डोपबृंहितम् ।
> गायनैर्गीयते शुष्कं तद् गेयपदमुच्यते ॥ १८.१२१

शुष्कमित्यनुकरणीयतया शून्यम् । गायनैरिति न तु पात्रैः । आसनोपविष्टैरिति न तु नेपथ्ये गीयते ।

> प्राकृतं यद्वियुक्ता तु पठेदासनं स्थिता ।
> मदनानलतप्ताङ्गी स्थितपाठ्यं तदुच्यते ॥ १८.१२३

आत्तरसमिति रसोपयोगि ।

> आसनमास्यते यत्र सर्वातोद्यविवर्जितम् ।
> अप्रसारितगात्रं च चिन्ताशोकसमन्वितम् ॥ १८.११५

आसीनं पाठ्यं शोकस्य महत्त्वम् ।

'तत्र सुकुमारकाकलीप्रायप्रमदागीतमात्रावशेषः' इति अभिनवगुप्तः ।

> नृत्तानि विविधानि स्युर्गेयं गाने च संश्रितम् ।
> चेष्टाभिश्चाश्रयः पुंसां यत्र सा पुष्पगण्डिका ॥ १८.१२६

पुरुषाणां कृते स्त्रीपात्राणां पुष्पगण्डिकेत्युक्तोति अभिनवगुप्तः ।

अत्र गाननृत्तगीतगतवैचित्र्ययोगात् मालासादृश्यात् पुष्पगण्डिका । तत्र स्त्री पुरुषमाश्रयते स्वचेष्टाभिः ।

> प्रच्छेदकः स विज्ञेयो यत्र चन्द्रातपाहताः ।
> स्त्रियः प्रियेषु सज्जन्ते ह्यपि विप्रियकारिषु ॥ १८.१२८

चन्द्रातप इति ज्योत्स्ना तस्यां छाया सादृश्यकान्तस्य प्रहर्षार्थविभूषितमिति । ज्योत्स्नेति उपलक्षणम् । मदिरायां वा दर्पणे सन्निलक्ष्यवा नायकस्य छायां दृष्ट्वा विस्मृतव्यलीकाः सन्ति नायिकाः ।[1]

> अनिष्ठुरश्लक्ष्णपदं समवृत्तैरलंकृतम् ।
> नाट्यं पुरुषभावाढ्यं त्रिमूढकमिति स्मृतम् ॥ १८.१३०

त्रिमूढके कोमल-कान्त-पदावली शोभनवृत्तमलंकारनिष्ठता च त्रीणि वाग्वैशिष्ट्यानि सन्ति । तत्र काचिन्मुग्धा नायिका पुरुषवन्नटति ।

> पात्रं विभ्रष्टसंकेतं सुव्यक्तकरणान्वितम् ।
> प्राकृतैर्वचनैर्युक्तं विदुः सैन्धवकं बुधाः ॥ १८.१३१

१. ना० शा० १६.१८१ अधिकृत्य भारती ।

सैन्धवके सैन्धवप्राकृतभाषया नायिका गायति, यदा नायकः संकेत-स्थले न संगच्छते। करणमिति वीणावाद्यादि।

मुखप्रतिमुखोपेतं चतुरश्रपदक्रमम्।
श्लिष्टभावरसोपेतं वैचित्र्यार्थं द्विमूढके॥ १६.१३३
न पाठ्यं स्वल्पमप्यत्र प्रकुर्वीत विचक्षणः।
मुखप्रतिमुखोपेतं तथा चाचपुटाश्रयम्॥ ३१.३६०

द्विमूढकं द्वयोर्नायकस्य नायिकायाश्च नायिकयोर्वा मोहो व्यावर्ण्यते। अत्र च मनागपि पाठ्यं न कार्यम्। नाभिनयप्रधानम्, अपि तु परिवृत्ति-प्रधानमिति। तत् त्रिमूढकमेव हि तालकाव्यवशात् स्वल्प-शरीरं द्विमूढकमिति अभिनवगुप्तः।

उत्तमोत्तमकं विद्यादनेकरससंश्रयम्।
विचित्रैः श्लोकबन्धैश्च हेलाहावविचित्रितम्॥ १८.१३४
उत्तमोत्तमके स्वादो नकुटं सम्प्रयोजयेत्। ३१.३६२
श्लोकं विचित्रार्थपदं तथा चैवोपपादयेत्।
ततश्च वस्तुकं कार्यमपरान्तकशाखया॥ ३१.३६३
उत्तमोत्तमकं प्रोक्तं हेलावृत्तिविभूषितम्॥ ३१.३६४

अभिनवगुप्तानुसारेणोत्तमानि तावल्लास्याङ्गानि, तेषामपीदमुत्तमम्।[२] स्थायिनां बहुत्वनूतनत्वाद् घटनादिविचित्रमुक्तम्।[३]

कोपप्रसादजनितं साधिक्षेपपदाश्रयम्।
उक्तप्रत्युक्तमेवं स्याच्चित्रगीतार्थयोजितम्॥ १८.१३५
यत्र प्रियाकृतिं दृष्ट्वा विनोदयति मानसम्।
मदनानलतप्ताङ्गी तच्चित्रपदमुच्यते॥ १८.१३६
दृष्ट्वा स्वप्ने प्रियं यत्र मदनानलतापिता।
करोति विविधान् भावांस्तद्वै भाविकमुच्यते॥ १६.१३७

सर्वविधरूपकेषु लास्याङ्गानामुपयोग इति विशदयन्नभिनवगुप्तः प्राह—
अलौकिककैशिक्युपयोगिरसांशे सर्वथोपकारि यद् वैचित्र्यं तल्लास्याङ्ग-द्वारेण। स्वकार्यं तच्च सर्वं दशभिरेव संगृहीतम्। तथा हि—प्रधाने चित्त-वृत्त्यंशे वा वैचित्र्यं विभावाद्यंशे वा उपरञ्जकभावे वा। तत्र विभावांशगतं तु वैचित्र्यं सैन्धवकात् काकवाद्यंशे, स्थितपाठ्याल्लक्षणगुणाद्यंशे, द्विमूढकादनु-

१. ना० शा० १८.३६०-३६२ अधिकृत्य भारतीमनुसृत्य।
२. ना० शा० १८.१३४ अधिकृत्य भारती।
३. तत्रैव।

वृत्तांशे, पुष्पगण्डिकात आहार्ये, उपरञ्जकगीतातोद्ययोजने च, सात्त्विक आसीनपाठ्यात्, उपरञ्जकभावेऽपि निःशब्दाद्, ध्रुवागानभागे सर्वातोद्ययोगे च गेयपदात्, गीतार्थस्य पात्रे करुणार्थाभिनये उत्कप्रत्युक्तादाविकस्य, स्वरताला-नुसरणात् द्विमूढकात्। तत एवाङ्गिकवैचित्र्यमपि व्यभिचार्यंशे तु वैचित्र्य-मुत्तमोत्तमकात्।[1]

लास्याङ्गानि तु नाट्योपयोगीनि, न तु नाट्याङ्गानीति अभिनवगुप्तेन सम्यग् व्याख्यातम्।[2]

प्रहसनम्

प्रहसनं तु वस्तुतो रञ्जना-प्रधानं हास्यप्रायं भवति। तत् द्विविधम्— शुद्धम्, संकीर्णञ्च।

शुद्धं प्रहसनम्

> भगवत्तापसविप्रैरन्यैरपि हास्यवादसम्बद्धम्।
> कापुरुषसम्प्रयुक्तं परिहासाभाषणप्रायम्॥
> अविकृतभाषाचारं विशेषभावोपपन्नचरितपदम्।
> नियतगतिवस्तुविषयं शुद्धं ज्ञेयं प्रहसनं तु॥ १८.१०३-१०४

भगवत्तापसविप्रा यतिवानप्रस्थगृहस्थाः, अन्ये शाक्यादयस्तैरुपलक्षितम्। एते तत्र कथापुरुषा न सात्त्विका, अपितु कुत्सिता एव सन्ति।

भरतानुसारेण प्रहसने शुद्धे सति तत्र पात्राणां भाषा आचारश्च नासत्या-श्लीलरूपौ।

कथाखण्डानि (पदानि) तत्र व्यभिचारिभिरयान्तानि भवेयुः। परिहास-भाषणानि प्रहसने भवन्ति। अभिनवगुप्तानुसारेणैकस्यैव कस्यचिच्चरितं दुष्टत्वात् प्राधान्येन प्रहस्यते।

सङ्कीर्णं प्रहसनम्

यस्मिन् प्रहसने वेश्या, चेटः, नपुंसकः, विटः, धूर्तः बन्धकी च भगवत्तापसादिभिः सह पात्राणि भवन्ति, तत् संकीर्णं प्रहसनं भवति। हास्या-स्पदमेव तेषां वेषपरिच्छद-चेष्टित-करणादीनि।[3] धूर्तानां तत्र विवादः स्यात्। वीथ्यङ्गानि प्रहसने सम्यग् विलसन्ति।

---

१. ना० शा० १६.१३७ अधिकृत्य भारती।

२. ना० शा० १६.११७ अधिकृत्य भारती।

३. अत्युल्बणं चाकल्पादि। ना० शा० १८.१०५ अधिकृत्य भारती।

अङ्कसंख्या

भरतेन प्रहसनेऽङ्कसंख्या न निर्धारिता। अभिनवगुप्तः शुद्धं प्रहसनमेकाङ्कं भवति, संकीर्णमनेकाङ्कमित्यन्येषां मतमुद्धरति। प्रायशः प्रहसनानि एकाङ्कानि सन्ति। लटकमेलके हास्य-चूडामणौ चाङ्कद्वयमस्ति।

धनञ्जयस्तावद् भारतीयं शास्त्रं न सर्वथा समर्थयति प्रहसन-विषये। तदनुसारेण तु प्रहसनं त्रिविधं भवति—शुद्धं, विकृतं, संकीर्णञ्च।

धनञ्जयस्य शुद्धं प्रहसनमस्ति—

पाखण्डिविप्रप्रभृति चेट-चेटी - विटाकुलम्।
चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोऽन्वितम्॥

दश० ३.५४,५५

इदं शुद्धं प्रहसनं तु भरतस्य संकीर्णप्रहसनेन समम्। धनञ्जयस्य विकृतं प्रहसनं तावत् विशिष्टमेव—

कामुकादिवचोवेषैः षण्ढकंचुकितापसैः। ३.५५

नैतन्मतं भरतस्येति प्रागेव निर्दिष्टम्। स तु विकृतं नाम प्रहसनं न प्रतिजानीते।

धनञ्जयस्य संकीर्णं प्रहसनं तु विकृतमेव वीथ्यङ्गैः संकीर्णत्वाद् भवति।[१] एतन्मतं सर्वथा निराधारमेव, यतो हि नाम वीथ्यङ्गानि तु सर्वविधेषु प्रहसनेषु विलसन्त्येवेति भरतेन स्पष्टमेव प्रोक्तम्—

वीथ्यङ्गैः संयुक्तं कर्तव्यं प्रहसनं यथायोगम्। १८.१०

वृत्तिः

वाग्व्यापारस्य प्रधानत्वात् प्रहसने भारतीवृत्तिः भृशं विलसति।

धनञ्जयः प्रहसनं भाणवन्मन्यते।

डिमः

अभिनवगुप्तानुसारेण डिमो डिम्बो विद्रव इति पर्यायाः। तद्योगादयं डिमः। नाटकतुल्यं सर्वमन्यत् केवलं सन्धीनां रसानां चासमग्रता। भरतो डिमं परिभाषते—

प्रख्यातवस्तुविषयः प्रख्यातोदात्तनायकश्चैव।
षड्रसलक्षणयुक्तश्चतुरङ्को वै डिमः कार्यः॥

---

१. धनञ्जयः प्रकरणस्य संकीर्णतां धूर्तपात्राणां योगेन मन्यते—आभिः प्रकरणं त्रेधा संकीर्णं धूर्तसंकुलम् दश० ३.४२। अत्रापि प्रहसन-संकीर्णता धूर्तपात्राणां योगेन मन्तव्यासीत्, यथा भरतेन निर्णीतम्।

शृङ्गार-हास्यवर्जैः शेषैः सर्वै रसैः समायुक्तः ।
दीप्तरसकाव्ययोनिः नानाभावोपसम्पन्नः ॥
निर्घातोल्कापातैरुपरागेणेन्दुसूर्ययोर्युक्तः ।
युद्धनियुद्धाधर्षण-सम्फेटकृतश्च कर्तव्यः ॥
मायेन्द्रजालबहुलो बहुपुस्तोत्थानयोगयुक्तश्च ।
देवभुजगेन्द्र - राक्षसयक्षपिशाचावकीर्णश्च ॥
षोडशनायकबहुलः सात्वत्यारभटी-वृत्तिसम्पन्नः ।
कार्यो डिमः प्रयत्नान्नानाश्रयभावसम्पन्नः ॥ १८.८८

अभिनवगुप्तानुसारेण 'नानाश्रय-भाव-सम्पन्नः' इत्यनेन सर्वभावयुक्तत्वादितिवृत्तवैचित्र्यमाह ।

डिमे प्रवेशकविष्कम्भकयोर्निरोधः, किन्तु चूलिकाङ्कावताराङ्कमुखानामुपयोगो वर्तते ।

धनञ्जयेन नायकस्योदात्त्यं न वर्णितम्, यथा भरतेन कृतम् । यदि नाम धीरोदात्तो नायकस्तर्हि वीरस्यैवाङ्गित्वं प्रतिपादनीयम् । धनञ्जयो रौद्ररसमेवाङ्गिनं मन्यते । अभिनवगुप्तस्तु डिमे वीररौद्रयोः प्राधान्यं व्याकरोति ।[1]

व्यायोगः

अभिनवगुप्तानुसारेण व्यायोगस्तु डिमस्यैव शेषभूतः । नायकस्तु उदात्तो राजादिः, अमात्यः, सेनापतिः दीप्तरसस्य योग्याः न देवा ऋषयो वा । भरतानुसारेण व्यायोगे—

बहवश्च तत्र पुरुषा व्यायच्छन्ते यथा समवकारे । १८.९१

अर्थात् द्वादश कथापुरुषा भवन्ति ।

भरतो व्यायोगं परिभाषते—

व्यायोगस्तु विधिज्ञैः कार्यः प्रख्यातनायकशरीरः ।
अल्पस्त्रीजन - युक्तस्त्वेकाहकृतस्तथा चैव ॥
बहवश्च तत्र पुरुषा व्यायच्छन्ते यथा समवकारे ।
न च तत्प्रमाणयुक्तः कार्यस्त्वेकाङ्क एवायम् ॥

१. समवकारे तु यद्यपि हि शृंगारादित्वमुक्तं तथापि वीर एव प्रधानो रौद्रो वा । डिमव्यायोगयोरप्येवम् । ना० शा० १८.११० अधिकृत्य भारती ।

न च दिव्यनायककृत: कार्यो राजर्षिनायकनिबद्ध: ।
युद्ध-नियुद्धाधर्षण-संघर्षकृतश्च कर्तव्य: ॥
एवंविधस्तु कार्यो व्यायोगो दीप्तकाव्यरसयोनि: ॥ १८.९०-९१

नियुद्धं बाहुयुद्धम् । संघर्ष: शौर्य-विद्याकुलरूपादिकृता स्पर्धा ।

भरतमननुसृत्य धनञ्जयो धीरोद्धतमेव नायकं व्यायोगस्य मन्यते ।[1]

समवकार:

त्रिवर्गोपाय-प्रस्तुतिमपेक्ष्य भरतो रूपकेषु नाटकप्रकरणयोरनन्तरं समवकारं तृतीयमिति स्थापयति । न तावद् धनञ्जय एवं प्रतिष्ठापयति समवकारम् । समवद्धोऽवकीर्णश्च यत्रार्थ: समवकार इति नाम सार्थकम् ।

नायक:

समवकारे प्रख्यातो नायको देव: स्यात् ।[2] स तु धीरोदात्तो भवति ।[3] तत्र कथापुरुषा: त्रिषु अङ्केषु द्वादश स्यु:, प्रत्येकशश्चत्वारो वा सर्वे मिलिता: संघाता द्वादश वा । असुरस्तु प्रतिनायक: ।

कथावस्तु

अप्रतिसम्बद्धकथावस्तु अङ्कत्रये विभक्तं स्यात् ।[4] तत्र कपटत्रयं विद्रवत्रयं च स्याताम् । घटनावधिस्तु अष्टादशनाडिका: कथाया वर्तते ।[5] बीजेऽङ्कत्रयार्थ उपक्षेप्तव्य: । अर्थ: प्रत्येकस्मिन्नङ्के पूर्णोऽपि असम्बद्ध: सन्नपि-तृतीयेऽङ्के फलानुवर्ती ।[6]

अङ्के नाडी-विधानम्

प्रथमेऽङ्के कामश्रृंगार: प्रयोज्य: । तत्र कार्यं द्वादशनाडिकाविहितं स्यात् । तत्र कार्यविधौ प्रहसनकपट-विद्रवाणां वैशिष्ट्यं भवति । वीथ्यङ्गानि तत्र भवेयु: ।

१. ख्यातोद्धतनराश्रय: । दश० ३.६०
२. देवासुरा अपि चाप्रख्याता बृहत्कथादौ श्रूयन्ते, स्वयं वा केनचिदूह्यन्ते इति तन्निरासार्थं प्रख्यातपदम् । ना० शा० १८.६३ अधिकृत्य भारती ।
३. स्वभावतस्तु देवा मनुष्यापेक्षया धीरोद्धतास्तथापि स्वापेक्षया गाम्भीर्यप्रधानतयोदात्ता उच्यन्ते ।
४. अप्रतिसम्बद्धमिति किञ्चित् सम्बद्धम्, न तु पूर्णतयासम्बद्धमिति अभिनवगुप्त: ।
५. नाडिका मुहूर्तार्धं भवति । अहोरात्रे ३० मुहूर्ता भवन्ति ।
६. न त्वङ्गोऽङ्ग: परस्परम् । १८.६६

द्वितीयेऽङ्के घटिकाचतुष्टयगामिभिः कपटादिभिरुपायैः कार्यं प्रवर्तते।

तृतीयाङ्के द्विघटिकान्तरसम्पाद्यैरुपायैः कार्यं समाप्यते।

विद्रवः

समवकारे त्रिविधो विद्रवो भवति – अचेतनकृतः, चेतनकृतः, चेतनाचेतनकृत इति।[1] अचेतनकृतो जलवाय्वादिनोत्पद्यते, चेतनकृतो विद्रवः सिंहगजेन्द्राभ्याम्, चेतनाचेतनाभ्यां कृतो विद्रवो नगरोपरोधयुद्धाग्निभिर्भवति।

कपटः

त्रिविधः कपटोऽङ्कत्रये क्रमशो भवति। अपराधविहीनो यदि कपटेन दण्ड्यते स प्रथमविधो वस्तुस्वभावेन बुद्ध्या वा जनितः कपटः। यदि कपटवञ्चितः सापराधर्न्नहि द्वितीयविधः कपटः परप्रयुक्तः। तृतीयः कपटः दैवकृतः। तत्र कश्चिन्नायकोऽपचयेनापरश्चोपचयेन युज्यत इति।

शृङ्गारः

समवकारे त्रिविधः शृङ्गारः – धर्मे, अर्थे च कामे च विलसति। कामशृंगाराय परस्त्री नायिकात्वेनाभिप्रेता। यथा शक्रस्याहल्या। धर्मार्थं शिवस्य पार्वती अभीप्सिता। अर्थार्थं तु पद्मावती स्यादुदयनस्य नायिका।

छन्दांसि

उष्णिग्, गायत्री, अपराणि च विषमार्धसमानि वृत्तानि समवकारोचितानि सन्ति।

धनञ्जयस्तु समवकारस्य परिभाषायां कतिपय-विशेषान् प्रपञ्चयति। तथा हि, समवकारस्य नाटकवदामुखं भवति। तत्र कैशिकीवृत्तिर्न भवति।[2] वीररसस्य तत्र प्राधान्यमस्ति। प्रथमेऽङ्के सन्धिद्वयमस्ति। बिन्दुप्रवेशकौ समवकारे न स्तः। यथा प्रहसने तथा समवकारेऽपि वीथ्यङ्गानि स्युः।

अभिनवगुप्तानुसारेण समवकारे बहूनां लोकानां स्वभावस्य रञ्जनं भवति। तद्यथा – एवं श्रद्धालवो देवताभक्ताः तद्दैवयात्रादावनेन प्रयोगेणानुगृह्यन्ते, निरनुसन्धानहृदयाः स्त्रीबालमूर्खाश्च विद्रवादिनाहृतहृदयाः क्रियन्ते।

१. यस्माद् विद्रवन्ति जना स विद्रवः इति अभिनवगुप्तः।

२. यदि नाम शृंगारत्रयं समवकारेऽस्ति, तर्हि कथं कैशिकीवृत्तिर्न स्यादिति समाधेयम्। अभिनवगुप्तानुसारेण तत्र नर्माद्यङ्गचतुष्कतदुपरञ्जकगीतनृत्यवाद्याद्यभावात् कैशिक्या हीना अत्र वृत्तयः सन्ति।

वीथी

अभिनवगुप्तानुसारं तु वीथ्या माहात्म्यं सविशेषमेव । तत्र किं-कारणम् – सर्वरसमयत्वात्, अवितत्स्वभावत्वाच्च संक्षेपेण व्युत्पत्तिदायिनीत्वेन प्रधानभूतत्वात्तदङ्गानां च नाटिकादि-भाणान्त-समस्त-रूपकोपजीव्यत्वाद् वीथी महत्त्वपूर्णास्ति ।

नेता

भाणवद् वीथी एकहार्या, आकाशपुरुषभाषितैर्भवेत् । अपरो भेदो वीथ्या द्विहार्यं इति उक्ति-प्रत्युक्ति वैचित्र्येण निष्पद्यते ।

वृत्तिः रसाश्च

वीथ्यां कैशिकीवृत्तिर्यथानाम विलसति । फलतः शृङ्गारः प्रधानो रसः सूच्य एव । तत्र वीथ्यङ्गानि आत्मनीनान्येव विलसन्ति ।

वीथ्यङ्गानि

वीथ्या अङ्गानि त्रयोदश सन्ति—उद्घात्यम्, अवलगितम्, प्रपञ्चः, त्रिगतम्, छलनम्, वाक्केली, अधिबलम्, गण्डः, अवस्यन्दितम्, नालिका, असत्प्रलापः, व्याहारः, मृदवम् । एतेषु प्रथमद्वयमामुखाङ्गत्वादामुख-प्रकरणे वर्णितम् । शेषभूतानि वीथ्यङ्गानि लक्ष्यन्ते ।

प्रपञ्चः

यदसद्भूतं वचनं संस्तवयुक्तं द्वयोः परस्परं यत्तु ।
एकस्य चार्थहेतोः स हास्यजननः प्रपञ्चः स्यात् ॥

त्रिगतम्

वीथ्यङ्गस्य त्रिगतं पूर्वरंगस्य त्रिगताद् भिन्नमेव । अत्र त्रिगतं तु—

श्रुति-सारूप्याद्यस्मिन् बहवोऽर्था युक्तिभिर्नियुज्यन्ते ।
यद् हास्यमहास्यं वा तत् त्रिगतं नाम विज्ञेयम् ॥

छलनम्

अन्यार्थमेव वाक्यं छलनमभिसन्धानरोषकरम् ।

वाक्केली

एकद्विप्रतिवचना वाक्केली स्यात् प्रयोगेऽस्मिन् ।

अधिबलम्

भरतो धनञ्जयश्चोभौ परस्परमहमहमिकया विशेषवचनप्रस्तावोऽधिबलमिति मन्येते ।[1] अधिबलं भिन्नमेव—अभिसन्धिरितिगर्भसन्धेरङ्गात् ।

---

१. अन्योऽन्यार्थविशेषकमधिबलमिति तद्बुधैर्ज्ञेयम् । ना० शा० १८.१२३
अन्योन्यामिष्योक्तिः स्पर्धयाधिबलं भवेत् । दश० ३ १८

गण्ड:

भरतो गण्डं विस्तरेण परिभाषते—

संरम्भसम्भ्रमयुतं विवादयुक्तं तथापवादकृतम् ।
बहुवचनाक्षेपकृतं गण्डं प्रवदन्ति तत्त्वज्ञा: ॥ १८.१२६

तत्र गण्डवचनस्य चत्वारि विशेषणानि सन्ति—संरम्भ-संभ्रमयुतम्, अपवादकृतम्, विवादयुक्तम् बहुवचनाक्षेपकृतमिति । अस्मिन् प्रकरणेऽपवादस्तु पूर्वोक्तवस्तुनोऽपवदनमेव । बहुवचनाक्षेपस्तावत् पूर्ववचनस्यासमाप्तिकारणात् सम्भवति ।

धनञ्जय: संक्षेपेण गण्डं परिभाषते । तद्यथा

गण्ड: प्रस्तुतसम्बन्धि भिन्नार्थं सहसोदितम् ॥ ३.१८

अत्र भरतेनोदितानि विशेषणानि न लक्षितानि । गण्डे तु पूर्वविश्रान्तमपिवाक्यमुत्तरवाक्येन संश्लिष्यते । तदेव संश्लेषणं कमपि अदृष्टपूर्वमर्थं भाविनमपि दर्शयति । इदमेव गण्डत्वम् । गण्डस्तु साधारणतोऽनर्थमेव द्योतयति ।[1] अतएव गण्डनाम सार्थकम् ।

गण्डस्य वक्ता तदर्थमेव रंगं सहसा प्रविशति ।

अवस्यन्दितम्

अभिनवगुप्तानुसारेणाबुद्धिपूर्वकं कुत्रचिदर्थे आक्षिप्तेऽपि कौशलात्तत्प्रच्छादनेच्छया यत्रोत्तरोऽन्योऽर्थ उच्यते तदवस्यन्दितम् । तत्र भरतस्य कारिकाधोलिता—

आक्षिप्तेऽर्थे तु कस्मिंश्चिच्छुभाशुभसमुत्थिते ।
कौशलादुच्यतेऽन्योऽर्थस्तदवस्यन्दितं भवेत् ॥

एतदेव धनञ्जय संक्षेपेण परिभाषते—

रसोक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं भवेदिति ।

कस्यापि प्रयुक्तपदस्य वस्तुत: पूर्वमनभिप्रेतमुत्तरवाक्येषु व्याख्यायते इति अवस्यन्दनं भवति ।

नालिका

प्रहेलिकेव नालिका भवति, यदि नाम सा हास्यार्थं प्रयुज्यते । तत्र नर्मादि-क्रीडाभावस्यावश्यम्भावित्वम् । धनञ्जयो नालिकाया नवं विशेषणं निगूढार्था इति योजयति । तत्तु व्यर्थमेव । निगूढता प्रहेलिकायां भवत्येव ।

१. यथा उत्तररामचरिते परममयम्नु विरह उपस्थित: ।

असत्प्रलाप:

भरतानुसारेणासत्प्रलापस्तु मूर्खैर्विदुषां हितवचनस्याग्रहणं स्यात् । तद्यथा,

मूर्खजनसंनिकर्षे हितमपि यत्र प्रभाषते विद्वान्
न च गृह्यतेऽस्य वचनं विज्ञेयोऽसत्प्रलापोऽसौ ।। १८.११८

अभिनवगुप्तस्तु असत्प्रलापे श्लेषेण द्विविधं तत्त्वमावश्यकं मन्यते हितं प्रियं च । तत्र मूर्खः प्रियं गृह्णाति हितं च न गृह्णातीति । असतोऽसाधुभूतस्य वस्तुनः प्रलपनमस्मिन्निति असत्प्रलापः ।[1]

धनञ्जयस्तु भिन्नमेव परिभाषते—

असम्बद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः । ३.२०

एतत् व्याख्यातं धनिकेन—उत्स्वप्नायित-मदोन्माद-शैशवादीनामसम्बद्धप्रलापितेव विभावः ।

व्याहार:

भरतानुसारेण व्याहारस्तु हास्यलेशार्थः प्रत्यक्षवृत्तिरेव कस्यचिदुक्तेः । अभिनवगुप्त एतद् व्याख्याति प्रत्यक्षशब्देन भावी प्रत्यक्ष उच्यते । तदयमर्थः – भाविनि प्रत्यक्षेऽर्थे दैववशात् वृत्तिर्यस्य स व्याहारः । विविधोऽर्थोऽभिनीयते येन । यथा, उद्दामोत्कलिकां" इत्यादि ।[2] तत्र हास्यस्य मात्रा स्वल्पैव ।

धनञ्जयस्तावदन्यथा परिभाषते व्याहारम् । तद्यथा,

अन्यार्थमेव व्याहारो हास्यलोभकरं वचः । ३.२०

अर्थात् किमप्यनुक्तमुद्दिश्य व्याहार-वचनं भवति, येन हास्यं लोभश्च प्रथमतः प्रकटीभवतः ।

मृदवम्

भरतानुसारेण—

यत्कारणाद्गुणानां दोषीकरणं भवेद् विवादकृतम् ।
दोषगुणीकरणे वा तन्मृदवं नाम विज्ञेयम् ।।

अत्र विवादप्रसङ्ग आवश्यक इति भरतो मनुते । नैतन्मतं धनञ्जयस्य । तदनुसारेण केवलं '**दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्** ।'

१. सर्वथा योऽक्षविजयी सुरासेवनतत्परः ।
तस्यार्थानां सुखानां च समृद्धिः करगामिनी । इत्युदाहरणम्

२. रत्नावली २.४

अभिनवगुप्तस्तु मृदवस्य व्युत्पत्तिमनुसृत्य व्याख्याति—मृदवमितिमर्दनं-मृत्परपक्षमर्दनेन स्वपक्षमवति रक्षतीति। नैतद्वच उदाहरणमनुधावति।

नायक:

वीथ्यां सर्वे रसा भवितुमर्हन्ति। रसानां प्राधान्यादुत्तमो, मध्यमोऽधमो वा नायको भवत्येव। तथा च कोहल:—

उत्तमाधममध्याभिर्युक्ता प्रकृतिभिस्तथा।
एकहार्या द्विहार्या वा सा वीथीत्यभिसंज्ञिता॥

उत्सृष्टिकाङ्क:

उत्सृष्टिकाङ्कस्यापरं नाम अङ्क एव। अभिनवगुप्तानुसारेणोत्क्रमणीया सृष्टिर्जीवितं प्राणा यासां ता उत्सृष्टिका: शोचन्त्य स्त्रियस्ताभिरङ्कित: इति।

कथावस्तु

'अङ्के कथावस्तु प्रख्यातमप्रख्यातं वा विकल्पेन भवति' इति भरत:। अत्र धनञ्जयस्य वैषम्यं वर्तते। तदनुसारेण केवलं प्रख्यातमेवाङ्कस्य वस्तु भवितुमर्हति।[1] भरतानुसारेणाङ्कस्य कथा युद्धवृत्तस्य पश्चात् प्रारभ्यते। नैतदपि धनञ्जयेन गृहीतम्। विपरीतमेव स लक्षयते यत्।

वाचा युद्धं विधातव्यं तथा जयपराजयौ। ३.७२

भरतानुसारेण तु युद्ध-समारम्भस्तत्र न सम्भवेत्। जयपराजयस्य तत्र का कथा।

अभिनवगुप्त: स्पष्टयति— भारतादियुद्धे यत्करुणबहुलं चेष्टितं वर्ण्यते, तत्ख्यातं स्त्रीपर्ववृत्तान्तवत्।

स्त्रीणां परिदेवना, अन्येषां च निर्वेदभाषणं स्याताम्। व्याकुलचेष्टा: सन्तु नाम।

नायक:

अंके देवा नायका न स्यु:।[2] धनञ्जय: केवलं प्राकृतं नरमेव नायकं निर्दिशतीति विपरीतमेव।[3]

वृत्ति:

अंके केवलं भारती वृत्तिरेव स्यात्। तद्यथा भाणे भवति। धनञ्जयानुसारेणाङ्के भाणवत् सन्धि-वृत्त्यङ्गानि सन्ति।

---

१. प्रख्यातवस्तु विषयस्त्वप्रख्यात: कदाचिदेव स्यात्। ना० शा० १८.८४
उत्सृष्टिकाङ्कं प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्। ३.७

२. दिव्यपुरुषैर्वियुक्त:। ना० शा० १८.८४

३. नेतार: प्राकृता नरा:। दश० ३.७१

रसः

करुणरसः स्थायी स्यादंके ।

ईहामृगः

ईहामृगस्य व्युत्पत्तिमभिनवगुप्त आह—ईहा चेष्टा मृगस्येव स्त्रीमात्रार्था यत्र, स ईहामृगः ।

कथावस्तु

ईहामृगे दिव्यस्त्रीकारणोपगतं युद्धं भवति । तत्र वस्तु सुविहितं (सुश्लिष्टम्) सुसमाहितं च स्यात् ।[1] काव्यबन्धश्च विप्रत्ययकारकः (विश्वास-हेतु-रहितः) स्यात् । संक्षोभः, विद्रवः, सम्फेटश्च सन्ध्यङ्गानि योज्यानि । स्त्रीभेदनप्रहरणावमर्दनेषु शृंगाररसः प्रवर्तते । न तत्र संघर्षे युद्धं भवेत् । युद्धं तु केनापि व्याजेन शमयितव्यमेव ।

धनञ्जयस्तु मिश्रं वस्तु ईहामृगे लक्षयते । तत्तु प्रथमपदेऽभारतीयमेव । अन्यच्च मिश्रं नाम वस्तु न भवत्येवेति प्रागेव प्रतिपादितम् । धनञ्जय ईहामृगे त्रयश्चत्वारो वाङ्का भवेयुरिति नियमयति । भरत ईहामृगमेकाङ्कं मन्यते ।

नायकः

ईहामृगे नायको देव एव स्यात् । बहव उद्धत-पुरुषा अपि कार्येषु नियुक्ताः सन्ति । तेषां रोषः स्त्रीनिमित्तक एव स्यात् । नायिका तु दिव्यस्त्री प्रागेव प्रतिपादिता । नायकानां संख्या व्यायोग-समवकारवद् द्वादश भवति । भरतो-विस्पष्टयति ।

> यद् व्यायोगे कार्यं ये पुरुषा वृत्तयो रसाश्चैव ।
> ईहामृगेऽपि ते स्युः केवलममरस्त्रियायोगः ॥१८.८१

भरत-धनञ्जययोर्भेदः

भरतानुसारेण नायकः केवलं दिव्यः पुरुष एव स्यात् । धनञ्जयस्तु नरो वा दिव्यो वा नायको भवेदिति भरतं न सम्यगनुसरति ।[2]

१. अभिनवगुप्तो व्याख्याति—सुविहित इति समवकारवत् असम्बद्धार्थता तत्र न भवेदिति । पुनश्च स कथयति—सुसमाहित. काव्यबन्ध इत्यनेन वीथ्यङ्गानि अत्र योज्यानीति ।

२. नरदिव्यावनियमान्नायक-प्रतिनायकौ । ३.७३

भरतानुसारेणाङ्क एक एव तत्र स्यात्, किन्तु धनञ्जयोऽङ्काश्चत्वारो-भवेयुरिति नियमयति।[1]

सन्धि-विषयेऽपि धनञ्जयस्य वैषम्यं वर्तते। स सन्धित्रयं समर्थयति। चतुरंकेषु सन्धित्रयं सम्भवेत्, किन्तु भरतानुसारेणैकस्मिन्नङ्के सन्धिद्वयमेव कल्पनीयम्।

रूपकेषु रस-योजना

अभिनवगुप्तो विविधरूपकेषु को रसो विनमतीति सम्यग् व्याख्यातवान्।[2] तथा हि—**सर्वरस-योग्यतायामपि नाटके प्रकरणे च धर्मार्थादिवीर एव प्रधानः, परमार्थतः सर्वेषु नायकभेदेषु वीरत्वानुगमदर्शनात्**।[3] समवकारे तु यद्यपि शृङ्गारादित्वमुक्तं तथापि वीर एव प्रधानः रौद्रो वा। डिमव्यायोगयोरप्येवम्। ईहामृगेऽपि रौद्रप्राधान्यमेव। नाटिकायां तु शृङ्गार एव प्रधानः। एवं तावद् वीररौद्रशृङ्गारा यथास्वं पुमर्थत्रयप्राणभूतत्वेन वर्तमाना, एतेषु प्रयोगेषु शान्तबीभत्सरसौ तु चरमपुमर्थयोगात्तत्र च सर्वस्य नाधिकारोऽपि कस्यचिद्-पश्चिमजन्मनोऽधिकारान्नाटके यद्यपि तत्फल-प्रधानतया प्राधान्यमवलम्बेयातां, तथापि नासौ प्रचुरप्रयोग इति तयोः पुरुषार्थप्रवरप्राणितयोरपि वीरादिरसान्तरा-ध्यावापेनावस्थापनम्।

उत्सृष्टिकाङ्कप्रहसनभाणास्तु करुणहास्यविस्मय-प्रधानत्वाद् रञ्जकरस-प्रधानाः। तत एव स्त्री बालमूर्खादिरधिकारी।

सर्वान्ते सर्वरसमयत्वादवितनस्वभावत्वाच्च वीथीं लक्षयति।

---

१. मिश्रमीहामृगे वृत्तं चतुरङ्कम्। द० रू० ३.७२। कार्यवशान्नाङ्क उच्यते। नैक एवाङ्कः। ना० शा० १८. ८१ अधिकृत्य भारती

२. ना० शा० अष्टादशाध्याये पृ० ४५१ गा० ओ० सी०।

३. इदं लक्षणं तु विलक्षणमेव, यतो हि नागानन्द स्वप्नवासवदत्ताविमारकाभिज्ञान शाकुन्तल-मृच्छकटिकादिषु वीररसो विश्राम्यतीति कश्चिदभिनव एव रसाधिकारः।

रसानुसन्धानम्

२०

रस-स्वरूपम्

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रस-परिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ।।ध्वन्यालोके ४·४

भरत आदौ प्रोक्तवान्—

तत्र विभावानुभावव्यभिचारिसंयोगाद् रस-निष्पत्तिः ।[1] नेयं परिभाषा रसस्यापि तु कथं नाम रसो जायते इत्यत्र व्याख्यातम्। रसस्य परिभाषा-पथेऽग्रेसरो भरतः प्राह—रस इति कः पदार्थः । उच्यते—आस्वाद्यत्वात् । कथमास्वाद्यते रसः !

यथा हि नाना व्यञ्जन-संस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति, सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति, तथा नानाभावाभिनय-व्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति । तस्मान्नाट्यरसा इत्यभिव्याख्याताः ।[2]

अत एवेदं स्फुटति यत् स्थायी भाव एवास्वाद्यमानो रसः स्यादिति भरतमतम् ।[3]

१. अत्राह—यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद् रस-निष्पत्तिः, तथा नानाभावोपगमाद् रस-निष्पत्तिः । यथा हि गुडादिभिर्द्रव्यैर्व्यञ्जनैरौषधिभिश्च षाडवादयो रसा निर्वर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति ।
ना० शा० षष्ठाध्याय पृ० २८७-२८८ गा० ओ० सी०

२. ना० शा० षष्ठाध्याय पृ० २८८ गा० ओ० सी०

यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम् ।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ।।
भावाभिनय-सम्बद्धान् स्थायिभावांस्तथा बुधाः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ।।
ना० शा० ६·३२-३३

३. तथा विभावानुभावव्यभिचारिपरिवृतः स्थायीभावो रसनाम लभते । सप्तमाध्याय पृ० ३४९ । गा० ओ० सी०

धनञ्जय इममेवाभिप्रायं स्पष्टयति—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।

आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः ॥४·१

पण्डितराजो जगन्नाथो रसं परिभाषते— समुचित-ललित-सन्निवेश-चारुणा काव्येन समर्पितैः सहृदय-हृदयं प्रविष्टैः तदीयसहृदयता-सहकृतेन भावना-विशेषमहिम्ना विगलित-दुष्यन्त-रमणीत्वादिभिरलौकिकविभावानुभाव-व्यभिचारि-व्यपदेश्यैः शकुन्तलादिभिरालम्बनकारणैश्चन्द्रिकादिभिरुद्दीपनकारणैरश्रुपातादिभिः कार्यैश्चिन्तादिभिः सहकारिभिश्च सम्भूय प्रादुर्भावितेनालौकिकेन व्यापारेण तत्काल-निवर्तितानन्दांशावरणाज्ञानेनात एव प्रमृष्टपरिमित-प्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निज-स्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः ।

पूर्वोक्तपरिभाषासु विभावोऽनुभावो, व्यभिचारिभावः, स्थायी भावश्च सम्यक् परिचेयाः । तान् लक्षयामः ।

विभावः

भरतानुसारेण विभावो विज्ञानार्थः । विभावः कारणं निमित्तं हेतुरिति पर्यायाः । विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावः । यथा विभावितं विज्ञातमित्यनर्थान्तरम् ।[1]

तदेतदभिनवगुप्तो विशदयति—**चित्तवृत्त्युद्भवहेतुर्विषयो विभावशब्द-स्यार्थः ।**[2] वागादयोऽभिनया येषां स्थायि-व्यभिचारिणां ते (स्थायि-व्यभिचारिणः) वागाद्यभिनय-सहिता विभाव्यन्ते विशिष्टतया ज्ञायन्ते यैः, ते विभावाः ।

एतदेव भूयः स्पष्टीकृतं पण्डितराजेन—

एवमेषां स्थायिभावानां लोके तत्तन्नायकगतानां यान्यालम्बनतयोद्दीपनतया वा कारणत्वेन प्रसिद्धानि, तान्येव काव्यनाट्ययोर्व्यज्यमानेषु विभावशब्देन व्यपदिश्यन्ते । विभावयन्तीति व्युत्पत्तेः ।

१. बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः ।
अनेन यस्मात्तेनायं विभाव इति संज्ञितः ॥७·४
विभावोऽपि भाव इति भरतस्य मतम् । एवं ते विभावानुभावसंयुक्ता भावा इति ।

२. चित्तवृत्तिस्तु रतिः प्रेम, उत्साहस्योन्नत्यम्, हासस्य विकास इत्यादयः ।
यस्याश्चित्तवृत्तेर्यो विषयः स तस्यालम्बनम् । रसगंगाधरे प्रथमानने रसभेद-प्रकरणात् ।

धनञ्जयस्तु विभावो भावपोषकृदिति किञ्चिन्नवीनं तत्त्वं लक्षयति। तत्तु सत्यमेव। सोऽयं विभावो द्विविधः—आलम्बनविभावः, उद्दीपनविभावश्च। नायकादय आलम्बन-विभावाः, तेषां चेष्टादयो देशकालादयश्चोद्दीपन-विभावाः। यस्याश्चित्तवृत्तेर्यो विषयः, स तस्या आलम्बनम्। निमित्तानि चोद्दीपकानि।[1]

अनुभावः

अनुभावस्तु भरतानुसारेण—

अनुभाव्यतेऽनेन वागङ्गसत्त्वकृतोऽभिनय इति। अत्र श्लोकः

वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते।
शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः॥ ७.५

तत्र विभावानुभावौ लोकप्रसिद्धौ। भवति चात्र श्लोकः

लोकस्वभावसंसिद्धा लोकयात्रानुगामिनः।
अनुभावा विभावाश्च ज्ञेयास्त्वभिनये बुधैः॥७.६

धनञ्जयोऽनुभावं परिभाषते—

अनुभावो विकारस्तु भावसंसूचनात्मकः॥४.३

अर्थात् कश्चिदाश्रयः स्थायिभाव-प्रपन्नः संचारिभाव-प्रपन्नश्चेति ज्ञानं तस्य शारीरिकैर्विकारैर्भवति। ते विकारा अनुभावाः।

धनञ्जयो भरतमनुसृत्य संवदति—

हेतुकार्यात्मनोः सिद्धिस्तयोः संव्यवहारतः॥४.३

अर्थात् विभावो लौकिकभावं प्रति हेतुरनुभावश्च कार्यमेव।

एतदेव पण्डितराजेन स्पष्टीकृतम्—

यानि च कार्यतया तान्यनुभावशब्देन। अनु पश्चात् भाव उत्पत्तिर्येषाम्। अनुभावयन्तीति वा व्युत्पत्तेः।

विभावानुभावसंचारिणो मम्मटेन भूयः स्पष्टीकृता अधोलिखित-कारिकायाम्—

1. विश्वनाथः साहित्यदर्पणे आलम्बनोद्दीपनयोर्मूर्त्तिं स्पष्टयति—
आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात्। ३.२९
उद्दीपन-विभावास्ते रसमुद्दीपयन्ति ये।
आलम्बनस्य चेष्टाद्या देशकालादयस्तथा॥ ३.१३२

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥४.२७

सात्त्विकभावास्तु वस्तुतोऽनुभावा एव सन्ति, किन्तु तेषामुत्पत्तिः सत्त्वाद् भवति । अतएव विशिष्टा एव ते पृथग्गणिताः ।[१] सत्त्वमन्तःकरणं तत उत्पन्नत्वात् ते सात्त्विका भावाः । अपरेषु अनुभावेषु आङ्गिकविकारा दृश्यन्ते । सात्त्विक-भावेषु आङ्गिकविकाराः केवलमन्तःकरण-भावनं स्तम्भादिषूपलक्ष्यन्ते ।[२] अभिनवगुप्तानुसारेण 'इह चित्तवृत्तिरेव संवेदनभूमौ संक्रान्ता देहमपि व्याप्नोति' ।[३]

व्यभिचारिभावाः

भरतानुसारेण **विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः । वागङ्गसत्त्वोपेताः प्रयोगे रसान्नयन्तीति व्यभिचारिणः ।**[४]

दशरूपके तूपमाद्वारेण संचारि-स्थायिनोः सामञ्जस्यं प्रकटीकृतम् —

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ॥ ४.७

संचारिभावाः कारणवशादेवाविर्भवन्ति, स्थायिनश्च शाश्वतं मानसे वसन्ति ।

तत्र ३३ भावाः संचारिणः सन्ति । तेषां प्रत्येकशो विभावा अनुभावाश्च अधोविधक्रमेण निर्वचनीयाः :—

---

१. स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्य-वेपथू ।
अश्रु वैस्वर्यमित्यष्टौ स्तम्भोऽस्मिन्निष्क्रियाङ्गता ।
प्रलयो नष्टसंज्ञत्वं शेषाः सुव्यक्तलक्षणाः ॥४.५-६

२. भरत आह — किमन्ये भावाः सत्त्वेन विनाभिनीयन्ते । यस्मादुच्यन्ते—एते सात्त्विका इति । अत्रोच्यते—इह हि सत्त्वं नाम मनः प्रभवम् । तच्च समाहितमनस्त्वादुच्यते । मनसः समाधौ सत्त्वनिष्पत्तिर्भवति । इत्यादि । सप्तमाध्याये पृ० ३७५ गा० ओ० सी० ।

३. ना० शा० अध्यायः २२ पृष्ठं १५२ गा० ओ० सी०

४. काये विशेषेणाभितो रत्यादीनां सञ्चारणं व्यभिचारणम् ।

संचारिभावाः	विभावाः	अनुभावाः
निर्वेदः	दारिद्र्यम्, व्याधिः, अवमाननम्, अधिक्षेपः, आक्रोशः, ताडनम्, इष्टजनवियोगः, तत्त्वज्ञानम्, आपत्तिः, ईर्ष्या	रुदितम्, निःश्वसितम्, उच्छ्वसितम्, सम्प्रधारणम्, चिन्ता, अश्रु, वैवर्ण्यम्, दीनता, योगिन इव, ध्यानपरता
ग्लानिः	वमनम्, विरेचनम्, व्याधिः, तपः, नियमः, उपवासः, मनस्तापः, मदनम्, मद्यसेवनम्, व्यायामः, अध्वगमनम्, क्षुधा, पिपासा, अनिद्रा, जरा, आयासः	वाग्गो-नयन - कपोलादराणां क्षीणता, मन्दपदोत्क्षेपणम्, वेपनम्, अनुत्साहः, तनुगात्रम्, वैवर्ण्यम्, स्वरभेदः ।
शङ्का	चौर्यम्, अपराधः, पापम्, परकीयम् स्वदुर्नयः	मुहुर्मुहुरवलोकनम्, अवगुण्ठनम्, मुखशोषणम्-जिह्वा-परिलेहनम्, मुखवैवर्ण्यम्, स्वरभेदः, वेपथुः, शुष्कोष्ठः, शुष्ककण्ठः, अधोमुखी दृष्टिः, मुखकार्ष्ण्यम् ।
श्रमः	अध्वा, व्यायामः, सेवना नृत्तम्, रतिः, बहुतरशरीरव्यापारः	गात्रपरिमर्दनम्, संवाहनम्, निःश्वसितम्, विजृम्भितम्, मंदपदोत्क्षेपणम्, नयनवदनविकूणनम्, सीत्कारः, स्वेदः, निद्रा
धृतिः	शौर्यम्, विज्ञानम्, श्रुतिः, विभवः, शौचाचारः, गुरुभक्तिः, अधिकमनोरथः, अर्थलाभः, क्रीडा	उपभोगः, अव्यग्रता, चापलाद्युपशमः

जडता	इष्टानिष्ट श्रवणदर्शनम्, व्याधि:	मौनम्, अप्रतिभा, अनिमेषनिरीक्षणम्, परवशता
हर्ष:	मनोरथलाभ:, इष्टजनसमागम:, मन:परितोष:, गुरुराजभर्तृ-प्रसाद:, भोजनाच्छादनलाभोपभोगादय:, उत्सव:	नयन-वदनप्रसाद:, प्रियभाषणम्, आलिङ्गनम्, रोमाञ्च:, अश्रुस्वेदादय: गद्गदवाणी ।
दैन्यम्	दौर्गत्यम्, मनस्ताप: चिन्ता, औत्सुक्यम् दु:खम्, अपराध:	अधृति:, शिरोरोग:, गात्रगौरवम्, अन्यमनस्कता, स्वच्छता-परिहार:, कार्ष्ण्यम्, स्वापकर्षणभाषणम्
औग्र्यम्	चौर्यम्, अपराध:, असत्प्रलाप:	वध:, बन्धनम्, ताडनम्, निर्भर्त्सनम्, स्वेद:, शिर:कम्प:
चिन्ता	ऐश्वर्य-भ्रंश:, इष्टनाश:, दारिद्र्यम्, इष्टानाप्ति:	नि:श्वसितम्, उच्छ्वसितम्, सन्ताप:, ध्यानम्, अधोमुखचिन्तनम्, तनुकार्श्यम्, हृदय-वितर्क:, शून्यता
त्रास:	विद्युदुल्काशनिपात:, निर्घात:, मेघगर्जनम्, हिंस्र-पशु- गर्जनम्, महाभैरवनाद:, घोरसत्त्वदर्शनम्,	अङ्ग-संकोचनम्, कंपनम्, वेपथु:, स्तंभ:, रोमाञ्च:, गद्गदवाणी, इन्द्रियशैथिल्यम्, क्षोभ:
असूया	अपराध:, द्वेष:, परोत्कर्ष:, गर्व:, दौर्जन्यम्, मन्यु:[1]	परिषदि दोषप्रख्यापनम्, गुणोपघात:, ईर्ष्या, अधोमुखता, भ्रुकुटी, क्रियावज्ञानम्, कुत्सनम्, अवज्ञा, क्रोधेङ्गितम्,

१. अत्र मन्युर्विभावश्चानुभावश्चोभौ भवति ।

अमर्षः	अधिक्षेपः, अपमानः, अवज्ञा, अपराधः	स्वेदः, शिरःकम्पः, तर्जनम्, ताडनम्
गर्वः	ऐश्वर्यम्, कुलम्, रूपम्, यौवनम्, बलम्, धनम्, लाभः, विद्यावाप्तिः	असूया, अवज्ञा, आधर्षणम्, अनुत्तरदान-सम्भाषणम्, अङ्गावलोकनम्, विभ्रमः अपहसनम् वाक्पारुष्यम्, गुरु-व्यतिक्रमणम्, अधिक्षेपः, आत्मोत्कर्षज्ञानम्, परावहेलनम्
स्मृतिः	स्वास्थ्यम्, श्रुतिः समान-दर्शनम्, उदाहरणम्, अभ्यासः, चिन्ता	शिरःकम्पः, अवलोकनम्, भ्रूसमुन्नमनम्
मरणम्[1]	व्याधिः, अभिघातः	विषण्णगात्रता, व्यायताङ्गत्वम्, निमीलित-नयनम्, हिक्का, अबोधः
मदः	मद्योपयोगः	गायनम्, रोदनम्, हसनम्, परुषवचनम्, स्वपनम्, स्खलितम्, घूर्णितनयनम्, स्रस्तता, आकुलता, बाहुविक्षेपः, कुटिलगतिः, नष्टस्मृतिः, हृतगतिः, वमनम्, हिक्का, कफः, निष्ठीवनम्
सुप्तम्	निद्रा, अभिभवः, विषयोपगमनम्, मोहनम्, क्षिति-तलशयनम्, प्रसारणम्, अनुकर्षणम्	अक्षिनिमीलनम्, उच्छ्वसनम्, निःश्वासः, सर्वेन्द्रिय-सम्मोहनः, उत्स्वप्नायितम्

१. न चात्र प्राण-वियोगात्मकं मुख्यं मरणं ग्रहीतुम् । चित्तवृत्त्यात्मकेषु भावेषु तस्याप्रसक्तेः । भावेषु च सर्वेषु कार्यसहवर्तितया शरीरप्राणसंयोगस्य हेतुत्वात् । रसगंगाधरे प्रथमाननतः । धनञ्जयोऽन्यथा मन्यत इत्यधोवचनेन प्रमाण्यते— मरणं सुप्रसिद्धत्वादनर्थत्वाच्च नोच्यते । दश० ४.२१ इति चिन्त्यम् ।

निद्रा	दौर्बल्यम्, श्रमः, क्लमः, मदः, आलस्यम्, चिन्ता, अत्याहारः, रात्रौ जागरणम्.	वदनगौरवशरीरालोकनम्. नेत्रघूर्णनम्, गात्रविजृम्भणम्, मान्द्यम्, उच्छ्वसितम्, सन्नगात्रता, अक्षिनिमीलनम्, अङ्ग-भङ्गः, उत्स्वप्नादयः
विबोधः	आहार-परिणामः, निद्राच्छेदः, स्वप्नान्ते तीव्र-शब्द-स्पर्श-श्रवणादिः	जृम्भणम्, अक्षिपरिमर्दनम्, शयनोत्थानम् ।
व्रीडा	गुरुव्यतिक्रमणावज्ञाने, प्रतिज्ञातस्य अनिर्वहणम्, पश्चात्तापः, दुराचारः	निगूढवदनम्, अधोमुखचिन्तनम्, उर्वी-लेखनम्, वस्त्राङ्गुलीयकस्पर्शनम्, नखनिकृन्तनम् ।
अपस्मारः	देवादिभिर्ग्रहणम्, अनुस्मरणम्, शून्यागार-सेवनम्, व्याधिः	स्फुरितम्, निःश्वसितम्, उत्कम्पितम्, धावनम्, पतनम्, स्वेदः, स्तम्भः वदन-फेनमोक्षः, जिह्वा-परिलेहनम्
मोहः	दैवोपघातः, व्यसनम्, व्याधिः, आवेगः, पूर्व-वैरानुस्मरणम्, वियोगः, भीतिः, दुःखावेशः	निश्चैतन्यम्, भ्रमणम्, पतनम्, घूर्णनम्, अदर्शनम्
मतिः	नानाशास्त्र-विचिन्तनम्, ऊहापोहः	शिष्योपदेशः, अर्थविकल्पनम्, संशयच्छेदः ।
आलस्यम्	खेदः, व्याधिः, गर्भः, श्रमः, सौहित्यम् ।	सर्वकर्मविरतिः, शयनम्, आसनम्, निद्रा, तन्द्रा जृम्भा

आवेगः	उत्पातः, वातः, वर्षा, अग्निः, कुञ्जरोद्भ्रमणं, प्रियाप्रिय-श्रवणम्, व्यसनाभिघातः ।	अङ्गस्रस्तता, वैमनस्यम्, मुखवैवर्ण्यम्, विषादः, विस्मयः, अवकुण्ठनम्, अक्षि-परिमार्जनम्, वस्त्र-संग्रहणम्, त्वरितगमनम्, प्रधावनम्, छायाश्रय-मार्गणम्, धूमाकुलनेत्रता, अङ्गसंकोचनम्, विधूननम्, भय-स्तम्भः, वेपथुः, पश्चादवलोकनम्, अभ्युत्थानम्, आलिङ्गनम्, वस्त्राभरण-प्रदानम्, अश्रुः, रोमाञ्चः, भूमिपतनम्, विषम-विवर्तनम्, परिधावनम्, विलापः, आक्रन्दनम्, शस्त्रवर्म - चर्मधारणम्, गजतुरगरथा - रोहणम्, सम्प्रधारणम् ।
वितर्कः	सन्देह-विमर्श-विप्रतिपत्तयः	प्रश्न-सम्प्रधारणम्, मन्त्रः, संगूहनम्, अंगुलिनर्तनम् भ्रूनर्तनम्, शिरोनर्तनम्
अवहित्थम्	लज्जा-भयापजय- गौरव-जैह्म्यादीनि	अन्यथा-कथनम्, कथा-भङ्गः, कृतकधैर्यम्
व्याधिः	ज्वरादयो रोगाः, विरह	गात्रकम्पः, गात्रशैथिल्यम्, मुखविकूणनम्, निःश्वसनम्,
उन्मादः	सन्निपातः, ग्रहः, विप्रलम्भः, महापत्तिः, परमानन्दः	रुदितम् गीतम्, हासः, आसितम्, असम्बद्धोक्तिः
विषादः	कार्यासिद्धिः, राजगुर्वाद्यपराधः स्वापकर्षः, परोत्कर्षः ।	निःश्वासोच्छ्वास - हृत्ताप-सहायान्वेषणादीनि, जीवित-निर्याणाशंसा, वदननमनम् ।

औत्सुक्यम्	रम्येच्छारतिसम्भ्रमाः इष्टविरहादिः, प्रियसंस्मृति. ।	उच्छ्वास-निःश्वास-हृत्ताप - स्वेद - विभ्रमाः, त्वरा-चिन्तादयः, निद्रा, तन्द्रा, गात्रगौरवम्,
चापलम्	मात्सर्यम्, द्वेषः, रागः, अमर्षः ।	भर्त्सनम्, पारुष्यम् स्वच्छन्दाचरणादयः आत्मवधेच्छा ।

इमास्त्रयस्त्रिंशत् सचारिभावाः सन्ति । अन्येऽपि संचारिभावाः सन्ति स्थायिन एव, यदा त स्तोकं विभावैरुत्पन्नाः स्युः ।[1] एवं च वीररसे प्रधाने क्रोधो, रौद्रे चोत्साहः, शृङ्गारे च हासो व्यभिचारी भवति नान्तरीयकश्च ।

आभिः सहाष्टौ सात्त्विकभावान् संयोज्य भावानां संख्या एकोनपंचाशत् निर्णीयते ।

स्थायिभावः

भरतः स्थायिनां भावानां रसीभवनयोग्यतां प्रतिपादयन् तेषामुत्कृष्टतां प्रमाणयति । तद्यथा—यदि काव्यार्थसंश्रितैर्विभावानुभावैर्व्यञ्जितैरेकोनपञ्चाशद्भावैः सामान्यगुणयोगेनाभिनिष्पद्यन्ते रसास्तत्कथं स्थायिन एव भावा रसत्वमाप्नुवन्ति । उच्यते—यथा हि समानलक्षणास्तुल्यपाणिपादोदरशरीराः समानाङ्गप्रत्यङ्गा अपि पुरुषाः कुलशीलविद्याकर्मशिल्पविचक्षणत्वाद् राजत्वमाप्नुवन्ति, तत्रैव चान्येऽल्पबुद्धयस्तेषामनुचरा भवन्ति, तथा विभावानुभावव्यभिचारिणः स्थायिभावानुपाश्रिता भवन्ति । बह्वाश्रयत्वात् स्वामिभूताः स्थायिनो भावाः । तद्वत् स्थानीयपुरुषगुणभूताः अन्ये भावास्तान् गुणतयाश्रयन्ते । स्थायिभावा रसत्वमाप्नुवन्ति परिजनभूतव्यभिचारिणो भावाः । अत्राह—को दृष्टान्त इति । यथा नरेन्द्रो बहुजनपरिवारोऽपि स एव नाम लभते, नान्यः सुमहानपि पुरुषः "तथा विभावानुभावव्यभिचारिपरिवृतः" स्थायीभावो रसनाम लभते ।

१. रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः ।
स्तोकं विभावैरुत्पन्नास्त एव व्यभिचारिणः ॥
रसगंगाधरस्य प्रथमानने संगीतरत्नाकरादुद्धृतम् ।

भवति चात्र श्लोकः—

यथा नराणां नृपतिः शिष्याणां च यथा गुरुः ।
एवं हि सर्वभावानां भावः स्थायी महानिह ॥ ना० शा० ७.८

भरतस्येदमेव वचनं धनञ्जयो दशरूपके समर्थयति—

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥ ४.३४

इयं कारिका पूर्वोक्तामधोलिखितां कारिकामनुसरति—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः ॥ ४.१

भरतमनुसृत्य धनञ्जयो नाट्ये केवलमष्ट स्थायिनस्तेषां रसांश्च विवृणोति ।

रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः ।
शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य ॥ ४.३५

भरतोऽपि नाट्ये केवलमष्टरसानामेव पुष्टिं मन्यते[1] इति स्थायी भावो निर्वेदो न सम्मतस्तस्य । तत्र किं कारणम् ।

धनञ्जयो ब्रूते—

निर्वेदादिरताद्रूप्यादस्थायी स्वदते कथम् ।
वैरस्यायैव तत्पोषस्तेनाष्टौ स्थायिनो मताः ॥ दश० ४.३६

अर्थात् निर्वेदो विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते, अन्यान् भावानात्मभावं न नयति । अतएव स स्थायी भावो नास्ति । फलतः शान्तो रसो न भवतीति ।

शान्तो रसोऽस्ति नास्ति वेति प्रश्नो भरतस्य नाट्यशास्त्रादेव समुदेति । तेन स्पष्टमेव प्रोक्तम्—

शृंगारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ ना० शा० ६.१५

एषा कारिका धनञ्जयेन समर्थिता । तद्यथा

शृंगार-वीरबीभत्सरौद्रेषु मनसः क्रमात् ।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि ॥
अतस्तज्जन्यता तेषामत एवावधारणम् ॥

भरतानुसारेण नाट्येऽष्टौ रसाः सन्ति, किन्तु काव्ये नव रसाः शान्तरसं संयोज्य भवेयुर्नवेत्यस्मिन् विषये तेन किमपि न प्रोक्तम्।

भरतानन्तरं भूरिश आचार्याः शान्तं रसं प्रतिपादयन्ति। तत्र प्रथमस्तावदानन्दवर्धनाचार्येण निर्दिष्टम्—

महाभारतेऽपि मोक्षलक्षणः पुरुषार्थः शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचितः।[१]

अपरतो भट्टनायको निर्णयति—

विश्वमिदममस्थनामरूपप्रपञ्चात्मकमथ च श्रवणमननादिविशेन परमपुमर्थप्रापकमिति लोकोत्तर-परमपुरुषार्थसूचनेन शान्तरसोपक्षेपोऽयं भविष्यति।[२]

तदनन्तरमभिनवगुप्तो विशदयति—

तेन प्रथमं रसाः। ते च नव। शान्तापलापिनस्त्वष्टाविति तत्र पठन्ति। ...ततस्त्रिवर्गात्मकप्रवृत्ति-धर्मविपरीतनिवृत्तिधर्मात्मको मोक्षफलः शान्तः। तत्र स्वात्मावेशेन रसचर्वणेत्युक्तम्।[३]

अन्यत्रापि स शान्तं रसं नाट्येऽङ्गाङ्गिभूतं निर्णयति।

एतेषु प्रयोगेषु शान्तबीभत्सरसौ तु चरमपुमर्थ-योगात्तत्र च सर्वस्य नाधिकारोऽपि तु कस्यचिदपश्चिमजन्मनोऽधिकारान्नाटके यद्यपि तत्फलप्रधानतया प्राधान्यमवलम्बेयातां, तथापि नासौ प्रचुरप्रयोग इति तयोः पुरुषार्थ-प्रवरप्राणितयोरपि वीरादिरसान्तराध्यावापेनावस्थापनम्।[४] शान्तस्तु प्रधानत्वेन न प्रयोगार्ह इत्युक्तप्रायः।[५] अनेन शान्तरसस्य नाट्येऽङ्गत्वं स्वीकृतम्।

यद्यपि धनञ्जयो न मन्यते शमस्य स्थायिभावत्वं,[६] किन्तु तस्य

---

१. ध्वन्यालोके ४.५ अधिकृत्य विवृतिः।

२. ना० शा० १.१ अधिकृत्य भारत्यामुद्धृतम्।

३. ना० शा० ६.१६ अधिकृत्य भारती।

४. ना० शा० अष्टादशाध्याये पृ० ४५१ गा० ओ० सी०

५. ना० शा० २२ अध्याये अभिनवभारती पृष्ठ ५३ गा० ओ० सी०। ना० शा० द्वादशाध्याये अभिनव-भारती पृष्ठं १४८ अग्रे च अथ शान्तरसे गतिर्वक्तव्या। स च प्राधान्येन तथा प्रयोगसौन्दर्यमावहति। अतोऽन्तःसंस्काररूपता येषां वणिक् प्रभृतीनामस्ति "वीर-प्रशान्ता वणिजः" इति वचनात् यतिप्रभृतयोऽपि च शान्तरस-प्रधानाः।

६. मम्मटः काव्यप्रकाशेऽष्टौ नाट्ये रसाः स्मृताः ४.२९ इति प्रमाणयति।

समकालिको धनिकस्तस्य दशरूपकस्यावलोककार एव शान्तं रसं शमं च प्रमाणयत्येवाधोलिखितवचनेन --

ननु शान्तरसस्यानभिनेयत्वाद्यद्यपि नाट्येऽनुप्रवेशो नास्ति, तथापि सूक्ष्मातीतादिवस्तूनां सर्वेषामपि शब्दप्रतिपाद्यतया विद्यमानत्वात् काव्यविषयत्वं न निवार्यते ।

शान्तरसविषयका सर्वेऽपलापाः पण्डितराजेन सम्यक् समाहिताः । तद्यथा,

केचित् —

शान्तस्य शमसाध्यत्वान्नटे च तदसम्भवात् ।
अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते ॥

इत्याहुः ।

तच्चापरे न क्षमन्ते । तथा हि—नटे शमाभावादिति हेतुरसंगतः । नटे रसाभिव्यक्तेरस्वीकारात् । सामाजिकानां शमवत्त्वेन तत्र रसोद्बोधे बाधकाभावात् । न च नटस्य शमाभावात्तदभिनय-प्रकाशकत्वानुपपत्तिरिति वाच्यम् । तस्य भयक्रोधादेरप्यभावेन तदभिनयप्रकाशकताया अप्यसंगतत्वापत्तेः । यदि च नटस्य क्रोधादेरभावेन वास्तवतत्कार्याणां वधबन्धादीनामुत्पत्त्यसम्भवेऽपि कृत्रिमतत्कार्याणां शिक्षाभ्यासादिना उत्पत्तौ नास्ति बाधकमिति निरीक्ष्यते, तदा प्रकृतेऽपि तुल्यम् ।

अथ नाट्ये गीतवाद्यादीनां विरोधिनां सत्त्वात् सामाजिकेष्वपि विषयवैमुख्यात्मनः शान्तस्य कथमुद्रेक इति चेत्, नाट्ये शान्तरसमभ्युपगच्छद्भिः फलबलात् तद्गीतवाद्यादेस्तस्मिन् विरोधिताया अकल्पनात् । विषयचिन्तासामान्यस्य तत्र विरोधित्वस्वीकारे तदीयालम्बनस्य संसारानित्यत्वस्य तदुद्दीपनस्य पुराणश्रवणसत्सङ्गपुण्यवनतीर्थावलोकनादेरपि विषयत्वेन विरोधित्वापत्तेः । अत एव चरमाध्याये संगीत-रत्नाकरे

अष्टावेव रसा नाट्येष्विति केचिदचूचुदन् ।
तदचारु यतः कंचिन्न रसं स्वदते नटः ॥

इत्यादिना नाट्येऽपि शान्तो रसोऽस्तीति व्यवस्थापितम् । यैरपि नाट्ये शान्तो रसो नास्तीत्यभ्युपगम्यते तैरपि बाधकाभावान्महाभारतादिप्रबन्धानां शान्तरस-प्रधानतया अखिललोकानुभवसिद्धत्वाच्च काव्ये सोऽवश्यं स्वीकार्यः । अत एव 'अष्टौ नाट्ये रसाः स्मृताः' इत्युपक्रम्य 'शान्तोऽपि नवमो रसः' इति मम्मट-भट्टा अप्युपसमहार्षुः ।[1]

1. रसगंगाधरे प्रथमानने रसलक्षणम् ।

रस-निष्पत्तिः

लोके कस्यचित् पुरुषस्यालम्बनविभावोद्दीपनविभावयोर्दर्शनेन तस्य कोऽपि स्थायी भावः स्वभावत एवोद्बुद्धो भवति चर्व्यते च। तदनु तस्यानुभाव-संचारिणोर्भावना स्यात्। एवमेव काव्यकलादिषु आलम्बनोद्दीपनानुभाव-संचारिणां संज्ञानेन सहृदयस्य सुमनसः स्वभावत एव कश्चित् स्थायी भावः समुदेति आस्वाद्यते च। अयमेव स्थायिभावास्वादो रसनम्। अस्यां स्थिता-वास्वाद्यमानः स्थायिभाव एव रसो भवति। इयं प्रक्रिया रसनिष्पत्तिः। भरतानुसारेणापि विभावानुभावव्यभिचारि-परिवृतः स्थायी भावो रसनाम लभते।[१] नाना भावोपगता स्थायिनो भावा रसत्वमाप्नुवन्ति।[२] शृङ्गारप्रकाशे भोजोऽपीममभिप्रायं विशदयति।[३]

अभिनवगुप्तानुसारेण आश्रये रत्यादयः स्थायिभावा उद्बुध्यन्ते। सामाजिका हृदय-संवाद-प्रक्रिययाश्रयेण तन्मयीभूताः तस्यैव रत्यादीना-स्वादयन्ते।[४]

स्वत एव स्वाभाविकतया रसो जायते स्थायिनो विभावानुभाव-संचारिणां योगेनेति भरतस्य मतं परिनिष्ठितम् यथोपरिष्टात् निर्दिष्टं. भरतस्य पूर्वोक्तं रससूत्रं स्पष्टमेव। तथापि प्रमाण-मीमांसाप्रपञ्चधर्मिणो व्याख्याकारा आचार्याश्चास्मिन् विषये प्रचुरं चर्चितवन्तः। आनन्दवर्धनादयोऽस्मिन् विषये बहु व्याख्यातवन्तः।[५]

पण्डितराजेन कतिपयाचार्याणां भारतीय-रससूत्रस्य व्याख्या संक्षेपेण समुद्धृता। तद्यथा

विभावानुभावव्यभिचारिभिः संयोगाद् व्यञ्जनाद् रसस्य चिदानन्द-विशिष्टस्थाय्यात्मनः स्थाय्युपहित चिदानन्दात्मनो वा निष्पत्तिः स्वरूपेण प्रकाशनमित्याद्ये। अभिनवगुप्तस्य मतम्।

विभावानुभाव-व्यभिचारिणां सम्यक् साधारणात्मतया योगाद् भावकत्व-

---

१. नाट्यशास्त्रे सप्तमाध्याये पृष्ठं ३४६ गा० ओ० सी०

२. तत्रैव पृष्ठं २८८ षष्ठाध्याये।

३. एकादश-प्रकाशे पृष्ठं ४४४ अग्रे च।

४. हृदय-संवाद एवास्वादः। ना० शा० षष्ठाध्यायेऽभिनवभारती पृष्ठं ३२३ गा० ओ० सी०।

५. व्यंग्य-व्यंजकभावेऽस्मिन् विविधे सम्भवत्यपि।
रसादिमय एकस्मिन् कविः स्यादवधानवान्॥ ध्वन्यालोकः ४.५

व्यापारेण भावनाद् रसस्य स्थाय्युपहितसत्त्वोद्रेकप्रकाशितस्वात्मानन्द-रूपस्य निर्वृत्तिर्भोगाख्येन साक्षात्कारेण विषयीकृतः । इति द्वितीये । भट्टनायकमतम् ।

विभावानुभावव्यभिचारिणां संयोगाद् भावनाविशेषरूपाद्दोषाद् रसस्यानिर्वचनीयदुष्यन्तरत्याद्यात्मनो निष्पत्तिरुत्पत्तिः इति तृतीये ।

विभावादीनां संयोगाद् ज्ञानाद् रसस्य ज्ञानविशेषात्मनो निष्पत्ति-रुत्पत्तिः इति चतुर्थे ।

विभावादीनां सम्बन्धाद् रसस्य रत्यादेर्निष्पत्तिरारोपः' इति पञ्चमे । भट्टलोल्लटस्य मतम् ।

विभावादिभिः कृत्रिमैरप्यकृत्रिमतया गृहीतैः संयोगादनुमानाद् रसस्य रत्यादेर्निष्पत्तिरनुमितिर्नटादौ पक्ष इति शेषः' इति षष्ठे । शङ्कुकस्य मतम् ।

विभावादीनां त्रयाणां संयोगात् समुदयाद् रसनिष्पत्तौ रसपदव्यवहारः' इति सप्तमे ।

विभावादिषु सम्यग्योगाच्चमत्कारात्' इत्यष्टमे ।

अपरनस्तावद् धनञ्जयस्य रसनिष्पत्ति-व्याख्या वर्तते—

> वाच्या प्रकरणादिभ्यः बुद्धिस्था वा यथा क्रिया ।
> वाक्यार्थः कारकैर्युक्ता स्थायी भावस्तथेतरैः ।। दश० ४.३७

अत्र वाक्यार्थः स्थायी भावः । स एव रसः ।

परतो धनञ्जयेन साधु प्रतिपादितम्—

> धीरोदात्ताद्यवस्थानां रामादिः प्रतिपादकः ।
> विभावयति रत्यादीन् स्वदन्ते रसिकस्य ते ।। ४.४०

त एव च परित्यक्तविशेषा रसहेतवः ।।

> क्रीडतां मृण्मयैर्यद्वद्बालानां द्विरदादिभिः ।
> स्वोत्साहः स्वदते तद्वच्छ्रोतृणामर्जुनादिभिः ।। दश० ४.४२

पण्डितराजेन साधु निर्णीतम्—नाना जातीयाभिः शेमुषीभिर्नानारूप-तयावसितोऽपि मनीषिभिः परमाह्लादाविनाभावितया प्रतीयमानः प्रपञ्चेऽस्मिन् रसो रमणीयतामावहतीति निर्विवादम् ।

रसस्यास्वादकाः

धनञ्जयानुसारेण नर्तकोऽपि रसमास्वदते ।[1] नैतत् समीचीनं प्रति-भाति । अभिनवगुप्तः पात्रं रसं नास्वदत इति प्रमाणीकरोति । तद्यथा—अतएव च नटे न रसः । विस्मृतिशीलो न बोध्यते । उक्तं हि—देशकालप्रमातृ-

१. काव्यार्थ-भावनास्वादो नर्तकस्य न वार्यते । दश० ४.४२

भेदान्नियन्त्रितो रस इति। केयमाशङ्का। नटे तर्हि किम् ? आस्वादनोपायः। अत एव च पात्रमित्युच्यते। न हि पात्रे मद्यास्वादः। अपितु तदुपायकः। तेन प्रमुखपात्रे नटोपयोगः।[1] अभिनवगुप्तानुसारेणास्वादस्तु हृदय-संवाद एव। सुमनसः सामाजिका एव तन्मयीभूताः स्थायिभावानास्वादयन्ति।[2] अतएव नापि सर्वे सामाजिकाः सर्वेषां रसानामास्वादकाः। तथा हि—क्रोधे च हृदय-संवादस्तामसप्रकृतीनामेव सामाजिकानामिति दानवादिसदृशास्तन्मयीभूता एवान्यायकारि विषयं क्रोधमास्वादयन्तीति।

रसाद् रस-जन्यता

धनञ्जयानुसारेण विकासादिचित्तभूमीनां साम्यत्वाद् बीभत्साद् भयं, रौद्राच्च करुणं, शृङ्गाराद् हास्यं, वीरादद्भुतं च जायन्ते। चतुर्युग्मस्य क्रमशः क्षोभात्, विक्षेपात्, विकासात्, विस्ताराच्चोत्पत्तिः स्यात्।

तदेतद् भरतानुसारेणैव प्रोक्तम्।[3]

तत्रैष क्रमो रसानां तेषां स्थायिनामाश्रयाणां तत्सम्बन्धिनां चित्तवृत्ति-विशेषाणां च—

रसः	स्थायीभावः	आश्रयः	चित्तवृत्तिविशेषः
शृंगारः	रतिः	उत्तमयुवप्रकृतिः	प्रेम
वीरः[4]	उत्साहः	उत्तमप्रकृतिः धीरोदात्त एव	औन्नत्यम्
हास्यः	हासः	उत्तममध्यमाधमाः	विकासः
रौद्र	क्रोधः	रक्षोदानवोद्धतमनुष्याः	प्रज्वलनम्
करुणः	शोकः	उत्तममध्यमाधमाः	वैक्लव्यम्
शान्तः	निर्वेदः	उत्तमप्रकृतिः	विषय-विरागः
अद्भुतः	विस्मयः	उत्तममध्यमनीचाः	आश्चर्यम्
भयानकः	भयम्	स्त्री-नीच-बालादिः	वैक्लव्यम्
बीभत्सः	जुगुप्सा	उत्तम-मध्यम-नीचाः	विचिकित्सा

१. ना० शा० ६.३३ अधिकृत्य भारती।

२. ना० शा० ६.६४ अधिकृत्य भारती।

३. नैतत्सर्वथा सार्वत्रिकं भोजेन सम्यक् प्रदर्शितम्। तद्यथा शृङ्गारादन्यतोऽपि हास्य उत्पाद्यमानो दृश्यते। शृङ्गारादपि न दृश्यते। रौद्रादन्यतोऽपि करुणो दृश्यते। रौद्रादपि न दृश्यते। इत्येते विषयाः शृङ्गारप्रकाशस्यैकादशे प्रकाशे पृष्ठं ४४३ प्रपञ्चिताः।

४. यदीयं तु चरितमुपदेशार्हं तेषामुचित एवावसर उत्साहाभिव्यक्तिः। ना० शा० ६.६६ अधिकृत्य भारती।

रसतत्त्वानां सामञ्जस्यम्

रसनिष्पादक-तत्त्वानां क्रमशः साहचर्यं यथोदिशा प्रवर्तनीयम् –

रसः	आलम्बनः	उद्दीपनः	अनुभावः	सञ्चारिभावः
शृङ्गारः	स्त्री-पुंसौ परस्परम्, उत्तमयुव-प्रकृतिः	ऋतुः, माल्यम्, अनुलेपनम्, अलङ्कारः, इष्टजन-विषयः, वरभवनोपभोगः, उपवनगमनम्, अनुभवन-श्रवण-दर्शन-क्रीडालीला-दिः, रहःस्थानम्, नायकगुणाः	नयनचातुर्यम्, भ्रूक्षेपः, कटाक्षः, संचारः, ललित-मधुराङ्गहार-वाक्यादिः, अष्टौ सात्त्विक-भावाः, गुण-श्रवणम्, कीर्तनम्, निःश्वासः, चाञ्चल्यम्	आलस्यौग्र्य-जुगुप्सा-वर्ज्याः सर्वे संचारि-भावाः
वीरः	विजेतव्यः याचमानः दयापात्रम् धर्म-विषयः	रणदर्शनम्, असम्मोहः, अध्यवसायः, नयः, विनयः, बलम्, पराक्रमः, शक्तिः, प्रतापः, प्रभावः, आक्षेपवचनम्, स्तुतिः, याचककर्तृक-मन्दनिरीक्षणम् शरणार्थिनो व्याकुलीभवनम्	शत्रोरवज्ञा स्थैर्यम्, धैर्यम् शौर्यम्, त्यागः वैशारद्यम्, उत्साहनम्, दानम् रोमाञ्चः, सर्वस्व-समर्पणम्	धृतिः, मतिः, गर्वः, आवेगः, अमर्षः, स्मृतिः प्रहर्षः
रौद्रः	अपराधी, रक्षोदानवोद्धतमनुष्याः	अपराधः, क्रोधाधर्षणम्, अधिक्षेपः, अनृतवचनम्, उपघातः,	परुषोक्तिः, नेत्रारुण्यम्, दन्तपीडनम्, शस्त्रग्रहणम्, ताडन-पीडन-	गर्वः औग्र्यम्, अमर्षः, आवेगः, चापलम्, असम्मोहः, उत्साहः

		वाक्पारुष्यम्, अभिद्रोहः, मात्सर्यम् सम्प्रहार – रुधिरा-कर्षणादिः रोमाञ्चः, स्वेदः वेपथुः अधरदंशः, क्षोभः, भ्रुकुटिः आस्यरागः विकत्थनम् अंस-धरणीघातः प्रतिज्ञा	च्छेदन-भेदन- प्रहरणाहरण- शस्त्र-सम्पाताः	मदः, स्मृतिः, असूया
हास्यः	विदूषकः, दम्भी कपटी, धर्मध्वजी, वेडालव्रतः, छद्म-तापसः, व्यंगः, विकृताकारः, परचेष्टा- नुकारी अज्ञः	विकृतवेषा- लकाराः धाष्टर्यम्, लौल्यम्, कुहकम्, असत्प्रलापः, व्यंगता	ओष्ठ-नासा- कपोल- स्पन्दनम् दृष्टि- व्याकोशा- कुंचने, स्वेदः आस्यरागः, पार्श्वग्रहणादिः रदन-प्रकाशः, शिरःकम्पः, मधुरस्वरम्, साश्रु नयनम् विक्षिप्ताङ्गम्	अवहित्था, आलस्यम् तन्द्रा, निद्रा, स्वप्नः, प्रबोध असूया, श्रम ग्लानिः मूर्च्छा
शान्तः	अनित्यत्वेन ज्ञातं जगत्, परमा- त्मस्वरूपम् सर्वोपि प्रपञ्चः, विषयगणः	वेदान्त श्रवणम्, तपोवन- तापस- दर्शनादिः, तीर्थ- रम्यवनं-महा- पुरुष-संगमः	विषयारुचिः, शत्रु- मित्राद्यौदा- सीन्यम्, चेष्टाहानिः, नासाग्रदृष्टिः रोमाञ्चः साम्यम् नयननिमीलनम्	हर्षोन्मादः, स्मृतिः, मतिः, निर्वेदः, धृतिः

करुण:	बन्धुनाश:, विभव-नाश:, वध:, बन्ध:, विप्रिय-वचन-श्रवणम्, दु:ख-रोग-दारिद्र्यापहतय:	तत्सम्बन्धि-गृहतुरगाभरण-दर्शनादय:, तत्कथाश्रवणादय:	गात्रक्षेपा-श्रुपातादय:, परिदेवनम्, मुखशोषणम्, वैवर्ण्यम्, स्रस्तगात्रता, नि:श्वास-स्मृति लोपादि, स्तम्भ:, वेपथु:, वैवर्ण्यम् ।	ग्लानि:, क्षय:, मोह:, विषाद:, चिन्ता, औत्सुक्यम्, दीनता, जडता, निर्वेद:, आवेग:, श्रम:, शंका, भयम्, व्याधि:, त्रास:, अपस्मार:, उन्माद:, आलस्यम्, मरणम् ।
भयानक:	भयकारका: सत्त्वा:, महारण्य प्रविष्टा लोका:, महासंग्राम-चारिण:, गुरुनृपापराधिन:	विकृतरव-सत्त्वदर्शनम्, शिवोलूकत्रास: शून्यागारारण्य-गमनम्, स्वजन-वध-बन्ध-दर्शन श्रुतिकथादि: गुरुनृपयोरपराध	प्रवेपितकर-चरण-नयनानि चपल पुलक-मुखवैवर्ण्य-स्वरभेदादि: हृदयप्रकम्प:, शुष्कोष्ठतालु-कण्ठा:, अश्रुपात:	चिन्ता, शंका, मोह:, दैन्यम् आवेग:, चापलम्, जडता, त्रास:, अपस्मार:, मरणादि
अद्भुत:	वाक्यं, शिल्पं च कर्मरूपं वा अलौकिक वस्तु, दिव्यजन दर्शनम्, ईप्सितमनो-	अलौकिकवस्तु-महिमा	नयन-विस्तार अनिमेष-प्रेक्षणम्, रोमाञ्च:,	आवेग:, संभ्रम:, जडता,

	रथावाप्तिः, उपवन-देवकुलादि दर्शनम्, सभाविमान मायेन्द्रजाल सम्भा-वनादिः, विचित्रा कृति वेषः, विचित्राचार-विभ्रमः, माया लीलाविलासी		अश्रुपात., हर्षः, साधुवादः, हाहाकार,: बाहु-वदन चेला-ङ्गुलिभ्रमणम् स्तम्भः, गद्गदः	त्रासः, प्रलयः
बीभत्सः	शवः, दुर्गन्धः, मांस रुधिर मेदांसि, निन्दिताकृति-वेषाः निन्द्या-चारः, रोगिणः पिशाचादयः	आन्त्र विदारणम्, अहृद्याप्रियाचोष्या निष्टश्रवण-दर्शन कीर्तनादिः	रोमाञ्चः सर्वाङ्गसंहारः, मुखविकूणनम्, निष्ठीवनम्, उत्तेजनादिः नासा प्रच्छादनम् मुखावनमनम्, अव्यक्तपाद पतनम्	अपस्मारः, उद्वेगः, आवेगः, मोह व्याधिः, मरणादयः

शृङ्गारस्य भेदाः

भरतानुसारेण शृङ्गारो द्विविधो भवति—सम्भोगो विप्रलम्भश्च। उत्तरकालिका आचार्या नैतेन परितुष्टा अयोगं शृङ्गारं तत्र योजयन्ति। स च धनञ्जयानुसारेण—

> तत्रायोगोऽनुरागोऽपि नवयोरेकचित्तयोः।
> पारतन्त्र्येण दैवाद्वा वि.कर्षादसंगमः॥ ४.५१

तत्र गौरी शिवयोरसमागम उदाहरणम्।

अन्ये केचिदयोगो विप्रलम्भस्यैव भेद इत्यामनन्ति। वस्तुतोऽयोगो विप्रलम्भाद् भिन्न एव, यतो हि नाम विप्रलम्भस्तु वियोग एव प्रथमं योगो भवति, पश्चाद् वियोगः स्यात्। नायिकाया लाभात् पश्चादेव विप्रलम्भोऽव-धारणीयः।[1]

१. प्राप्तयोरप्राप्तिर्विप्रयोगः (विप्रलम्भः)। इति धनिकः दश० ३.५६ अधिकृत भारती।

धनञ्जयोऽप्योमस्य दशावस्थाः कल्पते—अभिलाषः, चिन्तनम्, स्मृतिः, गुणकथा, उद्वेगः प्रलापः, उन्मादः, संज्वरः, जड़ता, मरणञ्चेति ।

मम्मटादयः शृङ्गारस्य द्वौ भेदौ—सम्भोगो विप्रलम्भश्चेति मन्यन्ते । तेऽपि तयोर्बहूभेदान् कल्पन्ते । मम्मटानुसारेण तत्राद्यः परस्परावलोकनालिंगना-धरपानपरिचुम्बनाद्यानन्तभेदत्वादपरिच्छेद्य इत्येक एव गण्यते । अपरस्तु अभिलाष विरहेर्ष्या-प्रवास-शापहेतुक इति पञ्चविधः । पण्डितराजो रसगङ्गाधरे स्पष्टयति—ते च प्रवासाभिलाषविरहेर्ष्या शापानां विशेषानुपलम्भान्नास्माभिः प्रपञ्चिताः ।[1]

विप्रलम्भे सति नायिकाया पुनः प्रीत्यर्थं सामादयः षडुपाया प्रयुज्यन्ते ।[2]

वीर-रौद्रयोर्वैशिष्ट्यम्

वीरस्तावत् भरतेनैकविधो युद्धवीर एव[3], धनञ्जयेन त्रिविधो दयावीरः, युद्धवीरः, दानवीरश्च, पण्डितराजेन प्राचां मतेन चतुर्विधो दानवीरः, दयावीरः, युद्धवीरः धर्मवीरश्च संकलितः[4] ।

वीर-रौद्रयोः किञ्चित् साम्यं दृश्यत एव । तत्तु केवलं युद्धवीरं समाश्रित्यैव विकल्पनीयम् । युद्धवीरस्य रौद्रस्य चालम्बन-विभावोऽरि, उद्दीपन-विभाव आक्षेपकृत-वाक्यम्, सञ्चारिभावश्च-अमर्षः, आवेगः, औग्र्यं च कथंचित् समाना स्युः । तथापि आश्रयस्य वैभिन्न्यात्तयोर्द्वयोर्वैभिन्न्यं तु प्रतीतमेव । वीरस्याश्रय उत्तमप्रकृतिर्भवति, रौद्रस्य च रक्षोदानवोद्धत-मनुष्या एवाश्रया भवन्ति ।[5] आश्रयस्यानुभावं समाश्रित्य वीररौद्रयोरन्तरमभिनवगुप्तेन प्रदर्शितम् —रौद्रे ऽस्य प्राधान्यं नानाप्रहरणेन दर्शयति, शिरःकर्तनादि मृतशरीरस्यापि क्रोधातिशयं सूचयन् वीराद् भेदमाह । युद्धवीरेऽपि हि तन्नास्ति ।[6]

१ प्रथमानने रसभेदः ।

२. साम-भेद-दान-नत्युपेक्षा-रसान्तराणीति षडुपायाः सन्ति ।

३. भरतस्त्यागोऽपि वीररसानुभाव इति वर्णयति । तेन त्यागवीरोऽपि कल्पित इति सम्भाव्यते । अन्यत्र दानवीरं धर्मवीरं युद्धवीरमथैव च इति ६.७९ कारिकायां नाट्यशास्त्रे त्रिविधोवीरः सम्मतः ।

४. पण्डितराजानुसारेण वस्तुतस्तु वीररसस्य बहवो भेदाः-सत्यवीरः, पाण्डित्यवीरः, क्षमावीरः, बलवीरश्च सन्ति ।

५. अथ वीरो नामोत्तम-प्रकृतिरुत्साहात्मकः । ना० शा० षष्ठाध्याये पृष्ठं ३२४ गा० ओ० सी० । एतदधिकृत्याभिनवगुप्तो व्याख्याति—उत्तमवर्णानां हि सर्वतो-त्साह आस्वाद्यो भवति । यदीयं तु चरितमुपतेशार्हं, तेषामुचित एवावसरे ।

६. ना० शा० ६.६५ अधिकृत्य भारती ।

अत्र प्रश्नः समुदेति—किं नाम वेणीसंहारे वीरो रसः, उताहो रौद्रो रसः ? धीरोद्धतौ तत्र भीमदुर्योधनौ, आश्रयः, अनुभावाश्च भीमस्य दुःशासन-रक्तपानं, दुर्योधन-रुधिरेण चाङ्गानां निषेकः। न च तत्र वीरोचिता विभावानुभावसंचारिण उत्साहं परिपोषयन्ति। अतएव वेणीसंहारे रौद्र एव कल्पनीयो न वीरः।[1]

शृङ्गार एव रसः

शृङ्गारप्रकाशे भोजस्य तावदभिनवपथो रस-विषये प्रवर्तते। तदनुसारेण—

नवाष्टौ स्थायिनोऽष्टौ सात्त्विकाः, त्रयस्त्रिंशद् व्यभिचारिण इति ब्रुवते। न तत् साधु। यतोऽमीषामन्यतमस्यैतेनैव परस्परं निर्वर्त्यमानत्वात्। कश्चित् कदाचित् स्थायी कदाचित् व्यभिचारी। अतोऽवस्थावशात् सर्वेऽप्यमी व्यभिचारिणः, सर्वेऽपि च स्थायिनः, सात्त्विका अपि सर्व एव, मनः प्रभवत्वात्। अनुपहतं हि मनस्सत्त्वमित्युच्यते। शृङ्गार एवैको रसः।[3] न हि बहवो रसाः। अपि त्वेक एव शृङ्गारो रस इति।[2]

छन्दोरस-सामञ्जस्यम्

भोजस्तु रसानुरूपं छन्दोविनियोगं प्रस्तावयति। तद्यथा— शृङ्गारे द्रुतविलम्बितादयो, वीरे वसन्तादयः, करुणे वैतालीयादयः, रौद्रे स्रग्धरादयः, सर्वत्र शार्दूलविक्रीडितादयो निबन्धनीयाः।[4]

रसभङ्गः

रूपकेषु रसभङ्गो न स्यादित्येतस्य प्रकरणस्य परं प्रयोजनम्। आनन्दवर्धनेन रससौष्ठवार्थमौचित्यं समीहितमेवेति निर्दिष्टम्। तद्यथा-

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा॥

ध्वन्यालोके ३.१४ अधिकृत्य

---

१. सामान्यतः प्राचामाधुनिकानां चेदमेव सम्मतं यत् वेणीसंहारे वीरो विलसति। तच्चिन्त्यमेव। मया विपर्ययोऽयं स्वकीये नाटकेतिहासे वेणीसंहार-प्रकरणे स्पष्टीकृतः।

२. शृङ्गारप्रकाशे पृष्ठ ४३० भाग २ मैसूर प्रकाशनम् १९६३।

३. तत्रैव पृष्ठं ४४२

४. शृङ्गारप्रकाश एकादश-प्रकाशे पृष्ठं ४७२।

अत एव च भरते प्रख्यातवस्तु-विषयत्वं प्रख्यातो दात्तनायकत्वं च नाटकस्यावश्यकर्तव्यतयोपन्यस्तम् । तेन हि नायकौचित्यानौचित्यविषये कविर्न व्यामुह्यति । यस्तूत्पाद्यवस्तु-नाटकादि कुर्यात्, तस्याप्रसिद्धानुचितनायक-स्वभाव-वर्णने महान् प्रमादः ।

आनन्दवर्धनेन तत्र सिद्धान्तितम्—

(१) अधमप्रकृत्यौचित्येनोत्तमप्रकृतेः शृंगारोपनिबन्धने उपहास्यता स्यात् ।

(२) राजादिषु ग्राम्यशृंगारोपनिबन्धनं न कुर्यात् । सम्भोग-शृंगारस्याभिनयः परिहरणीयः । अभिनेयार्थेऽनभिनेयार्थे वा काव्ये यदुत्तमप्रकृतेः राजादेरुत्तमप्रकृतिभिर्नायिकादिभिः सह ग्राम्यसम्भोग-वर्णनं, तत् पित्रोः सम्भोग-वर्णनमिव सुतरामसभ्यम् । तथैवोत्तम देवता-विषयम् ।

(३) इतिहासादिषु कथासु रसवतीषु विविधासु सतीष्वपि यत्तत्र विभावाद्यौचित्यवत् कथाशरीरं तदेव ग्राह्यम् ।

अन्यच्च—

सन्ति सिद्धरसप्रख्या ये च रामायणादयः ।
कथाश्रया न तैर्योज्या स्वेच्छा रस विरोधिनी ॥

(४) कविना काव्यमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम् । तत्रेतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत्, तदेमां भङ्क्त्वापि स्वतन्त्रतया-रसानुगुणं कथान्तरमुत्पादयेत् ।

(५) सन्धयस्तेषामङ्गानि च रसाभिव्यक्त्यपेक्षया घटनीयानि । न तत्र किञ्चिदपि प्रकृतरसाननुगुणं भवेत् ।

(६) रसस्य क्रमशः उद्दीपन-प्रशमने कुर्यात् ।

(७) क्वचिदप्यलङ्कारो रसं न निरोदध्यात् ।

(८) फलावाप्ति प्रकरणेऽङ्गिरसस्य व्याप्तिर्भवेदेव ।

रसानां परस्परविरोधः तस्य परिहारश्च ।

रसानां परस्परं मैत्रीभावो विरोधो वा भवत्येव । तदेतत् पण्डितराजेना-धोविधं विशदीकृतम्—तत्र वीर-शृङ्गारयोः, शृङ्गार-हास्ययोः, वीराद्भुतयोः वीर-रौद्रयोः, शृङ्गाराद्भुतयोश्चाविरोधः । शृङ्गारबीभत्सयोः, शृङ्गार-करुणयोः, वीर-भयानकयोः, शान्त रौद्रयोश्च विरोधः ।

अत्र कविना प्रकृतरसं परिपोष्टुकामेन तदभिव्यञ्जके काव्ये तद्विरुद्ध-रसाङ्गानां निबन्धनं न कार्यम् । अन्यथोभयोरुपहतिः स्यात् ।

यदि तु विरुद्धयोरपि रसयोरेकत्र समावेश इष्यते, तदा विरोधं परिहृत्य विधेयः ।

विरोधस्तावद् द्विविधः—स्थितिविरोधो ज्ञानविरोधश्च । यदि नाम विरुद्धरसयोराश्रयः समान एव स्यात्, तर्हि स्थितिविरोधः स्यात् । अस्य परिहार आश्रय-वैभिन्न्येन भवति । यथा नायकगतत्वेन वीररसे वर्णनीये प्रतिनायके भयानकस्य ।[1]

एकस्मिन्नाश्रयेऽपि विरुद्धरसयोर्मध्ये उभयोरविरुद्धरस—स्थापनेन ज्ञानविरोधो नाम रसविरोधः परिहरणीयः । तथा हि शान्तशृंगारयोर्मध्येऽद्भुतस्यान्तरवस्थापनेन ।

अङ्गी रसः

प्रबन्धे चाङ्गीरस एक एवोपनिबध्यमानोऽर्थविशेषलाभं छायातिशयं च पुष्णाति ।[2] यथा रामायणे करुणो रसो महाभारते च शान्तः । ध्वन्यालोके अपरतश्च निर्दिष्टमानन्दवर्धनेन—

> **प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने ।**
> **एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता ॥** ३.२१
> **कार्यमेकं यथा व्यापि प्रबन्धस्य विधीयते ।**
> **तथा रसस्यापि विधौ विरोधो नैव विद्यते ॥** ३.२३

आद्यन्तव्यापी सोऽयमङ्गीरसः 'प्रबन्धेषु प्रथमतरं प्रस्तुतः सन् पुनः पुनरनुसन्धीयमानत्वेन स्थायी भवति । तस्मिन्नेव प्रबन्धे ऽन्तरालवर्तिनां रसान्तराणां समावेशो भवेन्नाम । तेन समावेशेन स्थायिरसस्याङ्गिता नोपहन्यते ।[3] तथाहि उत्तररामचरिते करुणो व्याप्नोति । तत्र नाटकान्ते नायकयोः संगमनेन शृंगार-फलरसः स्यादेव । फलरसस्तु क्वचिदङ्गी रसोऽपि भवेदिति ।

---

१. रसपदेनात्र प्रकरणे तदुपाधिः स्थायिभावो गृह्यते । रसस्य सामाजिकवृत्तित्वेन नायकाद्यवृत्तित्वात् ।

२. ध्वन्यालोके ४.५ अधिकृत्य विवृतिः ।

३. ध्वन्यालोके ३.२२ कारिकाया विवृतिमधिकृत्य ।

२३

यायावरीयं नाट्यवृत्तम्

डॉ० राधावल्लभः त्रिपाठी

ख्रीष्टस्य दशमशतके यायावरीयो राजशेखरः कर्पूरमंजरी-बालरामायण-बालभारत-विद्धशालभंजिका-काव्यमीमांसाप्रभृतिग्रन्थानामप्रतिमकर्तृत्वेन कामपि ख्याति लेभे। काव्यलक्षणदृशा कवित्वदृशा चास्य कर्तृत्वं पण्डितसमाजे बहुशो विचारितचरमपि नाट्यप्रयोगदृशा न सम्यगुन्मीलितपूर्वम्। कान्यकुब्जनरेश-महेन्द्रपालस्य संसदि उपाध्यायपदमलंकुर्वाणोऽयं यायावरीयो विप्रो नाट्यप्रयोग-निरतानां भरतानां भवभूतिरिव प्रत्यक्षं सम्पर्कं प्राप्तवानिति एतत्कृतरूपकाणां प्रस्तावनाभिः सुनिश्चितमेव। तेन च भारतीयनाट्यक्षेत्रेऽस्यावदानं विशिष्टं स्यादिति कृत्वा रंगपीठदृष्ट्या राजशेखरोऽत्र परामृश्यते।

नाट्यप्रयोगेऽस्यावगतिः अभिरुचिश्च

राजशेखरो न केवलं कवित्वाभिव्यंजनाये रूपकाणि रचयति स्म। वस्तुतः प्रयोगविज्ञानेनास्य परिचयः तस्मिंश्चोदात्ता रुचिः परिस्फुटा एव। नाट्यं प्रयुंजतां मार्गे पदे पदे कथं बाधाः परापतन्ति, कथं च प्रयोगस्य साधुत्व-मसाधुत्वं द्यूतस्येव न प्रागगोचरं कर्तुं शक्य इति सर्वं विज्ञाय तेनाबादि —

शैलूषैः कितवैरनेककपटश्रेणी महानाटकं।
द्यूतं यत्किल तत्र कौरवपतिः प्रस्तावनायां स्थितः॥

—**प्रचण्डपाण्डवे** । २।८३

तथैव प्रयोगात् प्राक् नेपथ्ये भरताः कथं नाट्यप्रस्तुत्यै प्रसाधयन्ति स्वात्मानं कथं च सज्जीभवन्ति ते इत्यपि सर्वं प्रत्यक्षमिव दृष्ट्वा तेन चित्रितम् :—

किं पुण णट्टअपअट्टो विअ अम्ह कुसीलवाण पवञ्चो। अदो-एक्का पओचिआइं सिचआइं उच्चिनोति, अअरा कुसुमावलीओ गुम्फेदि। अन्या पतिसीसआइं पसारेदि। कावि-हु पट्टुए वण्णि-आओ वण्णेदि। एस वंसो ठविदो ठाणे। इअं वीणा पडिसारी आदि। इम्मे तिण्णि-त्ति मुअंगा सज्जि-अन्ति। एस कंसतालाणं पक्खा उज्जाण हलबोलो। एवं ध्रुवागीदं आलवीअदि।'

—कर्पूरमंजरी, मनमोहनघोषसंपादिता, द्वि० सं०, पृ० ८०

रूपकरचनाकाले नटाः कुशीलवाः प्रयोगविषयश्च सदैव तस्य मानसे निहिता आसन् अत एव सन्दर्भेष्वनेकत्र तेन ते प्रसंगान्तरेरुल्लिखिताः । यथा--

मच्चकं तए विदे णडे विठ्ठे मंडिदे उवविठ्ठो पई मंडिदोत्ति ।

विद्ध०, पृ० १८ (कलिकातासंस्करणम्)

रंगंगणं णदाणच्चकीणं —तत्रैव पृ० २४

चंदमुहीए मअणरंगंगणं गेंदुअकेलितण्डवं । —तत्रैव पृ० २७

अहो से किंपि कवडणाडअवडत्तणं बम्हणस्स । —तत्रैव पृ० ८३

तेन तेऽमर्षभिनीतास्याः शिरःखण्डननाटिका ' —बालरामायणे, ७/७८

केनापि तौर्यत्रिकसूत्रधारेण तदनुवर्तिभिश्चास्य सम्बन्धोऽपि निश्चप्रचं सूच्यत एव, यतो हि नृत्तगीतादिष्वबाह्या तद्भार्या अवन्तिसुन्दरी कमपि नाट्याचार्यं कर्पूरमञ्जरीप्रयोगार्थं विनियुक्तवती इति स सूत्रधारत्वेन स्वयमूरीकरोति—

बाहुआणकुलमउलिमालिआ राअसेहरकइंदगेहिणी ।
भत्तुणो किमवंतिसुंदरी सा पउंजइउमेअमिच्छइ ॥

—कर्पूरमंजर्याम् १।११

अनया भूमिकया रंगप्रयोगेषु राजशेखरस्य भूमिका ज्ञातुं शक्यते । तथाहि—रंगपीठं मनसि निधाय तेन स्वरूपकेषु कालिदासादिभिरस्पृष्टा नवीनाः केचन संदर्भाः संयोजिताः, तथैव रंगप्रयोगाणां प्रत्यक्षज्ञानमपि तस्य कृतिषु यत्र तत्र परिस्फुरत् भारतीय नाट्यानुसन्धातॄणां कृते नितरामुपादेयतामावहतीति निःशंकम् ।

रूपकेषु केचन अभिप्राया राजशेखरेणैव इदम्प्रथमतया समुत्कलिताः । तत्कल्पनासु अस्य रंगप्रयोगविमर्शः प्रेरक आसीदिति सम्भाव्यते । तथाहि—

(१) पुरुषच्छद्मना नायिकाया अवस्थानम्

विद्धशालभंजिकायां नायिका मृगांकावती पुरुषवेषेणैव रंगेऽवतरति, मन्त्रिणं विहाय न कोऽपि तस्या वास्तविकतां जानाति । अथ च तस्याः स्त्रीभावमविज्ञाय राजानमुपहसितुकामा तां वारं वारं स्त्रीवेषेणोपस्थाप्य राजमहिषी स्वयमेव अन्ततः उपहासपदं भवति । यद्यपि पुराणेषु महाभारतादिषु च स्त्रियः पुरुषत्वेन पुरुषस्य च स्त्रीत्वेन छद्मना अवस्थितिः अनेकासु कथासु घटते एव, परन्तु रूपकसन्दर्भे राजशेखरस्यैवेयं प्रथमतया अवतारणा इति मन्यामहे । सा च प्रयोगकर्तॄणां सौकर्यं वीक्ष्यैव कृता स्यात् । नटानामनुमति

विना पुरुष-स्त्री-वेष-विपर्यय-प्रसगं नाट्यकारः प्रयोक्तुं नार्हति, अन्यथा तस्य रचनां ते प्रयोगाय न स्वीकुर्युः। प्रयोगाभिमुखी आसीद् राजशेखरस्य दृष्टिः, स्वरूपकाणां स्वजीवन एवासकृत् प्रयोगानसौ द्रष्टुमैच्छत्, तदर्थं च नटादिभिस्तस्य सम्बन्धा अपि पल्लविताः। अत एव युज्यत एव मन्तुमेतद् यत् तेषां नटानामेव सौकर्यं सम्मतिं च वीक्ष्य तेन नायिकाया पुरुषच्छद्मना स्थितेश्चावतारणा विहिता। कीदृशं सौकर्यमिति चेदुच्यते। उक्तमेव भरतेन यत् क्वचिन्नारीणां भूमिकाः पुरुषा रंगप्रयोगेषु निर्वहन्त्विति—

पुरुषः स्त्रीगतं भावं यत्र प्रकुरुते पुनः।
रूपानुरूपा सा ज्ञेया प्रयोगे प्रकृतिस्तथा॥ ना० शा० २६.-

यदि राजशेखरस्य समये एषा परिपाटी प्रचलिता स्यात् तर्हि नायिकाया पुरुषच्छद्मना नाटिकायां स्थितिस्तत्र न केवलं नटस्यकृते सौकर्यं, सामाजिकानां कृते चमत्कृतिमपि तनुयात्। आङ्ग्लदेशे विक्टोरियनयुगे सुकुमारा कुमारा रंगे नायिकाभूमिकायामवतरन्ति इति वस्तुस्थितिं समीक्ष्य शेक्सपीयरेण 'एज यू लाइक इट' इति नाटिकाया नायिकाया पुरुषवेषे स्थितिं निरूप्य कौतूहल विस्मयानन्दनिर्भरमावर्जनं किमपि रचितम्। राजशेखरे ऽप्येतादृशी स्थितिः शक्यसम्भवा। तत्प्राग्भवो भवभूतिस्तु मालतीमाधवे सूत्रधारस्य कामन्दक्याः, मारिषस्य च अवलोकितायाः भूमिकानिर्वाहं निरूपितवानेव। तद्यथा—

सूत्रधारः—एषोऽस्मि कामन्दकी संवृत्त।
मारिषः— अहमप्यवलोकिता।
(मालतीमाधव, चौखम्भा सं० पृ० १३)

(२) रंगे विवाहविधिसम्पादनम्

राजशेखरस्य बालरामायणे, कर्पूरमंजर्यां विद्धशालभंजिकायां च विवाहविधयः प्रत्यक्षमेव सामाजिकानां समक्षं प्रदर्श्यन्ते। इदमपि विधानं संस्कृतरूपकेषु प्रथमतया राजशेखरेणैव प्रयुक्तमिति मन्यामहे। अन्यच्च वामनभट्ट बाणकृत-पार्वतीपरिणयमपहाय विरलान्येव तादृशरूपकाणि संस्कृते येषु नायकयोर्विवाहः प्रेक्षकाणां पुरत एव लाजाहोम-भ्रामर्यादि-विधिविधानसहितं सम्पाद्य स्यात्। अयमपि अभिप्राय नटमण्डलस्याभि-प्रायमविज्ञाय तदनुमतिं वा अप्राप्य प्रयोक्तुमशक्य एव। कालिदासप्रभृति-कवीनां नाट्यकृतिषु प्रायः विवाहप्रसंगा समायान्ति, परं न तेषां रंगे प्रदर्शनं प्रेक्षकाणामग्रे जातु कुत्रचित् सूचितम्। अथ च तादृशप्रदर्शनस्य

पुरातननाट्यकारैः परिहार एव कृतः । तद्यथा भवभूतेर्महावीरचरिते सीतारामयोर्विवाहः आधिकारिकवस्तुनोंऽशभूतोऽपि परशुरामप्रसंगमुपन्यस्य कविना नेपथ्य प्रापितः । राजशेखरे तु विवाहप्रसंगा न नेपथ्ये अपितु रंग-पीठे एव सोत्सवं विधीयन्ते इति तत्र महद् वैशिष्ट्यम् । (सागरिकायाः ११।२ अंके प्रकाशित राजशेखरवर्णितो विवाहविधि' रिति लेखेऽस्माभिरे-तादृश-राजशेखरप्रस्तुतविवाहानां विशदानुशीलनं कृतम् ।) यदि कापि भर्तृमती ललना कुमारी वा नायिकामभिनयति, तर्हि रंगे सविधिसंपादितः कृत्रिमोऽपि विवाहो दुरुपपाद एव । अत एवोक्तम् प्रयोगचरैः प्रत्यक्षपरिचयं विना न राजशेखरेण विवाहप्रसंगानां संयोजनं कृतं स्यात्, नायिकायाः पुरुषच्छद्मना अवस्थानस्य प्रसङ्गवत् । यदि पुरुषो नटो नायिकाभिनयति, तर्हि यथा पुरुषच्छद्मप्रसगे सौकर्यं तथैव विधि-विधान-सहित-विवाह प्रसंगेऽपि ।

(३) स्वयंवर-प्रसङ्गः

स्वयंवरप्रसङ्गस्यापि संयोजनं संस्कृतरूपकेषु इदम्प्रथमतया राजशेख-रेणैव कृतमिति प्रतीयते । स्वयंवरसंयोजने तु रंगपीठे पात्राणां महान् सम्मर्दः स्यात् । एतत् खलु नाट्यशास्त्रविरोधि एव । तथाहि—प्रचण्डपाण्डवस्य प्रथमांके द्रौपदीस्वयंवरः प्रदर्श्यते । तथैव बालरामायणस्य तृतीयांकगत-गर्भांकेऽपि सीतास्वयंवरदृश्यं संयोजितम् ।

(४) उत्स्वप्नायितम्

विद्धशालभंजिकायां विदूषकपत्न्या उत्स्वप्नायितं सम्पूर्णेऽपि तृतीयांक-प्रवेशके विस्तरेण निरूपितम् । एतदपि राजशेखरस्य वैशिष्ट्यम् । यद्यपि भास-भवभूत्योरप्युत्स्वप्नायितं विद्यते, किन्तु भासस्य स्वप्नवासवदत्ते उदयनस्य द्वित्रेषु वाक्यखण्डेषु, उत्तररामचरिते च सीतायाः 'अज्जउत कहिंसि' 'हा सोह्म अज्जउत्त कहिंसि' इत्यनेनैव वाक्येन उत्स्वप्नायितं समाप्यते । राजशेखरे तु अत्यन्तदीर्घे उत्स्वप्नायिते सूच्यवस्तुनः अनेके कथांशा संयोजिता इत्यस्ति तत्र वैशिष्ट्यम् । समग्रे सुदीर्घे प्रवेशके शयाना नायिका एकाकिन्येव स्वप्ने प्रलपति इत्येतादृशप्रसंगविषये नास्ति नाट्यशास्त्रे कोऽपि निर्देशः ।

(५) युद्धम्

प्रचण्डपाण्डवे राजशेखरेण द्रौपदीस्वयंवरमनु पाण्डवानां स्वयंवरार्थि-भिर्युद्धमपि प्रत्यक्षमेव दर्शनीयं निरूपितम् । एतदपि परम्पराविरुद्धम् ।

एतादृशतत्त्वानां रूपकेषु समावेशो रंगपीठपरामर्शं विना न संभव

इति राजशेखरस्य समकालिकरंगपीठेन नाट्यप्रयोगविचक्षणैश्च सुदृढः परिचयः निश्चीयते। अत एव प्रयोगदृशा नाट्यस्य तास्ताः पद्धतयः अपि तदीयरूपकेभ्यः ज्ञातुं शक्यते। तत्र नाट्यप्रयोगेषूपयुक्तानामधोलिखित-तत्त्वानां ज्ञानं राजशेखरेण प्रकटितम्—(१) ध्रुवा (२) चर्चरी (३) आहार्याभिनयसाधनानि प्रतिशीर्षकादीनि (४) मत्तवारणी (५) भूमिकानां नटेषु विभाजनम् (६) पुत्तलिकानाट्यं च।

(१) ध्रुवा

नाट्यप्रयोगोपक्रमे ध्रुवाया माहात्म्यं सर्वोपरि परिकीर्तितं राजशेखरेण। उक्तं हि प्रचण्डपाण्डवे तेन 'ध्रुवा हि नाट्यस्य प्रथमे प्राणाः।' —तथा च

प्रथयति पात्रविशेषान् सामाजिकमनांसि रंजयति।
अनुसंदधाति च रसान्नाट्यविधाने ध्रुवा गीतिः॥

(प्र० पा० १।१४)

ध्रुवा नाम नाट्यप्रयोगेषु नेपथ्यान्तरतो गीयते स्म इत्यपि नाटकेऽस्मिन् सूत्रधारमुखात् राजशेखरः सूचयति—(नेपथ्ये गीयते)

सूत्रधारः (आकर्ण्य) कथम्, उपक्रान्तं भरतपुत्रैः। यद्वाल्मीकि-व्यासयोः प्रावेशिकी ध्रुवा गीयते।

—(प्र० पा० पृ० ८)

भरतेन पञ्चविधा ध्रुवा प्रकीर्तिता। राजशेखरस्तु तासु प्रावेशिकी ध्रुवामेवोल्लिखति। प्रचण्डपाण्डवे वाल्मीकि-व्यासयोः प्रवेशावसरे प्रावेशिकी ध्रुवा गीयते। अस्मिन् रूपके ध्रुवया न केवलं निर्देश एव कविना कृतः, तस्याः प्रयोगः पाठ्यांशश्चापि लिखितौ। बालरामायणेऽपि प्रावेशिक्या ध्रुवायाः प्रयोगविधिः पाठ्यांशश्च निर्दिष्टौ। तद्यथा— (नेपथ्ये)

मुक्कहरिणंकमंडलपाअप्पसरो बुधो विबुहवग्गो।
ओच्छरिअ राहुविधरं जलिणोणाहं समुल्लिहइ॥ १।१९

सूत्रधार—कुशीलवैरुपक्रान्तमेव यदियं शुनःशेपस्य प्रावेशिकी ध्रुवा। (विमृश्य) ध्रुवा नाम नाट्यस्य प्रथमे प्राणाः। तथाहि—

प्रथयति पात्रविशेषान्०—इत्यादि। १।२०

२. चर्चरी

नाट्यशास्त्रादिषु चर्चरी बहुशः चर्चिता। किन्त्वस्याः प्रायोगिक स्वरूपे राजशेखर एव प्रमाणम्। कालिदासीये विक्रमोर्वशीयेऽपि चर्चरी

उल्लिखिता, किन्तु कथमस्याः प्रयोग इति न कालिदासस्तत्र सूचयति। राजशेखरस्य कर्पूरमञ्जर्याः चतुर्थाङ्के 'ततः प्रविशति चर्चरी' ति निर्देशपूर्वकं चर्चर्याः प्रवेशः भवति, प्रयोगश्चास्या अनुष्ठीयते। विदूषक एनां वर्णयति—

मुत्ताहलिल्लाहरणोच्चआओ लासावसाणे तलिणंसुआओ।
सिञ्चन्ति अण्णोण्णमिमीओ पेच्छ जन्तजलेणं मणिभाइणेहिं ॥
परिब्भमन्तीओ विचित्तबन्धं इमाओ दोसोलह णच्चणीओ।
खेलन्ति तालाणुगदप्पआओ तहुङ्कणे दीसदि दण्डरासो ॥
समंससीसा समबाहुहत्था रेहाविसुद्धा अवराओ देन्ति।
पंतीहिं दोहिं लअतालबन्धं परोप्परं साहिमुहो चलन्ति।
मोत्तूण अण्णा मणि वारआई जन्तेहिं धारासलिलं खिवंति ॥
पडन्ति ताओ सहिआणमङ्के मणोभुवो वारुणबाणबङ्का।
इमा मसीकज्जलकालकाआ तिकण्डआवाओ विलासिणीओ।
पलिन्दरूपेण जणस्स हास समोरपिच्छाहरणा कुणंति ॥
हत्थे महामंसबलीधराओ हुंकारफेक्काररवा रउद्दा।
णिसाअरीणं पडिसीसएहिं अण्णा मसाणाभिणअं कुणंति ॥
का–वि वाइदकरालहुडुक्का मन्दमच्छललएण मिअच्छि।
दोल्लदाहिं परिवाडिचलाहिं चल्लिकस्मकरणम्मि पअट्टा ॥
किंकिणिकवरणझणसद्द कंठगोविन्मअजन्तिदताल।
जोइणीवलअणच्चकेलि तालणेउररवा विरअन्ति ॥
कोदुहल्लवसजंगमवेसा वेणुवादनपरा अवरवओ।
कालवेसवसमामिअलोआ ओसरन्ति पणमन्ति हसन्ति ॥

—कर्पूरमंजर्यां, चतुर्थजवनिकान्तरे—४.१७

'ततः प्रविशति चर्चरी' ति संकेतेन नर्तकीनां समूहोऽपि चर्चरीति संज्ञप्त इति संकेतितम्। अस्मिन् समूहे युगपद् नाना नृत्यानि प्रचरन्ति स्म इति विदूषकवर्णनेन सुस्पष्टमेव। सर्वेषामेतेषां नृत्यानां समूहोऽपि चर्चरीति कथ्यते। नर्तकीषु काश्चन अन्योन्यं मणिभाजनैर्यन्त्रजलेन लासावसाने सिचन्ति स्म। अपराश्च पुलिन्दवेषे पुलिन्दनृत्तम्, काश्चन निशाचरीणां वेषे श्मशानाभिनयमकुर्वन्। एका नर्तकी चल्लिकं नाम नाट्यमभिनिनाय। इदं नाट्य छलितं छलितकं छल्ली वाप्यभिधीयते। मालविकाग्निमित्रे मालविका इदमेव नाट्यमग्निमित्रसमक्षं कृतवती। काश्चन कण्ठगीतिं प्रस्तुतवत्यः, अन्याश्च वेणुवादनम्।

इत्थं चर्चर्यां विविधवेषा योषितो विविधं नृत्यन्ति। समराइच्चकहेति प्राकृतकाव्येऽपि चर्चर्या इत्थमेव उल्लेखः कृतः।

'पवत्तमयणमहूसवे निग्गयासु विचित्तवेसासु चच्चरीसु ...'

(समराइच्चकहा, जाकोबी सं०, पृ० ४२)

चर्चर्या सह कानि कानि गीतान्यगीयन्त इति न राजशेखरेण विशदीकृतम्। केवलं योगिनीनृत्तेन सह कण्ठगीतिरप्यभवदित्येव स उल्लिखति। एतेन चर्चर्या सह पाठ्यं न अनिवार्यमिति प्रतीयते। एच० डी० वेलणकर महाभागन्यायस्य निष्कर्षः—

"'Sometimes carcarī was unaccompanied by any pāthya or geya stanza and that Instrumental music might alone have accompanied it—therefore main attraction of carcarī lies in dance and accompaniment of instrumental music."

(विक्रमोर्वशीयस्य साहित्याकदमीसंस्करणे वेलणकरकृता भूमिका, पृ० ३१)

इत्थं चर्चरी नाम नृत्तविशेष इति सिद्ध्यति, यत्र ताल-लय-प्राधान्यमभवत्। समूहे क्रियमाणत्वादिदं नृत्तं रासेन रासकेन वा साम्यमावहति। अत्र केवलं छलितनृत्यमेव एकाकिन्या नर्तक्याभिनीयते, अन्यानि तु नृत्तानि युगपत् बह्वीभिरनुष्ठीयन्ते। नाट्याचार्येषु वेमेन वेदेन च चर्चर्या निरूपणे रासकेनास्याविशेषत्वं विवृतम्। तद्यथा—

यत् रासकक्रमेणैव नर्तक्यो विनिर्गताः।
वर्णतालान्विते वाद्ये वाद्यमानेऽथ वादके॥
प्रविश्य युग्मशो रंगं गायन्त्यश्चर्चरीं मुहुः।
द्विपदीमथवा गाथाबद्धसूक्तिपदोत्तराम्॥
शृंगारवर्णनोपेतां वसन्तसमयोत्सवे।
कुर्वन्ति नर्तनं सेयं चर्चरीति निगद्यते॥

(वेम, भरतकोशे, पृ० २०४)

३. आहार्याभिनयप्रकाराः

कर्पूरमञ्जर्याः प्रस्तावनायाः रंगावतरणात् प्राक् नटाः कथमात्मानं प्रसाधयन्तीति सम्यक् विवेचितम्। तद्यथा—एका नटी सिचयानि उच्चिनोति स्म, अपरा कुसुमावलीं गुम्फति स्म। अन्या प्रतिशीर्षकाणि प्रसारयति स्म, कापि च पट्टके वर्णिकाः पिनष्टि स्म। रंगावतरणपूर्वं नटैः वंशाः स्थाने स्थापिताः।

नटाः स्व-स्व-भूमिकापेक्षया कृष्ण-गौर-रक्तादि-वर्णैर्लिप्तांगा अभूवन्।

उपर्युक्तचर्चरीनृत्ते काश्चन नट्यः मसिकज्जललिप्तमुख्य आसन्निति कविना सूचितम् (मसिकज्जलकालकाआ—कर्पू० ४।१३)।

चर्चरीनर्तकीना वेशादिकं कविना सविस्तरं वर्णितम्। 'सर्वाङ्गसौष्ठवाभिव्यक्तये विरलनेपथ्यो: पात्रयो: प्रवेशोऽस्तु' इति मालविकाग्निमित्र कालिदासवचोनुसारं चर्चर्यामपि स्वल्पपरिधाना एव नट्यो बभूवुः (कर्पू० ४।१)। पुलिन्दनृत्तं प्रयुञ्जाना नर्तक्यः सचापहस्ता बर्हधारिण्य चासन्। काश्चित् मुक्तावलीं किंकिणीमपि वा परिदधुः।

प्रतिशीर्षकम्

संस्कृतनाट्यकारेषु राजशेखर एव रंगे प्रतिशीर्षक-प्रयोगं विशदयति। यद्यपि भरतेन अभिनवगुप्तेन च प्रयोगे प्रतिशीर्षकाणि क्वचित् प्रयोज्यान्येवेति संकेतितम्, तथाहि—

> तथा प्रतिशिरश्चापि कर्तव्यं नाटकाश्रयम्।
> अमात्यानां कंचुकिनां तथा श्रेष्ठिपुरोधसाम्॥
> वेष्टनं जन्यपट्टादि प्रतिशीर्षाणि कारयेत्॥
>
> —ना० शा० २१.१३०, १३८

अभिनवश्चाह—'मुकुटप्रतिशीर्षकादिना तावन्नटबुद्धिराच्छाद्यते।'—
(अ० भा० गायकवाड सं० ३६, पृ० २८७)।

किन्तु प्रतिशीर्षकाणां प्रयोगः प्रयोगेषु वस्तुतः अक्रियत वा न वेति कथं चाक्रियत इति विषये न पुष्कलं प्रमाणं दृष्टान्तो वा समुपलभ्यते, केवलं राजशेखर एवात्र प्रमाणपुरस्सरं निर्दिशति। तद्यथा— चर्चर्यां श्मशानाभिनये महामांसबलिधराः काश्चन नर्तक्यः प्रतिशीर्षकं धृतवत्य इति तेन सूचितम् (कर्पू० ४।१४)। तेन च बीभत्स-भयानक-रसावेशवैशद्य-विधानाय प्रतिशीर्षक-प्रयोगः प्रयोगेषु नटैरक्रियत इति प्रमाणीक्रियते।

अथ च हास्याभिनयेऽपि प्रतिशीर्षकाणि प्रसाधितानीति कर्पूरमंजर्या इतरेणोल्लेखेन साध्यते। तद्यथा—सट्टकेऽस्मिन् विदूषकः कपिञ्जलः चित्राकृति विचित्रकर्णं लम्बकूर्चं प्रतिशीर्षकं परिदधाति इति तत्कथनेन प्रमीयते। अत एव विचक्षणया चेट्या कलहायमानोऽसौ राजानमपि तां प्रत्येव पक्षपातिनं दृष्ट्वा चुकोप जगाद च—

'अण्णो को वि पिअ वअस्सो वअस्सेण अण्णेसीअदु। एसा वा दुट्ठदासी लम्बकुच्चं टप्परं कण्णं पडिसीसअं देइअ मह ठाणे कीरदु।'

—(कर्पू० पृ० ८८)

'अत्र अन्यं कमपि विदूषकं मम स्थाने नियोजय, अथवा एतां दुष्टदासीमेव इद लम्बकूर्चं विचित्रकर्णं प्रतिशीर्षं परिधाप्य विदूषकरूपेण मम स्थाने स्वीकुरु' इति कथयन् कर्पूरमंजर्यां कपिञ्जलः स्वप्रतिशीर्षकमुन्मोच्य क्षेप्तुमिच्छति। एतेन विदूषकस्य प्रतिशीर्षकधारणं सिद्ध्यति। एतादृशं विचित्रप्रतिकृति प्रतिशीर्षकं परिधाय तस्य हास्यास्वादन अभिनये च सौकर्यं स्यादिति सर्वथा युक्तियुक्तमेव श्मशानाभिनय इव हास्याभिनयेऽपि प्रतिशीर्षकधारणम्।

४. मत्तवारणी

मत्तवारणी नाम भारतीयनाट्यानुशीलने कापि जटिला समस्या विद्यते। भरतेन तु मत्तवारणी रंगे कर्तव्येति निर्दिष्टम्, किन्तु प्रयोगे इयं वस्तुतः निमाय प्रयुज्यते स्म वा न वेति न केनापि नाट्यकारेण सुस्पष्टं निर्दिष्टम्, राजशेखरं एवापवादः। तस्य विद्धशालभंजिकायाः द्वितीयांके नायक-विदूषकौ नायिका प्रतीक्षमाणौ उद्याने तिष्ठतः, विदूषकस्त्वाह—

'पाणइआ विअ केच्चिर उद्धुआणुअं चिट्ठिअ—
म्हामो। ता एहि मत्तवारणीए उवविसह्म।'

(विद्ध॰ पृ॰ ६५

अत्र प्रतीक्षमाणाभ्यामावाभ्यां मत्तवारण्यामुपवेष्टव्यमिति विदूषकः कथयति। एतेन रंगे मत्तवारण्याः अवस्थितिः साध्यते, प्रतीक्षावसरे नटस्तामाश्रयतिस्म इत्यपि च ज्ञायते।

५. भूमिकानां विभाजनम्

कीदृशी भूमिका कस्मै प्रदेयेति विषये भरतस्य विस्तरशः विवेचनं प्राप्यत एव। अस्मिन् प्रसंगे राजशेखरोऽपि मुखरः। विद्धशालभंजिकायां सूत्रधारः उद्घोषयति मया अस्यां नाटिकायाम् अमात्यहरदासस्य भूमिका निर्व्यूढा स्यादिति –

'तदहमपि······हरदासस्य भूमिकां सम्पादयामि।

(विद्धशा॰ न॰ पृ॰ ५)

तथैव कर्पूरमंजर्यां सूत्रधारस्य भार्या नटी महादेव्याः भूमिकायामवतरतीति सूच्यते—

'महारामस्स देईए भूमिकं घेत्तूण अज्जा
अम्हआरिआ अ अवणि अन्तरे चिट्ठदि।'

(कर्पूर॰ पृ॰ ८२)

तेन च सूत्रधारस्तद्भार्या च विशिष्टाः गुरुतराश्च भूमिका जगृहतुरिति सिद्ध्यति।

विदूषकभूमिकाधारी नटः संगीते निपुणः स्यादिति विचित्रमेव वस्तु राजशेखरः सूचयति। विद्धशालभंजिकायां विदूषकः सत्यमेव स्वात्मानं गान्धर्ववेदविचक्षणं विवृणुते (विद्ध० पृ० ८३,८९)। तेन नाट्यकर्ता स्वयमेव एकस्मिन् स्थले गायन् निर्दिष्टः (तत्रैव पृ० ८८)।

६. पुत्तलिका-नाट्यम्

पुत्तलिका-नाट्यस्योल्लेखो राजशेखरेण बालरामायणे कृतः। तत्र रावणः सीतायाः पुत्तलिकां निर्माप्य रामस्याग्रे तां निदधाति, तस्याः शिरश्च कृन्तति। ततश्च मूर्च्छितं रामं प्रबोधयति सारिका—

सूत्रधारबलव्यापारगात्रेयं यन्त्रजानकी।
कण्ठस्थशारिकालापा कृता लंकेशकेलये।
तच्छिरस्थैव निर्याता सा चाहं राम शारिका।
सख्यशिवरसप्रीत्या त्वां बोधयितुमास्थिता॥
तेन तेऽयं समीतास्याः शिरश्छेदननाटिका।
मृता सीतेति येन त्वं गृहम् प्रति निवर्तसे॥
(बाल० ७.७७ ७९)

संवादादस्मात् ज्ञायते यत् पुत्तलिकानाट्ये पुत्तलिकानां चालकः सूत्रधार इति निगदितः। पुत्तलिकानां कण्ठेषु क्वचित् प्रशिक्षिताः शारिका निधापिताः येन ता आलपन्त्य इव प्रतीयन्ते स्म। इमाः पुत्तलिका दारुमय्योऽभूवन्। इत्थं च—

नाट्यप्रयोगविषये लुप्तप्रायाः परम्पराः।
काले याते तमश्छन्ना प्रकाशं नयते स्फुटम्॥
रंगराज्यस्य राजेव राजते राजशेखरः।
कृत्स्नं रंगविधिं आम्नातस्त्वासौ महीयते॥

———